
लग्नचन्द्रिका



खेमराज श्रीकृष्णदास प्रकाशन,
बम्बई-४

श्रीः

लग्नचन्द्रिका

हिन्दीटीकासहित

★

सर्व सामान्य ज्योतिषियोंकी सुगमताके लिये
पं० बस्तीरामजीसे यथातथ्य
भाषार्थ रचना कराय,

मुद्रक एवं प्रकाशकः
खेमराज श्रीकृष्णदास™,
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
खेमराज श्रीकृष्णदास मार्ग, मुंबई - ४०० ००४.

संस्करण : अक्टुबर २०११, संवत् २०६८

मूल्य : रुपये ४५ मात्र।

मुद्रक एवं प्रकाशक:
खेमराज श्रीकृष्णदास,™
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
खेमराज श्रीकृष्णदास मार्ग,
मुंबई - ४०० ००४.

Printers & Publishers :
Khemraj Shrikrishnadass Prop: Shri Venkateshwar Press, Khemraj Shrikrishnadass Marg, 7th Khetwadi, Mumbai - 400 004.

Web Site : http://www.Khe-shri.com
Email : khemraj@vsnl.com

Printed by Sanjay Bajaj For M/s.Khemraj Shrikrishnadass Proprietors Shri Venkateshwar Press, Mumbai-400 004, at their Shri Venkateshwar Press, 66 Hadapsar Industrial Estate, Pune 411 013

।। श्रीः ।।

अथ लग्नचन्द्रिका

हिन्दीटीकासमेता

श्रीगणेशाय नमः

तमिस्रया जगद्ग्रस्तं यो जीवयति भूतले ।।
तं वन्दे परमानंदं सर्वसाक्षिणमीश्वरम् ।।१।।

अथ विशेषसंज्ञाः

तनुर्धनं च भ्राता च सुहृत्पुत्रो रिपुर्वधूः ।। मृत्युश्च धर्मः कर्मायो व्ययो भावाः प्रकीर्तिताः ।।२।। विषमोथ समः पुंस्त्री क्रूरः सौम्यश्च नामतः ।। चरः स्थिरो द्विस्वभावो मेषाद्या राशयः क्रमात् ।।३।। दुश्चिक्यं स्यात्तृतीयं च सुखं सद्म चतुर्थकम् ।। बंधुसंज्ञं च पातालं हिबुकं पंचमं च धीः ।।४।। द्यूनं द्यूनमथास्तं च यामित्रं सप्तमं स्मृतम् ।। दशमं त्वंबरं मध्यं छिद्रं स्यादष्टमं गृहम् ।।५।। एकादशं भवेल्लाभः सर्वतोभद्रमेव च ।। व्ययो रिष्फं द्वादशं च त्रिकोणं नवपंचमे ।।६।। त्रिषष्ठदशलाभानां भवेदुपचयाख्यकम् ।। चतुर्थाष्टमयोः संज्ञा चतुरस्रं स्मृता बुधैः ।।७।। केन्द्रचतुष्टयकंटकसंज्ञाऽद्यचतुर्थसप्तदशमानाम् ।। परतः पणफरमापोक्लिमं च वेद्यं यथाक्रमतः ।।८।। वर्गोत्तमनवमांशाश्चरादिषु प्रथममध्यांत्याः ।। होरा विषमेर्केंद्वोः समराशौ चंद्रसूर्ययोः क्रमतः ।।९।। स्वगृहाद्द्वादशभागा द्रेष्काणाः प्रथमपंचनवमानाम् ।। मेषाद्याश्चत्वारः सधन्विमकराः क्षपाबला ज्ञेयाः ।।१०।। ते विना मिथुनं पञ्च ज्ञेयाः पृष्ठोदया बुधैः ।। मेषो वृषस्तथा कर्को मकरश्च धनुर्धरः ।।११।। पृष्ठोदयाः स्मृताः पञ्चयात्रायां नैव शोभनाः ।। सिंहाद्या ये च चत्वारः कुंभो युग्मं दिवाबलाः ।।१२।। शीर्षोदयाश्च मीनस्तु बली रात्रौ तथा दिने ।। क्षीणचंद्रो रविर्भौमः पापोः राहुः शनिः शिखी ।।१३।। बुधोऽपि तैर्युतः पापो होरा राश्यर्द्धमुच्यते ।। रवींदुभौमगुरवो ज्ञशुक्रशनिराहवः ।।१४।। स्वस्मिन्मित्राणि चत्वारि परस्मिञ्छत्रवः स्मृताः ।। मेषे रविर्वृषे चन्द्रो मकरे च महीसुतः ।।१५।। कन्यायां रोहिणीपुत्रो गुरुः कर्के झषे भृगुः ।। शनिस्तुलायामुच्चश्च मिथुने सिंहिकासुतः ।।१६।। उच्चात्सप्तमगा नीचा राशौ वापि नवांशके ।।१७।।

।।श्रीगणेशाय नमः।। मङ्गलाचरणश्लोकः। शिवसूनुपदद्वंद्वं शरणं शरणार्तिहम् ।। नत्वा विरच्यते ह्येषा भाषा स्वल्पधियां मुदे ।।१।। जो परमात्मा अंधकारसे ग्रसित हुए

जगत्को पृथ्वीतलमें (सूर्यरूप करके) जीवन कराते हैं तिस सर्वसाक्षी ईश्वरको प्रणाम करता हूं ।।१।। तनु १ धन २ भ्राता ३ सुहृत् ४ पुत्र ५ रिपु ६ स्त्री ७ मृत्यु ८ धर्म ९ कर्म १० आय ११ व्यय १२ ऐसे क्रमसे ये बारह भाव कहे हैं ।।२।। और विषम, सम, पुरुष, स्त्री, क्रूर, सौम्य इन नामों करके तथा चर, स्थिर, द्विस्वभाव इन भेदों करके मेष, वृष, मिथुन ऐसे क्रमसे सब राशियोंकी संज्ञा जाननी ।।३।। तीसरे घरको दुश्चिक्य कहते हैं, चौथेको सुखसद्म, बंधु, पाताल, हिबुक इन नामोंसे बोलते हैं, पंचम घरको धी (बुद्धि) कहते हैं ।।४।। और द्यून, द्युन, अस्त, यामित्र ये सातकी संज्ञा है, अंबर मध्य ये दशवें घरकी संज्ञा है आठवें घरको छिद्र कहते हैं ।।५।। ग्यारहवेंको लाभ, सर्वतोभद्र कहते हैं. बारहवें घरको व्यय और रिष्फ कहते हैं ९–५ वें घरको त्रिकोण कहते हैं ।।६।। तीन, छह, दश, ग्यारह इन घरोंको पंडितजन उपचय कहते हैं और चतुर्थ अष्टम घरोंको चतुरस्र कहते हैं ।।७।। १–४–७–१० इन घरोंको केंद्र, चतुष्टय, कंटक बोलते हैं फिर २–५ ८।११ इन घरोंको पणफर कहते हैं ३–६–९–१२ इनको आपोक्लिम कहते हैं ।।८।। चर आदि राशियोंमें क्रमसे प्रथम, मध्य, अन्त्य, (होनेवाले) वर्गोत्तम नवांशक कहलाते हैं (मेष मिथुन आदि) विषम राशिमें सूर्य, चंद्रमा इस क्रमसे और समराशिमें चंद्रमा, सूर्य इस क्रमसे होरा होती है ।।९।। अपने घरसे द्वादशांश होते हैं द्रेष्काण, प्रथम, पंचम, नवम इन राशियोंके होते हैं अर्थात् लग्नके तृतीयांशको द्रेष्काण जानो (तहां १० अंशतक प्रथम राशिका, २० तक पांचवींका, ३० तक नवमी राशिका है) और मेष आदि चार धन, मकर ये राशि रात्रिमें बली हैं ।।१०।। और यही मिथुन विना पांच लग्न पृष्ठोदय संज्ञक हैं जैसे मेष, वृष, कर्क, मकर, धन ।।११।। ये पांच पृष्ठोदय संज्ञक कहे हैं सो यात्राविषे शुभ नहीं हैं सिंह आदि चार (५–६–७–८) कुंभ, मिथुन ये दिनमें बली हैं ।।१२।। और शीर्षोदय संज्ञक हैं यह मीन लग्न रात्रिमें बली और दिनमें भी बली है और शीर्षोदय संज्ञक तथा पृष्ठोदय संज्ञक भी है, क्षीण चंद्रमा, सूर्य, मंगल, राहु, शनि, केतु, ये पापग्रह हैं ।।१३।। इन (पापग्रहों) के साथ होनेसे बुध भी पाप है और आधी राशिको होरा कहते हैं, सूर्य, चंद्र, भौम, बृहस्पति ये और बुध, शुक्र, शनि राहु ।।१४।। ये चार आपसमें मित्र हैं अन्यथा परविषे शत्रु हैं जैसे सूर्य, चंद्र, भौम, गुरु आपसमें मित्र और बुध, शुक्र, शनि, राहु उनके संग शत्रु हैं और मेषका सूर्य, वृषका चंद्रमा, मकरका मंगल, ।।१५।। कन्याका बुध कर्कका गुरु, मीनका शुक्र, तुलापर शनि, मिथुनविषे राहु उच्चका है ।।१६।। उच्चराशिसे सातवीं राशिपर हो तो नीचका जानो राशिमें वा नवांशकमें यही क्रम है ।।१७।। यदि सूर्यादि ग्रह उच्चके होवें तो जन्मनेवाला

अथ शुभाशुभयोगाः

अर्थी भोगी धनी नेता जायते मण्डलाधिपः ।। नृपतिश्चक्रवर्ती च रव्याद्यैरुच्चगैर्ग्रहैः ।। त्रिभिः स्वस्थैर्भवेन्मंत्री त्रिभिरुच्चैर्नराधिपः ।।१८।। त्रिभिर्नीचैर्भवेद्दासस्त्रिभिरस्तंगतैर्जडः ।। उदितः स्वगृहस्थश्च मित्रगेहे स्थितोऽपि वा ।।१९।। मित्रवर्गे मित्रदृष्टः स ग्रहः सबलः स्मृतः ।। स्वामिना बलिना दृष्टः सबलैश्च शुभग्रहैः ।।२०।। न दृष्टो न युतः पापैः स भावः सबलः

स्मृतः ।। दशमे बुधसूर्यौ च भौमराहू च षष्ठगौ ।।२१।। राजयोगेऽत्र यो जातः स पुमान्नायको भवेत् ।। आदौ जीवः शनिश्चांते ग्रहा मध्ये निरंतरम् ।।२२।। राजयोगं विजानीयात्कुटुम्बबलसंयुतः ।। सहजस्थो यदा जीवो मृत्युस्थाने स्थितः सितः ।।२३।। निरन्तरं ग्रहा मध्ये राजा भवति निश्चितम् ।। जीवो वृषे सुधारश्मिर्मिथुने मकरे कुजः ।।२४।। सिंहे भवति सौरिश्च कन्यायां बुधभास्करौ ।। तुलायामसुराचार्यो राजयोगो भवेदयम् ।।२५।। अस्मिन्योगे समुत्पन्नो महाराजो भवेन्नरः ।। अष्टमे द्वादशे वर्षे यदि जीवति मानवः ।।२६।। सार्वभौमस्तदा राजा जायते विश्वपालकः ।। एको जीवो यदा लग्ने सर्वे योगास्तदा शुभाः ।।२७।। दीर्घजीवी महामान्यो जायते नायको भटे ।। धनुष्यारश्च शुक्रश्च मीने जीवस्तुले बुधः ।।२८।। नीजस्थौ शनि-चंद्रौ च राजा स्याद्धनवर्जितः ।। दाता भोक्ता च विख्यातो मान्यो मंडलनायकः ।।२९।। मीने शुक्रो बुधश्चांते १२ धने २ राहुस्तनौ १ रविः ।। सहजे ३ च भवेद्भौमो योगे राजाऽत्र जायते ।।३०।। सहजे च यदा जीवो लाभस्थाने च चंद्रमाः ।। स राजा राज्यमध्यस्थो विख्यातः कुल दीपकः ।।३१।। शुभग्रहाः शुभक्षेत्रे भवंति यदि केन्द्रगाः ।। तदाशुभानि कर्माणि करोत्येव हि बालकः ।।३२।। उच्चस्थानगताः सौम्याः केन्द्रेषु च भवंति चेत् ।। ध्रुवं राज्यं भवेत्तस्य स्ववश्यानां च पोषकः ।।३३।। धने व्यये तथा लग्ने सप्तमे च यदा ग्रहाः ।। छत्रयोगस्तदा ज्ञेयो वंश्यानां नायको भवेत् ।।३४।। ससूरा वा सचन्द्रा वा यत्र कुत्र चतुर्ग्रहाः ।। मालानामकयोगोयं राज्यदो धनदो भवेत् ।।३५।। स्वक्षेत्रस्थो यदा जीवो बुधः सौरिः स्वराशिगः ।। अत्र जातस्य दीर्घायुः संपदश्च भवंति हि ।।३६।। मीने बृहस्पतिः शुक्रश्चंद्रमाश्च यदा भवेत् ।। तत्र जातस्य राज्यं स्यात्पत्नी च बहुपुत्रिणी ।।३७।। पञ्चमस्थो यदा जीवो दशमस्थश्च चंद्रमाः ।। राज्यवान्स महाबुद्धिस्तपस्वी च जितेंद्रियः ।।३८।। सिंहे जीवस्तुलाकीटकोदंडमकरेषु च ।। ग्रहा यदा तदाजातो देशभोगी भवेन्नरः।।३९।। तुलाकोदंडमीनस्थो लग्नगः स्याच्छनैश्चरः ।। करोति नृपतेर्जन्म त्वन्यराशौ गता युषम् ।।४०।। विद्यास्थाने यदा सौम्यः कर्मस्थाने च चंद्रमाः ।। धर्मस्थाने यदा सौम्या योगे राजात्र जायते ।।४१।। मकरे कार्मुके मीने वृषे च मिथुने क्रिये ।। ग्रहास्तदात्र विख्यातो राजा भवति मानवः ।।४२।। बुधभार्गवजीवार्कियुक्तो राहुश्चतुष्टये ।। करोति धनमारोग्यं पुत्रं मानादिकं गृहम् ।।४३।। चतुर्थभवने शुक्रो गुरुश्चंद्रो धरासुतः ।। रविसौरियुताः संति राजा जातो भवेद्ध्रुवम् ।।४४।। अष्टमे च व्यये क्रूरो मध्यगौ क्रूरसौम्यकौ ।। राजयोगेऽत्र यो जातश्चत्वारिंशत्स जीवति ।।४५।। लग्ने सौरिस्तथा चंद्रस्त्रिकोणे जीवभास्करौ ।। कर्मस्थाने भवे-द्भौमो योगे राजाऽत्र जायते ।।४६।। नवमेच यदा सूर्यः स्वगृहस्थो भवेद्यदा ।। तस्य जीवति न भ्राता स्यादेकोपि नृपैः समः ।।४७।। द्वित्रितुर्यसुते षष्ठे कर्मण्यपि

यदा ग्रहाः ।। राजयोगं विजानीयाज्जातस्तत्रनृपो भवेत् ।।४८।। लग्नेक्रूरो व्यये क्रूरो धने सौम्यो यदा भवेत् ।। सप्तमे भवने क्रूरः परिवारक्षयंकरः ।।४९।। लग्ने क्रूरो व्यये सौम्यो धने क्रूरश्च जायते ।। राजयोगेत्र यो जातो दरिद्रो धनवर्जितः ।।५०।। चापे सौरिश्च चंद्रश्च मेषे जीवो यदा भवेत् ।। दशमे राहु शुक्रौ च राजयोगे नृपो भवेत् ।।५१।। सिंहे जीवोथ कन्यायां भार्गवो मिथुने शनिः ।। स्वक्षेत्रे हिबुके भौमः स पुमान्नायको भवेत् ।।५२।। शनिचन्द्रौ च कन्यायां सिंहे जीवो घटे तमः।। मकरे च कुजस्तत्र जातो विश्वस्य पालकः ।।५३।। शुक्रो जीवो रविभौमश्चापे मकरकुंभयोः । मीने च वत्सरे विंशे जातः स्यात्सर्वकर्मकृत् ।।५४।। चतुर्षु केंद्रस्थानेषु सौम्यपापग्रहस्थितिः ।। चतुः सागरयोगोयं राज्यदो धनदो भवेत् ।।५५।। कर्कलग्ने जीवयुक्ते लाभे चंद्रज्ञभार्गवाः ।। मेषे भानौ च यो जातः स राजा विश्वपालकः ।।५६।। कर्मस्थाने यदा जीवो बुधः शुक्रस्तथा शशी ।। सर्वकर्माणि सिद्ध्यंति राजमान्यो भवेन्नरः ।।५७।। षष्ठेष्टमे च नवमे द्वादशे तथा ।। सौम्य-क्रूरग्रहैर्योगे राजमान्यः सकष्टकः ।।५८।। पञ्चमे च यदा षष्ठे चाष्टमे नवमे क्रमात् ।। भौमराहुसितार्काः स्युर्जातोत्र कुलदीपकः ।।५९।। लग्ने सौरिस्तथा चंद्र-श्चाष्टमे भार्गवो यदा ।। जायते च तदा राजा मानी पत्नीरतः सदा।।६०।। मिथुनस्थो यदा राहुः सिंहस्थो भूमिनंदनः ।। अत्र जातः पितुर्द्रव्यं प्राप्नोति सकलं नृपः ।।६१।। चापार्द्धे शशिना युक्तो यदि सूर्यः प्रजायते ।। लग्ने च सबलो मंदो मकरे च कुजो भवेत् ।।६२।। अत्र योगे समुत्पन्नो महाराजो भवेन्नरः ।। दूरादेव नमंत्यस्य प्रतापै-श्चरणं नृपाः ।।६३।। उच्चाभिलाषी सविता त्रिकोणस्थो यदा भवेत् ।। अपिनीच-कुले जातो राजा स्याद्धनपूरितः ।।६४।। एकादशे यदा सर्वे ग्रहाः स्युर्दशमेऽपिवा ।। विलग्ने सम्मुखे वापि कारकाः परिकीर्तिताः ।।६५।। उत्पन्नः कारके योगे नीचोऽ-पिनृपतांव्रजेत् ।। राजवंशसमुत्पन्नो राजा तत्र न संशयः ।।६६।। लग्नतश्चान्यतो वापि क्रमेण पतिता ग्रहाः ।। एकावली समाख्याता महाराजो भवेन्नरः ।।६७।। धनस्थाने यदा शुक्रो दशमे च बृहस्पतिः ।। षष्ठेष्टमे सिंहिकाजो राजा भवति विक्रमात् ।।६८।। चतुर्ग्रहा एकगताः पापाः सौम्या भवंति चेत् ।। भ्रातृधीधर्मलग्नार्थे ३।५।९।१।२ राजयोगो भवेदयम् ।।६९।। त्रिकोणे सप्तमे लग्ने भवंति च यदा ग्रहाः ।। हंसयोगं विजानीयात्स्ववंशस्यात्र पालकः ।।७०।। सर्वग्रहैर्यदा चन्द्रो विनार्ऽलि च निरीक्षितः ।। षष्ठेष्टमे च यामित्रे स दीर्घायुर्धं-राधिपः ।।७१।। षष्ठेष्टमे द्वादशे च द्वितीये च यदा ग्रहाः ।। सिंहासनाख्ययोगेऽ-स्मिन् राजसिंहासने वसेत् ।।७२।। लग्ने शुक्रबुधौ न स्तो न केंद्रे च बृहस्पतिः ।। दशमेंगारको नास्ति स जातः किं करिष्यति ।। ७३ ।। अष्टमस्था यदा क्रूराः सौम्या लग्ने स्थिता ग्रहाः ।। ध्वजयोगेऽत्र यो जातः स पुमा-

न्नायको भवेत् ॥७४॥ षष्ठस्थाने यदा पापाः केंद्रस्थाने शुभग्रहाः ॥ सर्वसिद्धिर्भवेत्तस्य राजमान्यो भवेन्नरः ॥७५॥ मेष लग्ने यदा भानुश्चतुर्थे च बृहस्पतिः ॥ दशमे च कुजो जातो विश्वस्याधिपतिर्भवेत् ॥७६॥ लग्ने सौरिस्तथा चंद्रस्त्रिकोणे जीवभास्करौ ॥ कर्मस्थाने भवेद्भौमो राजयोगोऽभिधीयते ॥७७॥ केंद्रे स्वोच्चस्थिते सौम्ये राजलक्ष्मीपतिर्भवेत् ॥ केंद्रे पापे स्वोच्चसंस्थे राजा स्याद्धनवर्जितः ॥७८॥ बली सौम्यग्रहो लग्नं केंद्रस्थो यदि वीक्षते ॥ तदा निहंत्यनिष्टानि तमः सूर्योदयो यथा ॥७९॥ वंध्यानारी पुमान्वंध्यो मृत्यौ स्वर्भानुभानुजौ ॥ मृत्युस्थाः स्युर्यदा पापा मृत्युं दातुं गतास्तदा ॥८०॥ अग्रे जातं रविर्हन्यात्पृष्ठे जातं शनैश्चरः ॥ जातं जातं कुजो हन्यात्सहजस्थानसंस्थितः ॥८१॥ चतुः केंद्रगताः सौम्याः पापा द्वादशषष्ठगाः॥ भवेत्स राजविख्यातो लब्धच्छत्रो विभूषितः ॥८२॥ लग्नात्तु पंचमस्थाने यदा सूर्यबृहस्पती ॥ तदा विद्याधनैः पूर्णो जायते जातकोत्तमः ॥८३॥ एकोपि यदि केंद्रस्थो बुधो जीवो बली भृगुः ॥ जायतेऽत्र तदा बालो धनाढ्यो वेदपारगः ॥८४॥ द्वित्रसौम्याः खगा नीचा व्ययभावेऽथवा पुनः ॥ भवंति धनिनः षष्ठे निधने चैव भिक्षुकाः ॥८५॥ नीचस्थितो जन्मनि यो ग्रहःस्यात्तद्राशिना थोथ तदुच्चनाथः ॥ भवेस्त्रिकोणे यदि केंद्रवर्त्ती राजा भवेद्धार्मिकचक्रवर्त्ती ॥८६॥ षष्ठे क्रूरे नरो जातः शत्रुपक्षविमर्दकः ॥ षष्ठे सौम्ये सदा रोगी षष्ठे चंद्रस्तु मृत्युदः ॥८७॥ लग्नात्तृतीयभवने यदि चंद्रसुतो भवेत् ॥ द्वौ पुत्रौ कन्यकास्तिस्रो जायंते नात्र संशयः ॥८८॥ लग्नात्ततीयभवने बली वाचस्पतिर्यदा पञ्चपुत्रास्तदा तस्य जायंते मानवस्य वै ॥८९॥ लग्नात्तृतीयभवने शनिचंद्रौ यदा स्थितौ ॥ श्यामवर्णस्तदा बालो भ्रातृहीनश्च जायते ॥९०॥ लग्नात्तृतीयभवने बली शुक्रो यदा भवेत् ॥ कन्या द्वयं त्रयः पुत्रा जायंते तस्य निश्चितम् ॥९१॥ लग्नात्तृतीयभवने राहुयुक्तो यदा शशी ॥ भ्रातृहीनो भवेद्बालो लक्ष्मीवानपि जायते ॥९२॥ लग्नात्तृतीयभवने पञ्चमे वा धरासुतः ॥ म्रियते पुत्रदुःखेन नारी वा पुरुषोपि वा ॥९३॥ लग्नात्सप्तमगेहस्थो बली शुक्रो यदा भवेत् ॥ कन्याद्वय त्रयः पुत्रा धनवन्तो भवंति हि ॥९४॥ सिंहलग्ने यदा शुक्रो शनिर्वापि व्यवस्थितः ॥ तत्र जातस्य बालस्य नेत्रनाशः प्रजायते ॥९५॥ सूर्योष्टमे रिपौ चंद्रो धने भौमो व्यये शनिः ॥ ग्रहदोषेण नेत्राणामंधतां जनयत्यमी ॥९६॥ शुभ वर्गोत्तमे जन्म व्ययस्थाने च सद्ग्रहे ॥ अशून्येषु च केन्द्रेषु कारकाख्यग्रहेषु च ॥९७॥ सूर्ये केन्द्रे राजसेवी वैश्यवृत्तिर्निशाकरे ॥ शस्त्रवृत्तिः कुजे शूरो बुधे चाध्यापको भवेत् ॥९८॥ स्वानुष्ठानरतो नित्यं दिव्यबुद्धिर्नरो गुरौ ॥ शुक्र विद्यार्थसंपन्नो नीचसेवी शनैश्चरे ॥९९॥

जन क्रमसे अर्थी, भोगी, धनी, नायक मांडलिक, राजा, तथा चक्रवर्त्ती राजा होता है

तीन स्वस्थ (पूर्ण बलवाले) ग्रहोंसे मंत्री हो, तीन उच्च ग्रहोंसे राजा हो ॥१८॥ तीन नीच ग्रहों से दास हो, तीन ग्रह अस्त होवें तो मूर्ख होता है, उदय हुआ अपने घरमें स्थित वा मित्र घरमें स्थित ॥१९॥ वा मित्र वर्गमें स्थित, मित्रसे दृष्ट ऐसा ग्रह सबल कहा है और बली स्वामीसे दृष्ट अथवा सबल ग्रहों करके दृष्ट ॥२०॥ और पापों करके नहीं दृष्ट, नहीं युक्त भाव (घर) सबल है, दममें बुध सूर्य हों, छठे घरमें मंगल राहु होवे ॥२१॥ ऐसे राजयोगमें जन्मनेवाला जन नायक (राजा या मंत्री) होता है, पहिले आदिमें बृहस्पति अंतमें शनि हो, और अन्य ग्रह मध्यमें होवें (इस प्रकार जन्म-कुण्डलीमें ग्रह हो तो) ॥२२॥ राजयोग जानना वह नर कुटुंब और बलसे युक्त रहता है। तीसरे घर गुरु हो आठवें शुक्र हो ॥२३॥ अन्य ग्रह निरन्तर मध्यमें हों तो वह निश्चय राजा होता है, गुरु वृषका हो चंद्रमा मिथुनका हो मंगल मकरका हो ॥२४॥ सिंहपर शनि हो कन्यापर बुध सूर्य हों तुलापर शुक्र हो यह राजयोग होता है ॥२५॥ इस योगमें उत्पन्न होनेवाला नर महान् राजा होता है जो वह नर आठवें वा बारहवें वर्ष तक जीता रहे तो ॥२६॥ संपूर्ण पृथ्वीभरका (विश्वपालक) राजा हो, जो एक बृहस्पति लग्नमें हो तो सबही योग शुभदायक हैं ॥२७॥ दीर्घ आयुवाला, महामान्य योद्धाओंका नायक होता है, धनु राशिपर मंगल और शुक्र हो मीनपर बृहस्पति तुलापर बुध होवे ॥२८॥ शनि और चंद्रमा नीच राशिके हों तो धनहीन राजा हो दाता भोक्ता, विख्यात, मान्य, मंडलनायक (पति) होता है ॥२९॥ मीनपर शुक्र हो बुध भी १२ में हो राहु दूसरे घर हो सूर्य लग्नमें हो मंगल ३ घरमें हो इस योगमें जन्मनेवाला राजा होता है ॥३०॥ तीसरे घर बृहस्पति हो ग्यारहवें चंद्रमा हो वह राजमध्यमें विख्यात, कुलका दीपक (प्रकाशक) राजा हो ॥३१॥ शुभग्रह शुभग्रहोंके क्षेत्रमें हों अथवा केंद्रमें होवें तो वह बालक शुभ उत्तम कर्म करता है ॥३२॥ शुभग्रह उच्च राशिके हों अथवा केंद्रघरमें हों उस मनुष्यको निश्चय राज्य होगा और अपने कुलके जनोंको पालनेवाला होगा ॥३३॥ दूसरे बारहवें और लग्नमें, सातवेंमें ग्रह हों (कोई घर खाली न हो) तो छत्रयोग जानना इसमें जन्मनेवाला वंशका नायक (राजासदृश) होता है ॥३४॥ सूर्यसहित अथवा चंद्रमासहित हुए चार ग्रह जिस किसी घरमें पड़े हों तो यह माला-नामक योग कहलाता है, राज्यको देनेवाला और धनको देनेवाला कहा है ॥३५॥ बृहस्पति अपने क्षेत्रमें हो बुध और शनि अपनी २ राशिपर हों इस योगमें जन्मनेवाला जन दीर्घ आयुवाला और लक्ष्मीवान् होता है ॥३६॥ मीन राशिपर बृहस्पति, शुक्र, चंद्रमा हों तब जन्मनेवालेको राज्य हो बहुत पुत्रोंवाली स्त्री हो ॥३७॥ पांचवें बृहस्पति हो दशवें चंद्रमा हो तो वह महाबुद्धिमान् तपस्वी जितेंद्रिय हो ॥३८॥ सिंहपर बृहस्पति हो तुला, कर्क, धन, मकर इनपर अन्य ग्रह हों तब जन्मनेवाला नर देशभोगी (राजा) होता है ॥३९॥ तुला, धन, मीन इनपर स्थित हुआ शनि लग्नमें बैठा हो तो राजा होता है. जो अन्य राशिका शनि लग्नमें हो तो आयुहीन हो ॥४०॥ पांचवें घरमें बुध हो दशवें घरमें चंद्रमा हो नवमें घर अन्य सौम्य ग्रह हों इस योगमें जन्मनेवाला राजा होता है ॥४१॥ मकर, धन, मीन, वृष, मिथुन, मेष इन राशियोंपर सब ग्रह होवें तो जन्मनेवाला नर विख्यात राजा होता है ॥४२॥ बुध, शुक्र, बृहस्पति और शनि इन ग्रहों करके युक्त हुआ राहु केंद्रस्थानमें बैठा हो तो धन, आरोग्य, पुत्रप्राप्ति, मानकी प्राप्ति, और घरकी

प्राप्ति होती है ।।४३।। चौथे घरमें शुक्र हो और बृहस्पति चंद्रमा मंगल ये ग्रह सूर्य वा शनि करके युक्त होवें तो जन्मनेवाला जन निश्चय राजा हो ।।४४।। आठवें बारहवें घर क्रूरग्रह हो और दशवें घरमें क्रूर, सौम्य दोनों प्रकारके ग्रह हों तो इस योगमें जन्मनेवाला नर राजा हो और चालीस वर्षतक जीवे ।।४५।। लग्नमें शनि और चंद्रमा हों त्रिकोण (५।९) में बृहस्पति और शुक्र होवें दशवें घरमें मंगल हो तो जन्मनेवाला नर राजा होता है ।।४६।। अपने घरका होके जो सूर्य नवमें हो तो उसके भाई नहीं जीवे जो एक भी कोई भाई रहे तो वह राजाके समान होवे ।।४७।। दूजे, तीसरे चौथे, पांचवें, छठे, दशवें घरोंमें जो ग्रह होवें तो राजयोग होता है जन्मनेवाला जन राजा होवे ।।४८।। लग्नमें पापग्रह हों बारहवें पापग्रह हों दूसरे शुभग्रह हों सातवें घर क्रूरग्रह हो तो कुलको नष्ट करनेवाला होता है ।।४९।। लग्नमें क्रूरग्रह हो बारहवें शुभग्रह हो और दूसरे घर क्रूरग्रह हो यह राजयोग है परंतु इसमें जन्मनेवाला धनहीन दरिद्री होता है ।।५०।। धनका शनि और चंद्रमा हो मेषका बृहस्पति हो दशवें राहु शुक्र हो इस राजयोगमें जन्मनेवाला राजा होता है ।।५१।। सिंहका बृहस्पति हो, कन्याका शुक्र हो, मिथुनका शनि हो, अपने क्षेत्रका होके चौथे घरमें मंगल हो तो वह नर (नायक) राजा होता है ।।५२।। शनि चंद्रमा कन्याके हों सिंहपर बृहस्पति कुंभपर राहु हो मकरका मंगल हो तो जन्मनेवाला नर संसारका पालक (राजा) होता है ।।५३।। शुक्र, बृहस्पति, सूर्य, मंगल ये ग्रह धन, मकर, कुंभ, मीन इन राशियोंपर यथा क्रमसे होवें तो जन्मनेवाला नर बीस वर्षका होके सब काम करनेलायक होता है ।।५४।। चार केंद्र १–४–७–१० स्थानोंमें शुभ और पापग्रह स्थित हों यह चतुस्सागर योग है राज्य और धनको देनेवाला है ।।५५।। बृहस्पतिसे युक्त कर्क लग्न हो, ग्यारहवें घर चन्द्रमा, बुध, शुक्र हों मेषका सूर्य हो तो जन्मनेवाला, नर विश्वपालक राजा होता है ।।५६।। दशवें घरमें बृहस्पति, बुध शुक्र, चंद्रमा बैठे हों तो जन्मनेवाला नर सब कार्योंको सिद्ध करनेवाला और राजाओंमें मान्य होता है ।।५७।। छठें, आठवें, पांचवें नवमें; बारहवें घर शुभग्रह और क्रूर ग्रह होवें तो वह राजाओंमें मान्य (पूजित) हो तथा कष्टयुक्त रहे ।।५८।। और पांचवें, छठें, आठवें, नवमें घर क्रमसे मङ्गल, राहु, शुक्र सूर्य होवें तो जन्मनेवाला नर कुलका दीपक (प्रकाशक) होता है ।।५९।। लग्नमें शनि हो अथवा चंद्रमा हो, आठवें शुक्र हो तो जन्मनेवाला नर राजा हो मानी और सदा अपनी स्त्रीसे रमण करनेवाला हो ।।६०।। मिथुनका राहु हो, सिंहका मंगल हो, इस योगमें जन्मनेवाला राजा पिताके संपूर्ण द्रव्यको प्राप्त होवे ।।६१।। जिसके धन राशिके अर्थ भागमें चंद्रमा करके युक्त हुआ सूर्य बैठा हो, लग्नमें सबल (वलिष्ठ) शनि हो, मकरका मंगल हो ।।६२।। इस योगमें जन्मनेवाला नर महान् राजा होता है इसके प्रतापसे अन्य राजालोग दूरसेही इसके चरणोंमें प्रणाम करैं ।।६३।। उच्चका अभिलाषी (होनेवाला) सूर्य त्रिकोण (५–९) में स्थित हो तो नीच कुलमें जन्मनेवाला नर भी धनवान् राजा हो ।।६४।। ग्यारहवें अथवा दशवें घर अथवा लग्नमेंही वा लग्नमेंके सम्मुख ७ सातवें घरमें सब ग्रह कारक कहलाते हैं ।।६५।। इस कारकयोगमें उत्पन्न हुआ नीच (कंगाल) भी राज्यपदवी पावै राजकुलका बालक तो अवश्य राजा हो इसमें संदेह नहीं है ।।६६।। लग्नसे अथवा अन्य घरसे क्रम करके सब ग्रह निरंतर पड़ते गये हों अर्थात् बीचमें कोई घर खाली नहीं रहा हो तो

एकावली नामका योग होता है इस एकावली योगमें जन्मनेवाला नर राजा होता है ।।६७।। द्वितीय भवनमें शुक्र हो, दशवें घर बृहस्पति हो, छठें आठवें घर में राहु होवे, तो जन्मनेवाला नर पराक्रमी राजा होता है ।।६८।। पाप अथवा शुभ चार ग्रह । (३–५–९–१–२) इन घरोंमेंसे किसी एक घरमें इकट्ठे होके बैठे होवें तो यह राजयोग होता है ।।६९।। त्रिकोण (५–९) में सातवें लग्नमें सब ग्रह होवें तो यह हंसयोग होता है इसमें जन्मनेवाला अपने वंशके जनोंका पालक होता है ।।७०।। वृश्चिक राशि विना अन्य किसी राशिका चंद्रमा सब ग्रहों करके देखा जाता हो, छठें, आठवें या सातवें घरमें स्थित हो, तो जन्मनेवाला नर दीर्घ आयुवाला राजा होता है ।।७१।। छठें, आठवें, बारहवें, दूसरे घरमें ग्रह होवें तो यह सिंहासन योग होता है इसमें जन्मनेवाला नर राजगद्दी पर बैठता है ।।७२।। लग्नमें शुक्र बुध नहीं हों, केंद्रमें बृहस्पति नहीं हो, दशवें घर मंगल नहीं हो वह नर जन्म लेकर क्या करेगा ।।७३।। आठवें घर क्रूर ग्रह हों और सौम्य ग्रह लग्नमें स्थित हों ऐसे इस ध्वजयोगमें जन्मनेवाला नर नायक (प्रभु) होता है ।।७४।। छठे घरमें पापग्रह हों, केंद्रमें शुभग्रह हों उसकी सब सिद्धि होवे राजासे मान्य हो ।।७५।। मेष लग्नमें सूर्य हो चौथे बृहस्पति हो, दशवें मंगल हो तो विश्वका पति राजा हो ।।७६।। लग्नमें शनि वा चंद्रमा हो, त्रिकोण (५–९) में बृहस्पति, सूर्य हो, दशवें घर मंगल हो यह, राजयोग कहलाता है ।।७७।। उच्च राशिके शुभग्रह केंद्रमें होवें तो राज्य वा लक्ष्मी-का पति होता है, उच्च राशिके पापग्रह केंद्रमें बैठे हों तो राजा (धनहीन) होवे विशेष खजाना न हो ।।७८।। बली शुभग्रह केंद्रमें बैठा हो और लग्नको देखता हो तो संपूर्ण अरिष्ट (रोग) ऐसे दूर हों जैसे सूर्योदयसे अंधेरा दूर होता है ।।७९।। आठवें घरमें राहु और शनि होवें तो स्त्री वंध्या हो और पुरुष वंध्य हो, जो आठवें घरमें अन्य ग्रह हो तो मृत्यु हो ।।८०।। तीसरे घरमें सूर्य हो तो बडे भाईको मारै। शनि हो तो छोटे भाईको मारै, मंगल हो तो जन्मे २ हुए सब भाइयोंको मारै ।।८१।। चारों केंद्र स्थानोंमें शुभग्रह हों, पापग्रह बारहवें और छठे घरमें हों तो विख्यात छत्रपति राजा हो ।।८२।। लग्नसे पांचवें घरमें सूर्य और बृस्पति हों तो विद्या और धनों करके परिपूर्ण उत्तम नर हो ।।८३।। बुध, बृहस्पति और शुक्र इनमेंसे जो एक भी केंद्रमें हो तो जन्मनेवाला धनाढ्य वेदपाठी होता है ।।८४।। दो या तीन शुभग्रह नीच राशिके हों, अथवा बारहवें घरमें स्थित होवें, अथवा छठे आठवें घरमें स्थित होवें तो धनी लोग भी भिक्षुक भिखारी) हो जावें ।।८५।। जन्म समयमें जो ग्रह नीच राशिका हो उस ग्रहके राशिका स्वामी या उच्च राशिका स्वामी यदि त्रिकोण (५–९) में अथवा केंद्रमें बैठा हो तो वह नर धार्मिक चक्रवर्ती राजा हो ।।८६।। जिसके छठें घरमें क्रूर ग्रह हों वह नर शत्रुको नष्ट करनेवाला हो, छठे घरमें शुभग्रह हों तो सदा रोगी रहै, ६ में चंद्रमा हो तो मृत्यु होवे ।।८७।। लग्नसे तीसरे घर बली बुध बैठा हो तो उस मनुष्यके दो पुत्र होवे और तीन कन्या हों इसमें संदेह नहीं ।।८८।। लग्नसे तीसरे घरमें बली वृहस्पति हो तो उस मनुष्यके पांच पुत्र होवेंगे ।।८९।। लग्नसे तीसरे घर शनि और चंद्रमा हो तो वह बालक श्याम-वर्ण और भाईसे रहित होवे ।।९०।। लग्नसे तीसरे घरमें बली शुक्र हो तो दो कन्या हो और तीन पुत्र होंगे यह निश्चय जानो ।।९१।। लग्नसे तीसरे घरमें राहुयुक्त चंद्रमा होवे तो वह बालक भाईसे रहित और लक्ष्मीवान् होता है ।।९२।। लग्नसे तीसरे वा

पांचवें मंगल होवे तो वह स्त्री या पुरुष पुत्रके दुःखसे मरता है ॥९३॥ लग्नसे सातवें घर बली शुक्र बैठा हो तो दो कन्या होंगी तीन पुत्र होंगे और धन होगा ॥९४॥ सिंह लग्न हो तहां शुक्र बैठा हो, अथवा शनि बैठा हो तो जन्मनेवाले बालकके नेत्र नष्ट होते हैं ॥९५॥ सूर्य आठवें हो छठे घर चंद्रमा हो दूसरे घरमें मंगल हो बारहवें घरमें शनी हो तो ग्रहोंके दोषसे वह नर अंधा होता है ॥९६॥ शुभ वर्गोत्तम लग्नमें जन्म हो, बारहवें घरमें शुभग्रह हो. अशून्य केंद्र अर्थात् केन्द्र स्थान ग्रहोंसे भरे हों कारक ग्रह हों यह राजयोग है ॥९७॥ केंद्रमें सूर्य हो तो राजसेवी (मंत्री) हो, चंद्रमा केंद्रमें हो तो वैश्यकी वृत्ति करै, मंगल हो तो शूर वीर शस्त्रवृत्ति करनेवाला हो, बुध हो तो पढ़ानेवाला होवे ॥९८॥ बृहस्पति हो तो धर्म यज्ञादि करनेवाला दिव्य बुद्धिवाला हो, शुक्र हो तो विद्या और लक्ष्मीवाला हो शनि हो तो नीचकी सेवा करे ॥९९॥ इति राजयोग।

अथ स्त्रीराजयोगः

केन्द्रे च सौम्या यदि पृष्ठभाजः पापाः कलत्रे च मनुष्यराशौ ॥ राज्ञी भवेत्स्त्री बहुकोशयुक्ता नित्यं प्रशांता च सुपुत्रिणी च ॥१००॥ बुधे विलग्ने यदि तुंगसंस्थे लाभस्थितो देवपुरोहितश्च ॥ नरेन्द्रपत्नी वनिताप्रसंगे तदा प्रसिद्धा भवतीह भूमौ ॥१॥ एकोपि जीवो रसवर्ग ६ शुद्धः केंद्रे यदा चंद्रनिरीक्षितश्च ॥ राज्ञी भवेत्स्त्री सधना सपुत्रा रूपान्विता पीननितम्बबिंबा ॥२॥ कर्कोदये सप्तमगे पतंगे जीवेन दृष्टे परिपूर्णदेहा ॥ विद्याधरी चात्र भवेत्प्रधाना राज्ञी गतारिर्बहुपुत्रपौत्रा ॥३॥ षड्वर्गशुद्धैस्त्रिभिरेव राज्ञी चतुर्भिरंशैश्च तथैव पत्नी ॥ पंचादिभिर्दिव्यविमानभाजा त्रैलोक्यनाथप्रमदा तदा स्यात् ॥४॥ लाभस्थितः शीतकरो भृगुश्च कलत्रगः सोमसुतेन युक्तः ॥ जीवेन दृष्टो भवतीह राज्ञी ख्याता धरायां सकलैः स्तुता च ॥५॥ स्त्रीपुंसयोः फलं तुल्यं जातके किन्तु सप्तमे ॥ सौभाग्यं चन्द्रलग्नाभ्यां वपुराकृतिरुच्यते ॥६॥

जिस स्त्रीके केंद्रमें शुभग्रह षष्ठोदय संज्ञक राशिके हों और पापग्रह मनुष्य राशिके होके सातवें ७ हों तो वह बहुत खजानावाली रानी हो नित्य शांत स्वरूप बहुत पुत्रोंवाली हो ॥१००॥ उच्चका बुध लग्नमें हो, बृहस्पति ग्यारहवें घरमें हो तो वह स्त्री राजाकी रानी हो पृथ्वीपर विख्यात होवे ॥१॥ एक भी बृहस्पति षड्वर्ग शुद्ध (बालपाके) केंद्रमें हो चंद्रमा करके देखा जाता हो तो वह स्त्री धनाढय रानी होती है पुत्रवती रूपवती स्थूल नितंबोंवाली हो ॥२॥ कर्क लग्न हो, सातवें सूर्य हो बृहस्पतिसे देखा जाता हो तो परिपूर्ण उत्तम शरीरवाली विद्याधरी बहुत पुत्रोंवाली प्रधान रानी हो ॥३॥ षड्वर्गमें शुद्ध हुए तीन ग्रहों करके रानी हो, चार अथवा पांच ग्रहोंकरके दिव्य (विमान) सवारीमें बैठनेवाली त्रैलोक्यपति राजाकी रानी हो ॥ ग्यारहवें घर चंद्रमा हो, बुधयुक्त

शुक्र सातवें घर हो, बृहस्पतिसे देखा जाता हो तो पृथ्वीपर सबसे स्तुत रानी हो ।।५।। सातवें घरके ग्रहसे स्त्री पुरुषोंका फल समान है, चंद्रमा और लग्नसे सौभाग्य और शरीरकी आकृति कहना ।।६।।

अथ शुभाशुभयोगाः

कर्मस्थाने च लग्ने वा भौमशुक्रबुधैर्युतः ।। यदि राहुर्भवेत्तस्य क्षणे वृद्धिः क्षणे क्षयः ।।७।। होरायां द्वादशे राशौ स्थितो यदि दिवाकरः ।। करोति पक्षिणे काणं वामनेत्रे च चंद्रमाः ।।८।। भौमक्षेत्रे यदा जीवो जीवक्षेत्रे भृगोः सुतः ।। द्वादशे वत्सरे मृत्युर्बालकस्य न संशयः ।।९।। धनस्थाने यदा भौमः शनैश्चरसमन्वितः ।। सहजे च भवेद्राहुर्भ्राता तस्य न जीवति ।।११०।। चतुर्थे च यदा राहुः षष्ठे चन्द्रोऽष्टमेऽपि वा ।। सद्य एव भवेन्मृत्युः शंकरो यदि रक्षिता ।।११।। अष्टमस्थो निशानाथः केन्द्रे पापेन संयुतः ।। चतुर्थे च यदा राहुर्वर्षमेकं स जीवति ।।१२।। पाताले चांबरे पापो द्वादशे च यदा स्थितः ।। पितरं मातरं हंति देशाद्देशांतरं व्रजेत् ।।१३।। पंचमस्थोनिशानाथस्त्रिकोणे च बृहस्पतिः ।। दशमे च महीसूनुः परमायुः स जीवति ।।१४।। धनस्थाने यदा शुक्रः क्रूरग्रहसमन्वितः ।। न पश्यति निजक्षेत्रमल्पपुत्रस्तदा भवेत् ।।१५।। धनस्थाने यदा क्रूरः सहजे सप्तमे तथा ।। पंचमे भवने जीवो नीच जातस्तदा भवेत् ।।१६।। नवमे पंचमस्थाने चतुर्थे च यदा ग्रहाः ।। आदौ जातश्च नष्टः स्यात्पश्चाज्जातः स जीवति।।१७।। विवाहितायामन्यस्यामेकः पुत्रो भवेत्तदा।। विख्यातो भुवने त्यागी स दीर्घायुर्महामतिः ।।१८।। लग्ने धने व्यये क्रूरो यदा मृत्यौ च जायते।। विष्ठया मार्गणंधोऽस्य द्वादशाष्टमवासरे ।।१९।। षष्ठे च भवने भौमः सप्तमे सिंहिकासुतः।। अष्टमे च यदा सौरिर्भार्या तस्य न जीवति ।।१२०।। तिथिप्रतिदिनांते च लग्नस्यांते च भांतके ।। चरांशे च यदा जातः सोन्यजातः शिशुर्भवेत् ।।२१।। स्वक्षेत्रस्थो यदा भौमः कर्मस्थानं निरीक्षते ।। बुधभार्गवसंयुक्तः स्वल्पकर्मफलप्रदः ।।२२।। रिपुस्थाने यदा चंद्रो लग्नस्थाने शनैश्चरः ।। कुजश्च सप्तमस्थाने पिता तस्य न जीवति ।।२३।। एकादशे यदा क्रूरः पंचमे चंद्रभार्गवौ ।। प्रथमं कन्यकाजन्म माता तस्य सकष्टका ।।२४।। सहजस्थो यदा राहुर्धनस्थाने बृहस्पतिः।। बुधेन च समायुक्तस्तस्य बंधुत्रयं भवेत् ।।२५।। चापे सूर्यःशनिः कुंभे मेषे भवति चंद्रमाः।। मकरे च यदा शुक्रो भुंक्ते नैव पितुर्धनम् ।।२६।। क्रूराश्चतुर्षु केंद्रेषु तथा क्रूरो धनेपि वा ।। दारिद्र्ययोगं जानीयात्स्ववंशस्य क्षयंकरः ।।२७।। लग्नस्थाने यदा जीवो धनस्थाने शनैश्चरः ।। राहुश्च सहजस्थाने माता तस्य न जीवति ।।२८।। सप्तमे भवने भौमश्चाष्टमे भार्गवो यदा ।। नवमे भवने सूर्यः स्वल्पायुस्तस्य जायते ।।२९।। राहुजीवौ रिपुक्षेत्रे लग्ने वाथ चतुर्थगौ ।। त्रयोविंशे तदा वर्षे पुत्रस्तातं विनाशयेत् ।।३०।। बालस्य जन्मकाले चेदष्टमस्थः शनैश्चरः ।।

बालकश्च भवेत्कुष्ठी मासे मृत्युर्न संशयः ॥३१॥ क्रूरैर्दृष्टो जन्मलग्नात्षष्ठे वा चाष्टमे बुधः ॥ चतुर्थाब्दे भवेन्मृत्युः शंकरो यदि रक्षति ॥३२॥ अष्टमस्थो यदा भौमस्त्रिकोणे नीचगो रविः ॥ स शीघ्रमेव जातः स्याद्भिक्षाजीवी च दुःखितः ॥३३॥ सिंहे भौमस्तुले सौरिःकन्यायां च यदा सितः ॥ मिथुने च यदा राहुर्जननी तस्य नश्यति ॥३४॥ लग्ने क्रूरः स्वभवने क्रूरः पातालगो यदा ॥ दशमे भवने क्रूरः कष्टं जीवति बालकः ॥३५॥ अष्टमे च निशानाथः केंद्रे क्रूरो यदा भवेत् ॥ चतुर्थे च यदा राहुर्वर्षमेकं स जीवति ॥३६॥ शुभग्रहावलोकैश्च यदि जीवति जातकः ॥ स च दुष्टस्वभावः स्यात्क्रूरकर्मकरोपिच ॥३७॥ लग्ने चंद्रो धने शुक्रो व्यये च बुधभास्करौ ॥ राहुश्च पञ्चमेबालः स भवेद्वधबन्धकृत् ॥३८॥ सप्तमे भवने भानुर्मध्यस्थो भूमिनंदनः॥ राहुश्चांत्ये च तस्यैव पिता कष्टेन जीवति॥३९॥ स्मरे व्यये च सहजे मध्ये १० क्रूरा यदा ग्रहाः॥ तदा जातस्य बालस्य शरीरे कष्ट-मादिशेत् ॥१४०॥ कन्यायां च यदा राहुः शुक्रो भौमः शनिस्तथा ॥ जायते तत्र जातस्य कुबेरादधिकं धनम् ॥४१॥ धने राहुर्बुधः शुक्रः सौरिः सूर्यो यदा स्थिताः । तस्य मातुर्भवेन्मृत्युर्मृते पितरि जायते ॥४२॥ रविराहू सौरिसौम्यजीवा लग्नेऽथ पञ्चमे॥ अत्रयोगे च यो जातो जातमात्रं स नश्यति॥४३॥ जीवार्कराहुभौमाश्च चत्वारःक्रूरवर्गगाः॥ सप्तमे च गृहे शुक्रो देहे कष्टं सदा भवेत् ॥४४॥ क्रूरलग्ने यदा जातस्तत्स्वामी क्रूरसंयुतः॥ आमवातो भवेत्तस्य शरीरे कष्टमादिशेत् ॥४५॥ गुह्यस्थाने यदा भौमो राहुः सौरिसमन्वितः॥नृपपीडा भवेत्तस्य स्वासने नैव तिष्ठति ॥४६॥ सहजे सहजाधीशो लग्ने पुत्रे धनेपि वा ॥ जायते च यदा बालो यदि जातो न जीवति ॥४७॥ कन्यायां मिथुने राहुः केंद्रे षष्ठे व्यये भवेत् ॥ त्रिकोणे वा यदा जातो दाता भोक्ता निरामयः॥४८॥ चतुर्थे राहुसौरार्काः षष्ठे चन्द्रो बुधः कुजः॥ भार्गवश्चात्र यो जातः स गृहस्य क्षयंकरः ॥४९॥ एकः पापोऽष्टमस्थाने शत्रुक्षेत्रे यदा भवेत् ॥ पापेन वीक्षितो वर्षान्मारयत्येव बालकम् ॥५०॥ भौमभास्कर-मंदाश्चशत्रुक्षेत्रेऽष्टमेयदा ॥ शिवेन रक्षितोऽप्येवं वर्षमात्रं न जीवति ॥५१॥ वक्रीशनिर्भौमगेहे केन्द्रे षष्ठेऽष्टमेपि वा ॥ कुजेन बलिना दृष्टो हंति वर्षद्वये शिशुम् ॥५२॥ राहौ वृषे त्रिभिर्दृष्टे केतुदृष्टे चतुष्टये ॥ दृष्टे च गुरुशुक्राभ्यां दीर्घकालं स जीवति॥५३॥ चंद्रमंगलसंयोगो जन्मकाले यदा भवेत्॥ तस्य जातस्य गेहं तु लक्ष्मीर्नैव विमुंचति ॥५४॥ मारयति षोडशाहाच्छनैश्चरः पापवीक्षितः केंद्रे ॥ षड्भिर्मासैर्भौमो वर्षाद्वा रविस्तु मारयति ॥५५॥ षष्ठाष्टमगश्चंद्रः सद्यो मरणाय पापसंदृष्टः ॥ अष्टाभिः शुभदृष्टो वर्षैर्मिश्रैस्तदर्द्धेन ॥५६॥ शुक्लपक्षे निशायां च कृष्णे जातो दिवा यदा ॥ षष्ठाष्टमगतश्चंद्रो न शिशुं हंति मातृवत् ॥५७॥ शनिराहुकुजैर्युक्तः सप्तमे नवमे शशी ॥ सप्तमे दिवसे हंति मासे वा

सप्तमे शिशुम् ।।५८।। पुत्रे कलत्रे लग्ने च व्यये पापयुतः शशी ।। शिशुं हंति न दृष्टश्चेद्बलवद्भिः शुभग्रहैः ।।५९।। चंद्रः पापसमायुक्तश्चंद्रो वा पापमध्यगः ।। चंद्रात्सप्तमगः पापस्तदा मातृवधो भवेत् ।।१६०।। लग्नस्थश्च यदा भानुः पंचमस्थो निशाकरः ।। अष्टमस्थायदापापास्तदा जातो न जीवति ।।६१।। लग्नं पापेन संयुक्तं लग्नं वा पापमध्यगम् । लग्नात्सप्तमगाः पापास्तदा मातृवधो भवेत् ।।६२।। सूर्यः पापेन संयुक्तः सूर्यो वा पापमध्यगः ।। सूर्यात्सप्तमगः पापस्तदा पितृवधो भवेत् ।।६३।। क्रूरक्षेत्रे यदा जातो लग्नेशोऽस्तं गतो भवेत् ।। अपकर्मा तदा जातः सप्त-वर्षाणि जीवति ।।६४।। अष्टमे च यदा सौरिर्जन्मस्थाने च चंद्रमाः ।। मंदाग्न्यु-दररोगी च गात्रहीनश्च जायते ।।६५।। शनिक्षेत्रे यदा भानुर्भानुक्षेत्रे यदा शनिः ।। द्वादशे वत्सरे मृत्युस्तस्य जातस्य जायते ।।६६।। बुधभौमौ यदा लग्ने षष्ठस्थाने च तिष्ठतः ।। तस्करो घोरकर्मा च हस्तपादौ विनश्यतः ।।६७।। षष्ठेऽष्टमे च मूर्तौ च शत्रुक्षेत्रे यदा बुधः।। चतुर्वर्षे भवेन्मृत्युर्बालकस्य न संशयः।। ।।६८।। अष्टमस्थो यदा राहुः केन्द्रस्थाने च चंद्रमाः ।।सद्य एव भवेन्मृत्युर्बालकस्य न संशयः ।।६९।। सप्तमे नवमे राहुः शत्रुक्षेत्रे यदा भवेत्।। प्राप्ते च षोडशे वर्षे तस्य मृत्युर्न संशयः।।१७०।। द्वादशस्थो यदा चंद्रः पापः स्यादष्टमे गृहे।। एकमासे भवेन्मृत्युर्बालकस्य च निश्चितम् ।।७१।। जन्मस्थाने यदा राहुः षष्ठस्थाने च चंद्रमाः ।। अपस्मारी तदा बालो जायते नात्र संशयः ।।७२।। भार्गवेण, युतश्चंद्रः षष्ठाष्टमगतो यदा ।। मंदाग्न्युदररोगी च हीनांगोऽपि प्रजायते ।।७३।। लग्नेव्यये च पाताले जामित्रे चाष्टमे कुजे ।। स्त्रियं हरति भर्त्ता च पतिं भार्या विनाशयेत् ।। ।।७४।। षष्ठेऽष्टमे यदा चंद्रो बुधयुक्तस्तु तिष्ठति ।। विषदोषेण बालस्य तदामृत्युश्च जायते ।।७५।। भानुना संयुतश्चंद्रः षष्ठाष्टमगतो यदा ।। राजदोषेण मृत्युर्वा सिंहदोषेण वा भवेत् ।।७६।। एकोपि यदि मूर्तौ स्याज्जन्मकाले दिवाकरः ।। स्थानहीनो भवेद्बालः शोकसन्तापपीडितः ।।७७।। दशमस्थो यदा भौमः शत्रुक्षेत्रस्थितो भवेत् ।। म्रियते तस्य बालस्य पिता शीघ्रं न संशयः ।। ।।७८।। लग्नेऽष्टमे यदा राहुश्चंद्रयुक्तः स्थितो भवेत् ।। दशाहे जायते तस्य बालस्य मरणं ध्रुवम् ।।७९।। लग्ने जीवो धने मन्दो रविभौमबुधास्त-था ।। विवाहसमये तस्य म्रियते निश्चितं पिता ।।१८०।। शनैश्चरस्तुलाकुंभमकरे यदि जायते ।। लग्ने षष्ठे तृतीये च तदा रिष्टं न जायते ।।८१।। मीनलग्ने जीवशुक्रौ मेषेऽर्को मकरे कुजः ।। दासवंशेऽपि जातोऽसौ राजा छत्रधरो भवेत् ।। ।।८२।। लग्नाच्च नवमे सूर्ये सूर्यपुत्रे तथाऽष्टमे ।। एकादशे भार्गवे च मासमेकं न जीवति ।।८३।। धने गुरुः सैंहिकेयो भौमः शुक्रश्च सप्तमे ।। अष्टमे रविचन्द्रौ च म्लेच्छः स्याद्यौवने हि सः ।।८४।। नवमे दशमे चंद्रः सप्तमे च यदा सितः ।। पापे पाताल-संस्थे च वंशच्छेदकरो नरः ।।८५।। भ्रातृस्थाने यदा जीवो लाभस्थाने यदा शशी ।।

स लोके गृहमध्यस्थो जायते कुलदीपकः ॥८६॥ सिंहलग्ने यदा भौमः पञ्चमे च निशाकरः ॥ व्ययस्थाने यदा राहुः स जातो कुलदीपकः ॥८७॥ एकः पापो यदा लग्ने पापश्चैको रसातले ॥ जायते हि सुखी बालः स जातः कुलदीपकः ॥८८॥ लग्ने वा सप्तमेऽभौमः पंचमे च दिवाकरः॥ जीवेदरण्यमध्येऽपि विख्यातः स न संशयः ॥८९॥ भौमक्षेत्रे यदा जातो मूर्तौ क्रूरग्रहो भवेत् वर्षमध्ये भवेन्मृत्युर्बालकस्य न संशयः ॥९०॥ क्षीणचंद्रो द्वादशस्थो दुःखदः पापवीक्षितः ॥ करोति विपुलं क्लेश-मष्टमस्थो यदा शनिः ॥९१॥ द्वादशे च यदा चंद्रः षष्ठे पापग्रहो भवेत् ॥ अल्पा-युश्च सदा रोगी जायते जातको ध्रुवम् ॥९२॥ दशमे भवने राहुः पितृमात्रोः प्रपीडकः ॥ द्वादशे वत्सरे तस्य बालस्य मरणं ध्रुवम् ॥ ९३॥ शनिक्षेत्रे यदा भानुर्भानुक्षेत्रे शनैश्चरः ॥ विंशतौ वत्सरे मृत्युर्बालकस्य न संशयः ॥९४॥ रिपुः स्थाने यदा पापो व्ययस्थाने च चंद्रमाः ॥ चतुर्थो मंगलो यस्य माता तस्य न जीवति ॥९५॥ चतुर्थे मातृहा पापो दशमे पितृहा भवेत् ॥ सप्तमे भवने पापो पितृमात्रो-र्विनाशकः ॥९६॥ द्वादशे रिपुभावे वा यदा क्रूरा व्यवस्थिताः ॥ तदा मातृभयं विद्याच्चतुर्थे दशमे पितुः ॥९७॥ उच्चो वा यदि वा नीचः सप्तमस्थो यदा रविः ॥ तदा जातो निहंत्याशु मातरं नात्र संशयः ॥९८॥ नाग ८ गो ९ सिद्ध २४ जाती २२ षु ५ क्ष्मा १ ब्धि ४ नेत्र २ नखा २० धृतिः १८॥ क्ष्माशिव २१ दिक्के १० ध्वजाद्यंशे तुल्याब्दैश्च विधौ व्यसुः ॥९९॥ लग्ने शनिर्यदा भौमो राहुः सूर्यश्च संस्थितः ॥ सन्तापो रक्तदोषोऽथ सर्व-सौम्येष्वरोगिता ॥२००॥ केन्द्रे शुभो यदैकोपि बली विश्वप्रकाशकः ॥ सर्वे दोषाः क्षयं यांति दीर्घायुश्च भवेन्नरः ॥१॥ अर्कः केन्द्रे यदा चन्द्रो मित्रांशे गुरुवीक्षितः ॥ वित्तवाञ्ज्ञानसंपन्नो जायते हि तदा नरः ॥२॥

दशवें घर वा लग्नमें मंगल, शुक्र, बुध इन करके युक्त हुआ राहु होवे तो वह नर क्षणमें बढै क्षणमें घटै दुःखी सुखी है ॥ ७ ॥ जन्मकुंडलीमें बारहवीं राशि (लग्नसे बारहवें घर) सूर्य हो तो दहिनी आंखसे काणा हो, चंद्रमा हो तो बांई आंखसे काणा हो ॥ ८ ॥ मंगलके क्षेत्रमें बृहस्पति हो बृहस्पतिके क्षेत्रमें शुक्र हो तो उस बालककी मृत्यु निश्चय बारहवें वर्षमें हो ॥ ९ ॥ शनैश्चरसे युक्त मंगल दूसरे घरमें हो, तीसरे घरमें राहु हो तो उसके भाई नहीं जीते हैं ॥ १० ॥ चौथे राहु हो छठे आठवें चंद्रमा हो तो शीघ्रही मृत्यु हो जो शिवजी रक्षा करें तो भी न बचै ॥११॥ आठवें घरमें चंद्रमा हो अथवा पापग्रहसे युक्त होके केंद्रमें हो, चौथे घर राहु हो तो एक वर्ष भी नहीं जीवै ॥१२॥ चौथे घर दशवें घर और बारहवें घरमें पापग्रह स्थित हो तो उसके माता पिता नष्ट होवें देशसे कहीं विदेशमें जावे ॥१३॥ पांचवें घरमें चंद्रमा हो, त्रिकोण (९–५) में बृहस्पति हो, दशवें घरमें मंगल हो तो वह दीर्घ आयु-वाला हो ॥१४॥ दूसरे घरमें पापग्रहसे युक्त शुक्र हो और अपने घरको नहीं देखता हो

तो अल्पपुत्र हो ।।१५।। दूसरे घर क्रूर ग्रह हो तीसरे सातवें भी क्रूर ग्रह हो पांचवें बृहस्पति हो वह नीचके वीर्यसे उत्पन्न हुआ कहना ।।१६।। नवमें पांचवें चौथे घर ग्रह होवें तब पहले जन्मनेवाला मरै पीछे जन्मे वह जीवै ।।१७।। इस योगमें विवाहिता वा अन्य स्त्रीविषे जो एकही पुत्र जन्मा हो तो संसारमें विख्यात, दानी, दीर्घ आयुवाला महामति होता है ।।१८।। लग्न, दूजे २ आठवें ८ बारहवें १२ पापग्रह हो तो विष्ठा बंद होके बारहवें वा आठवें दिन मृत्यु हो जावे ।।१९।। छठे घरमें मंगल हो, सातवें राहु हो, आठवें शनि हो उसकी स्त्री नहीं जीवै ।।२०।। तिथिका अन्त, दिनका अंत, लग्नका अंत और नक्षत्रके अंतमें तथा चर नवांशकमें जन्मनेवाला बालक (पिताके विना) अन्यसे उत्पन्न हुआ जानना ।।२१।। मंगल अपने घरमें बैठा हो लग्नसे दशवें घरको देखता हो, तथा बुध शुक्रसे युक्त हो तो स्वल्पकर्मफल देनेवाला कहा है ।।२२।। छठे घरमें चन्द्रमा हो, लग्नमें शनि हो मंगल सातवें घर हो तो उसका पिता नहीं जीवै ।।२३।। ग्यारहवें क्रूर ग्रह पांचवें चंद्र और शुक्र होवें तो उस नरके पहले कन्या जन्मै और उसकी माता कष्टयुक्त रहै ।।२४।। तीसरे घर राहु हो, दूसरे घरमें बृहस्पति बुधसे युक्त हो तो उसके तीन भाई होवें ।।२५।। धनका सूर्य हो, शनि कुंभका हो, मेषका चंद्रमा,, मकरका शुक्र हो तो पिताके धनको नहीं भोगै ।।२६।। चारों केंद्रस्थानोंमें तथा दूसरे घरमें क्रूर ग्रह हों यह दारिद्रचयोग है वंशको नष्ट करनेवाला है ।।२७।। लग्नमें बृहस्पति हो, दूसरे घरमें शनि हो, राहु तीसरे घरमें हो उसकी माता नहीं जीवै ।।२८।। सातवें घरमें मंगल हो, आठवें शुक्र हो, नवमें घरमें सूर्य हो तो उस नरकी स्वल्प आयु होती है ।।२९।। राहु, बृहस्पति छठे घरमें लग्नमें वा चौथे घरमें हों तो तेईस २३ वें वर्षमें वह पुत्र पिताको नष्ट करै ।।३०।। बालकके जन्म समय आठवें घरमें शनि हो तो वह बालक कुष्ठी हो एकही महीनेमें मरै इसमें संदेह नहीं ।।३१।। जन्मलग्नसे छठे वा आठवें घरमें बुध हो क्रूर ग्रहों करके देखा गया हो तो चाहे शिवजी रक्षा करें परंतु चौथे वर्षमें मृत्यु हो ।।३२।। आठवें घरमें मंगल हो, त्रिकोण (५-९) में नीचका सूर्य हो तो शीघ्रही दुःखी हो और भिक्षाकी आजीविका करे ।।३३।। सिंहका मंगल हो, तुलाका शनि हो, कन्याका शुक्र और मिथुनका राहु हो तो उसकी माता नहीं जीवै ।।३४।। जिसके लग्नमें और दूसरे घरमें क्रूर ग्रह हो, चौथे और दशवें घरमें क्रूर ग्रह हो तो वह बालक कष्टसे जीवता है ।।३५।। आठवें घरमें चंद्रमा हो, केन्द्रमें क्रूर ग्रह हो, चौथे राहु हो तो वह बालक एक वर्षतक जीवता है ।।३६।। जो शुभ ग्रहोंकी दृष्टि हो तो वह बालक जीवता है परंतु दुष्ट स्वभाववाला तथा क्रूरकर्म करनेवाला हो ।।३७।। लग्नमें चंद्रमा हो, दूसरे घरमें शुक्र हो, बारहवें घरमें बुध और शुक्र हों, राहु पांचवें घरमें हो तो वह बालक हिंसा और बंधन कर्म करनेवाला हो ।।३८।। सातवें घरमें सूर्य हो, मंगल दशवें घरमें हो, राहु बारहवें घरमें हो तो उसका पिता कष्ट से जीवै ।।३९।। सातवां, बारहवां, तीसरा, दशवां इन घरोंमें क्रूर ग्रह होवें तो जन्मनेवाले बालकके शरीरमें कष्ट हो ।।४०।। कन्या राशिपर राहु, शुक्र, मंगल, शनि ये ग्रह हों तो जन्मनेवाले मनुष्यके कुबेरसेभी अधिक लक्ष्मी होवै ।।४१।। दूसरे घरमें राहु, बुध, शुक्र, शनि, सूर्य ये ग्रह बैठे हों तो उस नरका जन्मसे पहले पिता मरै पीछे माता भी मर जावे ।।४२।। सूर्य, राहु, शनि, बुध, बृहस्पति ये लग्नमें हों अथवा पांचवें हों तो इस योगमें जन्मनेवाला

उसी समय मर जावे ॥४३॥ बृहस्पति सूर्य राहु मंगल ये चार ग्रह क्रूर ग्रहके षड्वर्ग में प्राप्त हों, सातवें घर में शुक्र हो तो उसके शरीरमें सदा कष्ट रहै ॥४४॥ क्रूर लग्नमें जन्म हो और उस लग्नका स्वामी क्रूर ग्रहोंके साथ बैठा हो तो उसके शरीरमें आमवात रोगका कष्ट रहै ॥४५॥ सप्तम घरमें मंगल, राहु और शनि, ये सब बैठे हों तो उस बालकको राजाकी ओरसे दुःख रहै, अपने आसनपर नहीं बैठे ॥४६॥ तीसरे घरका स्वामी तीसरे वा लग्नमें वा दूसरे घरमें होवे तो उस समय जन्मनेवाला बालक नहीं जीवै ॥४७॥ कन्या अथवा मिथुन राशिका राहु केंद्रमें वा छठे ६ बारहवें १२ घरमें हों अथवा त्रिकोणमें हो तब जन्मनेवाला नर दाता भोगी और निरोगी (खुशी) रहे ॥४८॥ चौथे राहु, शनि और सूर्य हों, छठे घरमें चंद्रमा, मंगल, बुध , शुक्र ये होवें इस योगमें जन्मनेवाला नर अपने घरका नाश करै ॥४९॥ एकही पापग्रह आठवें घरमें वा छठे घरमें हो पाप ग्रहसे देखा जाता हो तो जन्मनेवाले बालकको एक वर्षमें मारे ॥५०॥ मंगल, सूर्य, शनि ये छठे आठवें घरमें हों तो शिवजीसे रक्षित किया भी वह नर एक वर्षतक नहीं जीवै ॥५१॥ वक्री शनि मंगलके घरमें हो और केंद्र छठे अथवा आठवें घरमें हों, बलिष्ठ मंगल करके देखा जाता हो तो जन्मनेवाले बालकको दो वर्षमें मार देवै ॥५२॥ वृष राशिका राहु तीन ग्रहों करके दृष्ट हो चौथे केतु करके दृष्ट हो अथवा बृहस्पति वा शुक्र करके देखा गया हो तो वह नर दीर्घकाल तक जीवै ॥५३॥ जिसके जन्मकालमें चंद्रमा और मङ्गलका संयोग हो उस बालकके घरसे लक्ष्मी कभी नहीं हटै ॥५४॥ पापग्रहसे देखा हुआ शनि केन्द्रस्थानमें बैठा हो तो सोलह दिनमें मार देवै, इसी प्रकार मंगल हो तो छह महीनोंमें मारै, सूर्य इसी प्रकार हो तो एक वर्षमें मार दे ॥५५॥ छठे आठवें घरमें चंद्रमा होकर पाप ग्रहसे देखा जाता हो तो शीघ्रही मार देवै, शुभ-ग्रहोंसे देखा गया हो तो आठवें वर्षमें, शुभाऽशुभग्रहोंसे देखा गया हो तो चौथे वर्षमें मृत्यु करै ॥५६॥ शुक्ल पक्षमें रात्रिमें और कृष्ण पक्षके दिनमें जन्म हो तो छठे आठवें घरमें बैठा हुआ चंद्रमा माताकी तरह बालकको नहीं मारै ॥५७॥ सप्तम स्थान या नवम स्थानमें शनि, राहु मङ्गलसे युक्त चंद्रमा हो तो बालक सातवें दिवस अथवा सातवें, महीनेमें मरेगा ॥५८॥ पांचवें वा सातवें तथा लग्नमें बारहवेंमें पापग्रहसे युक्त हुआ चंद्रमा हो और बलवंत शुभ ग्रहों करके नहीं देखा जाता हो तो बालकको मारता है ॥५९॥ चंद्रमा पापग्रहोंके संगमें हो अथवा पाप ग्रहोंके मध्यमें हो अथवा चंद्रमासे सातवें घर पापग्रह हो तो उसकी माता नष्ट हो ॥६०॥ सूर्य लग्नमें बैठा हो, चंद्रमा पांचवें घरमें, आठवें घरमें अन्य पाप ग्रह हों तो जन्मा हुआ बालक नहीं जीवै ॥६१॥ पाप-ग्रहसे युक्त लग्न हो अथवा पापग्रहोंके बीचमें लग्न आगया हो वा लग्नसे सातवें घरमें पापग्रह हों तो माताकी मृत्यु हो ॥६२॥ सूर्य पापग्रहसे युक्त हो अथवा पापग्रहोंके मध्यमें हो, सूर्यसे सातवें घरमें पापग्रह हो तो पिताकी मृत्यु हो ॥६३॥ क्रूर ग्रहके क्षेत्र (लग्न) में जन्म भया हो, लग्नेश अस्त हो रहा हो तो वह नर नेष्ट कर्मोवाला तथा सात वर्षकी आयुवाला हो ॥६४॥ आठवें घरमें शनि हो, जन्मलग्नमें चंद्रमा हो तो वह नर मंदाग्नि, उदररोगवाला और हीनशरीरवाला होता है ॥६५॥ शनिके क्षेत्रमें सूर्य और सूर्यके क्षेत्रमें शनि हो तो उस जन्मनेवालेकी मृत्यु बारहवें वर्षमें होती है ॥६६॥ बुध, मंगल लग्नमें हों अथवा छठे ६ हों तो चोर वा घोर कर्म करनेवाला हो उसके हाथ पैर

भी नष्ट हो जावें ॥६७॥ छठे आठवें घरमें वा लग्नमें स्थित बुध शत्रुके घरमें होवें तो उस बालककी मृत्यु चौथे वर्षमें होती है इसमें संदेह नहीं ॥६८॥ आठवें घरमें राहु हो केंद्रमें चंद्रमा हो तो उस बालककी मृत्यु शीघ्रही होती है इसमें संदेह नहीं ॥६९॥ सातवें नवमें घरमें शत्रुके क्षेत्रमें राहु होवे तो सोलहवें वर्षमें उसकी मृत्यु हो इसमें संदेह नहीं ॥७०॥ बारहवें घरमें चंद्रमा हो पापग्रह आठवें घरमें हो तो उस बालककी मृत्यु निश्चय एकही महीनेमें होती है ॥७१॥ जन्मलग्नमें राहु हो, छठे घरमें चंद्रमा हो तो वह बालक निश्चय मृगीरोगवाला हो ॥७२॥ शुक्रसे युक्त हुआ चंद्रमा छठे आठवें घरमें हो तो मंदाग्नि उदररोगवाला तथा हीन अंगवाला भी होता है ॥७३॥ लग्नमें बारहवें, चौथे, सातवें, आठवें घरमें मंगल हो तो वह पुरुष अपनी स्त्रीको नष्ट करे यही योग स्त्रीके होवे तो वह अपने पतिको नष्ट करै ॥७४॥ बुधसे युक्त चंद्रमा छठे आठवें घरमें हो तो उस बालककी मृत्यु विषदोष से हो ॥७५॥ सूर्यसे युक्त हुआ चंद्रमा छठे आठवें घरमें हो तो राजदोषसे अथवा सिंहदोषसे (राजा या शेरके जरियेसे) मृत्यु हो ॥७६॥ अकेला सूर्य लग्नमें पड़ा हो तो वह बालक स्थानहीन हो, शोक संतापसे पीडित रहै ॥७७॥ दशवें घरमें मंगल हो शत्रुके क्षेत्रमें बैठा हो तो उस बालकका पिता शीघ्रही मरै इसमें संदेह नहीं ॥७८॥ लग्नमें आठवें चंद्रमा करके युक्त हुआ राहु होवे तो उस बालककी मृत्यु दशदिनके भीतर हो ॥७९॥ लग्नमें बृहस्पति हो, दूसरे घरमें शनि, सूर्य मंगल, बुध हों तो उस बालकके विवाह समयमें पिता मरेगा ॥८०॥ तुला, कुंभ, मकर, इन राशियोंपर शनि हो फिर लग्नमें वा छठे, तीसरे घरमें हो तो रोग (अरिष्ट) नहीं हो ॥८१॥ मीन लग्नमें बृहस्पति शुक्र हो, मेष राशिका सूर्य, मकरका मंगल हो तो दासवंशमें जन्मा हुआ नर भी छत्रधारी राजा हो ॥८२॥ लग्नसे नवम घरमें सूर्य हो शनि आठवें हो ग्यारहवें घरमें शुक्र हो तो वह बालक एक महीनातक नहीं जीवै ॥८३॥ धन राशिपर बृहस्पति हो और राहु, मंगल, शुक्र ये सातवें घरमें हों, आठवें घर सूर्य चंद्रमा हों तो जन्मनेवाला नर जवान अवस्थामें म्लेच्छ (मुसलमान) हो जावे ॥८४॥ नवमें दशमें चंद्रमा हो, सातवें घरमें शुक्र हो, पापग्रह चौथे घर हो तो जन्मनेवाला नर वंशको नष्ट करनेवाला हो ॥८५॥ तीसरे घरमें बृहस्पति हो, ग्यारहवें घरमें चंद्रमा हो तो वह नर घरमें स्थित हुआ कुलका दीपकरूप लोकमें प्रसिद्ध हो ॥८६॥ सिंह लग्नमें मंगल हो, पांचवें घरमें चंद्रमा हो, बारहवें घरमें राहु हो तो वह कुलमें दीपकरूप हो ॥८७॥ यदि एक पापग्रह लग्नमें बैठा हो और एक पापग्रह चतुर्थमें हो तो वह बालक अपने कुलमें दीपकरूप हो सुखी रहै ॥८८॥ लग्नमें वा सातवें घरमें मङ्गल हो और पांचवें घरमें सूर्य हो तो वह वनमें पड़ा रहै तो भी अच्छी तरह जीवे और विख्यात (प्रसिद्ध) हो इसमें संदेह नहीं ॥८९॥ मंगलके क्षेत्रमें जन्मे (लग्न हो) लग्नमें क्रूर ग्रह हो तो वह बालक एक वर्षके भीतर मरै इसमें संदेह नहीं ॥९०॥ क्षीण चंद्रमा बारहवें घरमें हो, पापग्रहोंसे देखा गया हो तो दुःखदायी है. जो आठवें घरमें शनि बैठा हो तो बहुत क्लेश करै ॥९१॥ बारहवें घरमें चंद्रमा हो, छठे घरमें पापग्रह हो तो वह बालक अल्प आयु वाला होय और सदा रोगी रहै ॥९२॥ दशवें घरमें राहु हो तो माता पिताको पीडा करै और बारहवें वर्षमें निश्चय करके उस बालककी मृत्यु हो जावे ॥९३॥ शनिके क्षेत्रमें सूर्य हो और सूर्यके क्षेत्रमें शनि हो तो उस बालककी मृत्यु बीस वर्षमें होती है

निश्चय जानो ॥९४॥ छठे घरमें पापग्रह हो, बारहवें घरमें चंद्रमा हो चौथे घरमें जिसके मंगल हो उसकी माता नहीं जीवै ॥९५॥ चौथे घरमें पापग्रह हो तो माताको नष्ट करे, दशवें घरमें पापग्रह हो तो पिताको नष्ट करे और सातवें घरमें पापग्रह हो तो पिता माता दोनोंको नष्ट करे ॥९६॥ बारहवें अथवा छठे घरमें क्रूर ग्रह होवें तो माता नष्ट होवे, चौथे वा दशवें घरमें पापग्रह हो तो पिता नष्ट होवे ॥९७॥ उच्च राशिका अथवा नीचका सूर्य सातवें घरमें हो तो जन्मनेवाला नर माता को नष्ट करे इसमें संदेह नहीं ॥९८॥ यह पूर्वयोग माताको कब नष्ट करे यह कहते हैं, कि चंद्रमा मेष आदि जिस नवांशकमें हो तहां क्रमसे ८-९-२४-२५-५-१ ४-२-२०-१८-२१-१० इन वर्षोंमें मृत्यु कहो. जैसे मेषके नवांशकमें हो तो ८ वर्षमें वृषमें ९ वर्षमें इसी प्रकार सब जगह जानो ॥९९॥ लग्नमें शनि, मंगल, राहु, सूर्य बैठे हों तो संताप रहै, रक्तकी बीमारी रहै, सब शुभग्रह हों तो आरोग्य रहै ॥२००॥ केंद्रमें जो एक भी शुभग्रह हो तो बली, विश्वका प्रकाशक दीर्घ आयुवाला नर हो और सब दोष नष्ट हो जावें सूर्य केंद्रमें हो चंद्रमा मित्र ग्रहके नवांशकमें, तथा बृहस्पति देखा गया हो तो वह नर धनवान् ज्ञान-संयुक्त होता है ॥२॥ इति शुभाशुभयोगाः ॥

अथवारायुः

विपदः प्रथमे मासे द्वात्रिंशे च त्रयोदशे ॥ षष्ठेपि च यदा सूर्ये जातो जीवति षष्टिकम् ॥३॥ एकादशेऽष्टमे मासे चन्द्रे पीडा च षोडशे ॥ सप्त-सप्तविंशतिमे वर्षे चतुर्युक्तास्थितौ मृतिः ॥४॥ द्वात्रिंशे च द्वितीये च वर्षे पीडा च मंगले ॥ चतुःसप्ततिवर्षाणि सदा रोगी स जीवति ॥५॥ बुधवारे ऽष्टमे मासे पीडा वर्षे तथाऽष्टमे ॥ पूर्णे चतुःषष्टिवर्षे ततो मृत्युर्भविष्यति- ॥६॥ गुरौ च सप्तमे मासे षोडशे च त्रयोदशे ॥ पीडा ततश्चतुर्युक्तशतं वर्षाणि जीवति ॥७॥ शुक्रवारे च जातस्य देहो रोगविवर्जितः ॥ षष्टिवर्षे च संपूर्णे म्रियते मानवो ध्रुवम् ॥८॥ शनौ च प्रथमे मासे पीडाष्टादशवत्सरे ॥ दृढदेहस्तदा जातः शतं वर्षाणि जीवति ॥९॥

जिसका ऐतवारको जन्म हो तो उसे पहिले महीनेमें पीडा हो और बत्तीस ३२ तेरह १३ छठा ६ इन वर्षोंमें पीडा हो तथा ६० वर्षतक जीवै ॥३॥ सोमवारको जन्मे तो ग्यारहवें आठवें महीनेमें पीडा हो, सोलहवें और सतावीसवें वर्षमें पीडा हो, चौराशी वर्षकी अवस्था हो ॥४॥ मंगलवारके दिन जन्म भया हो तो दूसरे और बत्तीसवें वर्षमें पीडा हो और सदा रोगी रहै चौहत्तर ७४ वर्षतक जीवै ॥५॥ बुधवारमें जन्म हो तो आठवें महीने तथा आठवें वर्षमें पीडा हो फिर चौसठ वर्ष पूरे हो लेवें तब मृत्यु हो ॥६॥ बृहस्पतिवारमें जन्म हो तो सातवें महीनेमें सोलहवां और तेरहवां वर्षमें पीडा हो फिर एकसौ चार वर्षतक जीवै ॥७॥ शुक्रवारमें जन्म हो तो देहमें पीडा न हो और साठ वर्ष पूरे हो लेवें तब वह मनुष्य मृत्युको प्राप्त होता है ॥८॥ शनिवारविषे जन्म हो तो पहिले महीने और अठारवें वर्षमें पीडा हो और दृढशरीर रहै सौ वर्षतक जीवै ॥९॥ इति वारायुः ।

अथ वारफलम्

मिष्टान्नभोगी मानी च क्रोधी च रतिलालसः ।। पित्ताधिकोरवेर्वारे धनकामी भवेन्नरः ।।२१०।। भोगी कामी शास्त्रवेत्ता गुणी मानी जितेंद्रियः ।। विद्याधिकः: शीलयुक्तो जायते चन्द्रवासरे ।।११।। मूर्खप्रियो धनी क्रूरः श्रुतिस्मृतिविनिंदकः ।। नास्तिको वेदहीनश्च भौमे भोगी भवेन्नरः ।।१२।। वेदशास्त्रक्रियायुक्तो दयालुश्च बहुश्रुतः ।। भयानको योगयुक्तो जायते बुधवासरे ।।१३।। वेदवेत्ता चाग्निहोत्री पुत्रपौत्रधनान्वितः ।। प्रजान्वितः पूर्णवेत्ता गुरुवारे भवेन्नरः ।।१४।। अर्थी भोगी धनी शूरः कृपालुर्बहुसेवकः ।। दैवज्ञोपि श्रुतिज्ञश्च जनः शुक्रदिने भवेत् ।।१५।। नीचसक्तः कृतघ्नश्च कुटिलो बंधुपीडकः ।। कृतकार्यहरो रोगी जायते शनिवासरे ।।१६।। लग्नादुपचयस्थानस्थिते वारग्रहे सति ।। उक्तं फलं भवेच्छ्रेष्टं विपरीतमतोन्यथा ।।१७।। इति जन्मवारफलम्

अथ वारजन्मफलम्– ऐतवारको जन्म हो तो मिष्टान्न भोगनेवाला, मानी, क्रोधी, मैथुनकी लालसावाला होता है पित्त अधिक हो तथा धनकी कामनावाला होता है ।।२१०।। सोमवारमें जन्मे तो भोगी, कामी, शास्त्रवेत्ता, गुणी, मानी, जितेंद्रिय, अधिक विद्यावान् शीलयुक्त होता है ।।११।। मंगलवारमें जन्मे तो मूर्खोंका प्रिय, धनी, क्रोधी, श्रुतिस्मृतिकी निंदा करनेवाला, नास्तिक वेदहीन तथा भोगी होता है ।।१२।। बुधवारमें जन्में तो वेद शास्त्रकी क्रियामें युक्त, दयालु, बहुश्रुत, डरपोक, योगयुक्त हो ।।१३।। वेदको जाननेवाला, अग्निहोत्री, पुत्र पौत्र धनादिकोंसे युक्त, प्रजासे युक्त, पूर्ण विद्वान् ऐसा नर बृहस्पति वारमें जन्मनेसे होता है ।।१४।। प्रयोजन करनेवाला, भोगी, धनी, शूर, वीर, कृपालु, बहुत भृत्योंवाला, दैवज्ञ, वेदवेत्ता ऐसा नर शुक्रवारमें जन्मनेसे होता है ।।१५।। जो शनिवारमें जन्में वह नीच जनोंमें आसक्त रहै, कृतघ्न, कुटिल, बंधुजनोंको पीडा करनेवाला होता है, किये हुए कार्यको नष्ट करनेवाला, रोगी होता है ।।१६।। जिस वारमें जन्म भया हो वह ग्रह लग्नसे उपचय (३–११–१०–६) इन घरोंमें स्थित होवे तो कहा हुआ फल श्रेष्ठ (पूर्ण) जानना नहीं तो विपरीत फल जानो ।।१७।। इति वारफलम्।।

अथ मेषादिराशिफलम्

लोलनेत्रः सदा रोगी धर्मार्थकृतनिश्चयः ।। पृथुजंघः कृतज्ञश्च विक्रान्तो राजपूजितः ।।१८।। कामिनीहृदयानन्दो दाता भीतो जलादपि ।। चंडकर्मा मृदुश्चांते मेषराशौ भवेन्नरः ।।१९।। भोगी दाता शुचिर्दक्षो महामल्लो महाबलः ।। धनी विलासी तेजस्वी सुमित्रश्च वृषे भवेत् ।।२२०।। मिष्टवाक्यो लोलदृष्टिर्दयालुर्मैथुनप्रियः ।। गांधर्ववित्कण्ठरोगी कीर्तिभागी धनी गुणी ।।२१।। गौरो दीर्घः पटुर्वक्ता मेधावी च दृढव्रतः ।। समर्थो ह्यतिवादी च जायते मिथुने नरः ।।२२।। कार्यकारी धनी शूरो धर्मिष्ठो गुरुवत्सलः ।। शिरोरोगी महाबुद्धिः कृशांगः कृतवित्तमः ।।२३।। प्रवासशील: कोपांधो बाल्ये दुःखी सुमित्रकः ।। अनासक्तो गृहे वक्ता कर्कराशौ

भवेन्नरः ।।२४।। क्षमायुक्तस्त्रपायुक्तो मद्यमांसप्रियः सदा ।। देशभ्रमणशीलश्च शीतभीतः सुमित्रकः ।।२५।। विनयी शीघ्रकोपश्च जननीजनवल्लभः ।। व्यसनी प्रकटो लोके सिंहराशौ भवेन्नरः ।।२६।। विलासी सुजना ह्लादी सुभगो धनपूरितः ।। प्रवासशीलः स्त्रीदुःखी वेदमार्गपरायणः ।।२७।। दाता दक्षः कविर्वृद्धो गांधर्वे वाद्यके रतः ।। सर्वलोकप्रियो नित्यं कन्याजातो भवेन्नरः ।। २८ ।। स्वस्थानरोषणो दुःखी पटुभाषी कृपान्वितः ।। चंचलाक्षश्च लक्ष्मीको गृहमध्येऽतिविक्रमः ।।२९।। वाणिज्यदक्षो देवानां पूजको मित्रवत्सलः ।। प्रवासी सुहृदामिष्टो जूके जातो भवेन्नरः ।।२३०।। बालप्रवासी क्रूरात्मा शूरः पिंगललोचनः ।। परदाररतो मानी निष्ठुरः स्वजने जने ।।३१।। साहसप्राप्तलक्ष्मीको जनन्यामपि दुष्टधीः ।। धूर्तश्चोर-फलारंभी वृश्चिकेंदौ भवेन्नरः ।।३२।। क्रूरः समधिया युक्तः सात्त्विको जननंदनः ।। शिल्पविज्ञान संपन्नो धनाढ्यो दिव्यभार्यकः ।। ३३ ।। मानी चरित्रसंपन्नो ललिताक्षरभाषणः ।। तेजस्वी स्थूलदेहश्च धनुर्जातः कुलान्तकः ।।३४।। कुले नेष्टो वशः स्त्रीणां पंडितः परिवारकः ।। गीतज्ञो लालसी गुह्यः पुत्राढ्यो मातृवत्सलः ।।३५।। धनी त्यागी सुभृत्यश्च दयालुर्बहुबांधवः ।। परिचिंतितसौख्यश्च मकरेंदौ भवेन्नरः ।।३६।। दातालसः कृतज्ञश्च गजवाजिधनेश्वरः ।। शुभदृष्टिःसदा सौम्यो मानविद्याकृतोद्यमः ।।३७।। पुण्याढ्यः स्नेहहीनश्च धनी भोगी सशक्तिकः ।। शालूरकुक्षिर्निर्भीतः कुंभेंदौ जायते नरः ।।३८।। गंभीरचेष्टितः शूरः पटुवाग्मी नरोत्तमः ।। कोपनः कृपणो ज्ञानी गुणी श्रेष्ठःकुलप्रियः ।। ३९ ।। नित्यसेवी शीघ्रगामी गांधर्व कुशलः शुभः ।। मीनभेंदौ समुत्पन्नो जायते बंधुवत्सलः ।।२४०।।

अथ मेषादिराशिफलम्। चञ्चल नेत्रोंवाला, सदा रोगी, धर्म अर्थमें निश्चय करने-वाला, मोटी पिंडलियोंवाला, कृतज्ञ, बलवान्, राजासे पूजित ।।१८।। और स्त्रीके चित्तको, आनंद देनेवाला, दानी, जलसे डरनेवाला, प्रचंड कर्म करनेवाला, आखिरमें सरल होनेवाला ऐसा नर मेषराशिमें जन्मनेसे होता है ।।१९।। वृष राशिमें जन्में तो भोगी, दानी, पवित्र, चतुर, महामल्ल, महाबली, धनी, विलासी, तेजस्वी और सुंदर मित्रोवाला होता है ।।२२०।। और मिष्ट वचन बोलनेवाला, चञ्चल दृष्टिवाला, दयालु, मैथुन करनेकी प्रीतिवाला, गायनविद्या जाननेवाला, कंठरोगी, कीर्तिमान्, धनी, गुणी ।।२१।। गौर, दीर्घ, चतुर वक्ता, मेधा (बुधि) वाला, दृढ, संकल्पवाला, समर्थ, अत्यंत वादी ऐसा नर मिथुन राशिमें जन्मनेवाला होता है ।।२२।। कार्यं करनेवाला, धनी, शूर, वीर, धर्मिष्ठ, गुरुका प्रिय, शिरमें रोगयुक्त, महाबुद्धिमान्, दुबला, किये कामको जाननेवाला ।।२३।। परदेशमें रहने-वाला, क्रोधसे अंधा हुआ, बालक अवस्थामें दुःखी, सुंदर मित्रोवाला, घरमें अनासक्त, वक्ता ऐसा नर कर्क राशिमें जन्मनेसे होता है ।। २४ ।। क्षमायुक्त, लज्जायुक्त, मद्य मांसमें सदा प्रिय, देशमें भ्रमनेवाला, शीतसे डरनेवाला, सुंदर मित्रोंवाला तथा ।। २५ ।। विनयी शीघ्रक्रोधी, माताको प्रिय, व्यसनी, लोकमें प्रसिद्ध ऐसा नर सिंह राशिमें होता है ।।२६।। श्रेष्ठ जनोंका आनंददायी, ऐश्वर्यवान्, परदेशमें रहनेवाला, स्त्रीसे दुःखी, वेदमार्गमें तत्पर

।।२७।। दानी, चतुर, कवि, वृद्ध गाने बजानेमें निपुण, सदा सब लोगोंको प्रिय एसा नर कन्या राशिविषे जन्मनेसे होता है ।।२८।। तुला राशिमें जन्मनेवाला नर अपने घरमें क्रोधी, दु:खी कोमल बोलनेवाला, दयावान्, चञ्चल नेत्रोंवाला, लक्ष्मीवान्, घरमें अत्यंत पराक्रमी ।।२९।। वणिज करनेमें चतुर, देवताओंका पूजक, मित्रोंका प्रिय, परदेशमें रहने-वाला, मित्र जनोंको हितदायी होता है ।।२३०।। बालक अवस्थासेही परदेशमें रहनेवाला, क्रूरस्वभाववाला, शूर, वीर, पिंगल नेत्रोंवाला, परस्त्रीसे रमण करनेवाला, अभिमानी, स्वजनविषे कठोर रहनेवाला ।।३१।। हठसे लक्ष्मीको प्राप्त करनेवाला,, माताविषे भी दुष्ट बुद्धिवाला, पाखंडी, चोरी करनेवाला ऐसा नर वृश्चिक राशिमें होता है ।। ३२ ।। क्रूर, सम बुद्धिवाला, सत्त्व गुणी मनुष्योंको आनंददायी, शिल्प विद्यामें निपुण, धनाढ्य, दिव्य स्त्रीवाला ।।३३।। अभिमानी, माया रचनेवाला, मनोहर अक्षर बोलनेवाला, तेजस्वी, स्थूल शरीरवाला, कुलको नष्ट करनेवाला ऐसा नर धनुष राशिमें जन्मनेवाला होता है ।।३४।। कुलमें नेष्ट, स्त्रीके वशमें रहनेवाला, पंडित, परिवारवाला, गीतको जाननेवाला लालची, गुप्त रहनेवाला, पुत्रोंसे युक्त, माताका प्रिय ।।३५।। धनी, त्यागी, सुंदर भृत्यों वाला, बहुत बंधुओंवाला, सुखको निरंतर चिंतवन करनेवाला ऐसा नर मकर राशिविषे होता है ।।३६।। दानी, आलसी, कृतज्ञ, हस्ती घोडे धन इन्हींका पति, शुभ दृष्टिवाला, सदा सौम्य, मान और विद्यामें उद्यम करनेवाला ।।३७।। पुण्यसे युक्त, स्नेहहीन, धनी भोगी, शक्तिमान्, भीडककी कुक्षिसमान कोखिवाला, भयरहित ऐसा नर कुंभ राशिमें जन्मनेवाला होता है ।।३८।। गंभीर चेष्टावाला, शूरवीर, चतुर, उत्तम बोलनेवाला, श्रेष्ठ नर, क्रोधी, कृपण, ज्ञानी गुणियोंमें श्रेष्ठ, कुलका प्रिय ।।३९।। नित्य सेवा करनेवाला, शीघ्र गमन करनेवाला, गायनविद्यामें निपुण, शुभ, सुंदर, लक्ष्मीवान्, बंधुओंका प्रिय, ऐसा नर मीन राशिवषे जन्मनेवाला होता है ।।२४०।।

अथ संक्षेपेण मेषादिभस्थचन्द्रफलम्

मेषे दीनो वृषे मानी नानाबुद्धिश्च मन्मथे ।। क्रूरः कर्के धृतिः सिंहे कन्यायां बहु-मायिता ।।४१।। जूके स्त्रीत्वमलौ मानी चापे पापाशयो नरः ।। मुखरो मकरे कुंभे चतुरः स्थिरधीर्झषे ।।४२।।

अब संक्षेपसे मेष आदि चंद्रमाका फल कहते हैं—मेषका चंद्रमा हो तो दीन, वृषका हो तो अभिमानी, मिथुनमें अनेक प्रकार भी बुद्धिवाला, कर्कमें क्रूर, सिंहमें धीरजवाला, कन्यामें बहुत कपट (छल) वाला ।।४१।। तुलामें स्त्री स्वभाववाला, वृश्चिकमें अभिमान-वाला, धनमें बुरा अंत:करणवाला, मकरमें वाचाल, कुंभमें चतुर, मीन राशिके चंद्रमामें जन्मनेवाला स्थिर बुद्धि वाला होता है ।।४२।। इति मेषादिजन्मराशिस्थचन्द्रफलानि ।

अथ मेषादिलग्नोत्पन्नफलम्

मेषलग्ने समुत्पन्नश्चंडो मानो सुधीः शुभः ।। क्रोधी च जनहंता च विक्रमी परवत्सलः ।।४३।। वृषलग्नभवो बालो गुरुभक्तः प्रियंवदः ।। गुणी कृती धनी लुब्धः शूरः सर्वजनप्रियः ।।४४।। मिथुनोदयजातस्तु मानी स्वजनवत्सलः ।। त्यागी भोगी धनी कामी दीर्घसूत्रोऽरिमर्दनः ।।४५।। कर्कलग्ने समुत्पन्नो भोगी धर्मी जनप्रियः ।।

मिष्टान्नपानभोगी च सौभाग्यः स्वजनप्रियः ।।४६।। सिंहलग्नोदये जातो भोगी शत्रुविमर्दकः ।। स्वल्पोदरोऽल्पपुत्रश्च सोत्साही रणविक्रमः ।।४७।। कन्यालग्नभवो बालो नानाशास्त्रविशारदः ।। सौभाग्यगुणसंपन्नो सुंदरः सुरतप्रियः ।।४८।। तुलालग्नोदये जातः सुधीः सत्कर्मजीवनः ।। विद्वान्सर्वकलाभिज्ञो धनाढ्यो जनपूजितः ।।४९।। वृश्चिकोदयजो बालः शौर्यवानतिधृष्टधीः ।। विज्ञानज्ञानसंपन्नः सुखी सुविग्रहः सुधीः ।।२५०।। धनुर्लग्नोदये जातो नीतिमान्गुणवान्सुधीः ।। कुलमध्ये प्रधानश्च प्राज्ञः सर्वस्य पोषकः ।।५१।। मकरोदयजो बालो नीचकर्मा बहुप्रजः ।। लुब्धः स्वस्थोऽलसो दीनः स्वकार्येषु कृतोद्यमः ।।५२।। कुंभलग्नोदये जातश्चलचित्तोतिसौहृदः ।। परदाररतो नित्यं मृदुकायो महासुखी ।। ५३।। मीनलग्नोद्भवो बालो रत्नकांचनपूरितः ।। अल्पकामोतिरक्तश्च दीर्घकालविचिंतकः ।।५४।।

अथ मेषादिलग्नोत्पन्नफलम् ।। मेष लग्नमें जन्मनेवाला कठोर, अभिमानी, पंडित क्रोधी, जनहंता पराक्रमी, अन्य घरमें स्नेह करनेवालाभी होता है ।।४३।। वृष लग्नमें जन्मने वाला बालक गुरुका भक्त, प्रिय बोलनेवाला, गुणी, पंडित, लोभी, शूरवीर, सर्व जनप्रिय होता है ।।४४।। मिथुन लग्नमें जन्मनेवाला अभिमानी, स्वजनपर हित करनेवाला, त्यागी भोगी, धनी, कामी, दीर्घसूत्री, शत्रुनाशक होता है ।।४५।। कर्क लग्नमें जन्मनेवाला भोगी, धर्मी, सर्वजनप्रिय, मीठा अन्नपान करनेवाला, ऐश्वर्यवान्, स्वजनप्रिय होता है ।।४६।। सिंह, लग्नमें जन्मनेवाला भोगी, शत्रुओंको नष्ट करनेवाला, स्वल्प उदरवाला, थोडे पुत्रोंवाला, उत्साहवाला, रणमें पराक्रमी होता है ।।४७।। कन्या लग्नमें जन्मनेवाला बालक अनेक शास्त्रोंको जाननेवाला, सौभाग्यगुणसे संपन्न, सुंदर, मैथुनप्रिय होता है ।।४८।। तुला लग्नमें जन्में तो पंडित, श्रेष्ठ कामकी आजीविकावाला, विद्वान्, सर्व कलाओंको जाननेवाला, धनाढय, अन्य जनोंसे पूजित हो ।।४९।। वृश्चिक लग्नमें जन्मनेवाला बालक शूर, वीर, उद्दण्डबुद्धिवाला होता है, विज्ञान और ज्ञानसे संयुक्त, सुखी, सुंदर शरीरवाला, पंडित हो ।।२५०।। धन लग्नमें जन्में तो नीतिमान्, गुणी पंडित हो, कुलके मध्यमें प्रधान, बुद्धिमान्, सब जनोंका पोषक हो ।।५१।। मकर लग्नमें जन्मनेवाला बालक नीच कर्म करै, बहुत संतान हो, लोभी, स्वस्थ, आलसी, दीन, अपने कार्यमें उद्यम करनेवाला होता है ।।५२।। कुंभ लग्नमें जन्में तो चञ्चल चित्तवाला, अत्यंत प्रिय, नित्य पराई स्त्रीमें रत; कोमल शरीरवाला, महासुखी होता है ।।५३।। मीनलग्नमें जन्मनेवाला बालक रत्न सुवर्णसे भरपूर, अल्पकामनावाला, अत्यंत स्नेही, दीर्घ कालकी बात चिंतवन करने वाला हो ।।५४।। इति जन्मलग्नफलम् ।

अथ तिथिफलम्

क्रूरसंगी धनैर्हीनः कुलसंतापकारकः ।। व्यसनासक्तचित्तश्च प्रतिपत्तिथिजो नरः ।।५५।। परदाररतो नित्यं सत्यशौचविवर्जितः ।। तस्करः स्नेहहीनश्च द्वितीयायां भवेन्नरः ।।५६।। अचेतनोतिविकलो निर्द्रव्यो विफलः सदा ।। परद्वेषरतो नित्यं तृतीयासंभवो नरः ।।५७।। महाभोगी च दाता च मित्रस्नेहविचक्षणः ।। धनसंतान-

संयुक्तश्चतुर्थ्यां यदि जायते ॥५८॥ व्यवहारी गुणग्राही पितृमात्रोश्च रक्षकः॥ दाता भोक्ता तनुप्रीतिः पञ्चमीसंभवो नरः ॥५९॥ नानादेशाभिगामी च सदा कलहकारकः ॥ नित्यं जठरदोषी च षष्ठीजातो भवेन्नरः ॥२६०॥ अल्पतोषी च तेजस्वी सौभाग्यगुणसुंदरः ॥ पुत्रवान्धनसंपन्नस्सप्तमीसंभवो नरः ॥६१॥ धर्मिष्ठः सत्यवादी च दाता भोक्ता च स वत्सलः ॥ गुणज्ञः सर्वकार्यज्ञो योऽष्टमीसंभवो नरः ॥ ॥६२॥ देवताराधकः पुत्री धनी स्त्रीमग्नमानसः ॥ शास्त्राभ्यासरतो नित्यं नवम्यां यदि जायते ॥६३॥ दशम्यां धर्मकर्मज्ञो देवसेवी च जापकः ॥ गुणी धनी वेदविज्ञो बंधुविप्रप्रियो जनः ॥६४॥ एकादश्यां नरेन्द्रस्य गेहगामी शुचिर्भवेत् ॥ धर्मज्ञश्च विवेकी च गुरुशुश्रूषको गुणी ॥६५॥ चपलश्चंचलज्ञानः सदा क्षीणस्वरूपधृक् ॥ देशभ्रमणशीलश्च द्वादशीजातको भवेत् ॥६६॥ महासिद्धो महाप्राज्ञः शास्त्राभ्यासी जितेंद्रियः ॥ परकार्यरतो नित्यं त्रयोदश्यां यदा भवेत् ॥६७॥ धनाढ्यो धर्मशीलश्च शूरः सद्वाक्यपालकः ॥ राजमान्यो यशस्वी च चतुर्दश्यां यदा भवेत् ॥६८॥ श्रीयुतो मतियुक्तश्च महाभोजनलालसः ॥ उज्ज्वलः परदारेषु विरत पूर्णिमाभवः ॥६९॥ स्थिरारंभः परद्वेषी वक्रो मूर्खः पराक्रमी । गूढमंत्री च संज्ञानी ह्यमावास्याभवो नरः ॥२७०॥ निर्विद्धायां तिथौ सौम्यविद्धायां च शुभं फलम् ॥ अनिष्टंपापविद्धायां तिथौ भवति निश्चितम् ॥७१॥

जो मनुष्य प्रतिपदा तिथिमें जन्में वह क्रूरसंगी, धनहीन, कुलको संताप करनेवाला व्यसनमें आसक्तचित्तवाला होता है ॥५५॥ द्वितीयामें जन्मनेवाला नर नित्य पराई स्त्रीविषे रमण करनेवाला, सत्य शौच रहित, स्नेहहीन, चोर हो ।५६॥ तृतीयामें जन्में, तो बुद्धिरहित, अति विकल, धनरहित, निष्फल रहता है, नित्य अन्यसे द्वेष करता है ॥५७॥ चतुर्थीमें जन्मनेवाला महाभोगी, दानी, मित्र स्नेहसे निपुण, धन संतानसे संयुक्त होता है ॥५८॥ पंचमीविषे जन्मे तो व्यवहारी, गुणग्राही, मातापिताका रक्षक; दाता, भोक्ता, सूक्ष्म प्रीतिवाला होता है ॥५९॥ षष्ठी तिथीमें जन्में तो अनेक देशोंमें विचरनेवाला, सदा कलह करनेवाला नित्य उदर रोगी होवे ॥६०॥ सप्तमीको जन्में तो अल्प संतोषवाला, तेजस्वी, सौभाग्य गुणसे सुंदर, पुत्रवान्, धनसे भरपूर होता है ॥६१॥ जो मनुष्य अष्टमीको जन्में वह धर्मिष्ठ, सत्यवादी, दानी, भोगी, सवका प्रिय, गुणज्ञ, सब कार्यको जाननेवाला होता है ॥६२॥ नवमी विषे जन्मनेवाला हर देवताके आराधन करनेवाला, पुत्रवंत, धनी स्त्रीविषे आसक्तमनवाला, शास्त्रके अभ्यासमें सदा प्रयुक्त होवे ॥६३॥ दशमी विषे जन्मनेवाला धर्म कर्मको जाननेवाला, देवताकी सेवा करनेवाला, जापक होता है । गुणी, धनी, वेदको जाननेवाला, बंधुजन और ब्राह्मण लोगोंका प्रिय होवे ॥६४॥ एकादशी विषे जन्में तो राजाके घरमें जानेवाला, पवित्र धर्मज्ञ, विवेकी, गुरुकी सेवा करनेवाला गुणी होता है ॥६५॥ द्वादशी तिथीमें जन्मे तो चपल, चञ्चल ज्ञानवाला, सदा क्षीण स्वरूपवाला, विदेशमें भ्रमनेवाला होता है ॥६६॥ त्रयोदशी विषे जन्में तो महासिद्ध, महाप्राज्ञ, शास्त्रका अभ्यास करनेवाला, जितेंद्रिय, नित्य पराये कार्यमें रहने-

वाला होता है ॥६७॥ चतुर्दशी विषे जन्मनेवाला नर धनाढ्य, धर्मशील, शूरवीर, श्रेष्ठ, वचनको पालनेवाला, राजमान्य, यशस्वी होता है ॥६८॥ पूर्णिमाको जन्मे तो लक्ष्मीयुक्त, बुद्धियुक्त, महान् भोजनमें लालसावाला, अन्य स्त्रियों विषे रमण करनेवाला, तेजस्वी होता है ॥६९॥ अमावास्या विषे जन्में तो स्थिर कामका आरंभ करनेवाला, परद्वेषी, कुटिल, मूर्ख, पराक्रमी, गूढ मंत्री, सयम्क् ज्ञानी होता है ॥२७०॥ निर्विद्धा तथा शुभसे विद्ध हुई तिथीमें जन्मे तो शुभफल हो और जो पाप विद्धा तिथीमें जन्म हो अनिष्ट (बुरा) फल हो ऐसे निश्यच जानो ॥७१॥ इति प्रतिपदादिजन्मतिथिविशेषफलम् ।

अथ नन्दादितिथिफलम्

नन्दातिथौ नरो जातो महामानी च कोविदः ॥ देवताभक्तिनिष्ठश्च ज्ञानी च प्रियवत्सलः ॥७२॥ भद्रातिथौ बंधुमान्यो राजसेवी धनान्वितः ॥ संसारभयभीतश्च परमार्थमतिर्नरः ॥७३॥ जयातिथौ राजपूज्यः पुत्रपौत्रादिसंयुतः ॥ शूरः शांतश्च दीर्घायुर्महाविज्ञश्च जायते ॥७४॥ रिक्तातिथौ वित्तहीनः प्रमादी गुरुनिन्दकः ॥ शास्त्रज्ञमतिहंता च कामुकश्च नरो भवेत् ॥७५॥ पूर्णातिथौ धनैः पूर्णो वेद-शास्त्रार्थतत्त्ववित् ॥ सत्यवादी शुद्धचेता जातो भवति मानवः ॥७६॥

नन्दातिथिविषे जन्मनेवाला नर महामानी, पंडित, देवताकी भक्तिमें तत्पर, ज्ञानी, प्रियजनोंका हित करनेवाला होवे ॥७२॥ भद्रा तिथीमें जन्में तो बंधुओंसे मान्य, राज-सेवी, धनाढय, संसारसे डरनेवाला, परमार्थमें बुद्धि रखनेवाला होता है ॥७३॥ जयातिथी विषे जन्मनेवाला राजपूज्य, पुत्रपौत्रादिकोंसे संयुक्त, शूर, वीर, शांत दीर्घ अवस्थावाला महाविद्वान् होता है ॥७४॥ रिक्ता तिथीमें जन्में तो धन हीन, प्रमादी, गुरुनिंदक शास्त्र-वेत्तोंके बुद्धिको नष्ट करनेवाला, कामी जन हो ॥७५॥ पूर्णा तिथी विषे जन्में तो धनों-करके परिपूर्ण, वेद शास्त्रके तत्त्वको जाननेवाला, सत्यधादी, शुद्धचित्तवाला होता है ॥७६॥ इति नंदादिपंचतिथिसामान्यफलम् ।

अथ विष्कम्भादियोगफलम्

विष्कंभजातो मनुजो रूपवान्गुणवान्भवेत् ॥ नानालंकारसंपूर्णो महाबुद्धिविशारदः ॥७७॥ प्रीतियोगे समुत्पन्नो योषितां वल्लभो भवेत् ॥ तत्त्वज्ञश्च महोत्साही स्वार्थे नित्यं कृतोद्यमः ॥७८॥ आयुष्मान्नाम्नि योगे च जातो मानी धनी कविः ॥ दीर्घायुः सत्त्वसंपन्नो युद्धे चाप्यपराजितः ॥७९॥ सौभाग्ये यः समुत्पन्नो राजमंत्री च जायते ॥ निपुणः सर्वकार्येषु वनितानां च वल्लभः ॥२८०॥ शोभने शोभनो बालो बहुपुत्रकलत्रवान् ॥ आतुरः सर्वकार्येषु युद्धभूमौ सदोत्सुकः ॥८१॥ अतिगंडे च यो जातो मातृहंता भवेच्च सः ॥ गण्डांतेषु च जातस्तु कुलहंता प्रकीर्तितः ॥८२॥ सुकर्मणि च यो जातः सुकर्मा जायते नरः ॥ सर्वैः प्रीतः सुशीलश्च रागी भोगी गुणाधिकः ॥८३॥ धृतियोगे च धृतिमान्कीर्तिपुष्टिधनान्वितः ॥ भाग्यवान्गुण-संपन्नो विद्यावान् रूपवान्भवेत् ॥८४॥ शूले शूलव्यथायुक्तो धार्मिकः शास्त्र-

पारगः ।। विद्यार्थकुशलो यज्वा जायते मनुजः सदा ।।८५।। गंडे गंडव्यथायुक्तो बहुक्लेशो महाशिरः ।। ह्रस्वकायो महास्थूलो बहुभोगो दृढव्रतः ।।८६।। वृद्धियोगे च दीर्घायुः सर्वेषां प्रियदर्शनः ।। सुरूपो बहुपुत्रश्च कलावान्सुकलत्रवान् ।।८७।। ध्रुवयोगेतिशक्तश्च स्थिरकर्मा सदा नरः ।। धनवानति भोक्ता च सत्त्ववानपि जायते ।।८८।। व्याघातयोगे जातस्तु सर्वज्ञः सर्वपूजितः ।। सर्वकर्मकरो लोके व्याख्यातः सर्वकर्मसु ।।८९।। हर्षणे जायते लोके महाभोगी नृपप्रियः ।।हृष्टः सदा धनैयुक्तो वेदशास्त्रविशारदः ।।९०।। वज्रयोगे वज्रमुष्टिः सर्वविद्यासु पारगः ।। धनधान्यसमायुक्तो मनुजो वज्रविक्रमः ।।९१।। सिद्धियोगे समुत्पन्नः सर्वसिद्धियुतो भवेत् ।। दाता भोक्ता सुखी कांतः शोकी रोगी च मानवः ।।९२।। व्यतीपाते च संजातो महाकष्टेन जीवति ।। जीवेच्चेद्भाग्ययोगेन स भवेदुत्तमो नृणाम् ।।९३।। योगे वरीयसि भवो वरिष्ठो जायते नरः ।। शिल्पकाव्यकलाभिज्ञो गीतनृत्यादि-कोविदः ।।९४।। परिघे च नरो जातः स्वकुलोन्नतिकारकः ।। शास्त्राभिज्ञः कवि-र्वाग्मी दाता भोक्ता प्रियंवदः ।।९५।। शिवयोगे नरो जातः सर्वकल्याणकारकः ।। महादेवसमो लोके महाबुद्धिर्वरप्रदः।।९६।। सिद्धियोगे सिद्धिदाता मंत्रसिद्धिप्रवर्त्तकः।। त्तकः।। दिव्यनारीसमेतश्च सर्वसम्पद्युतो भवेत् ।।९७।। साध्ये मानसिकासिद्धिर्यशोऽ-शेषः सुखागमः ।। दीर्घसूत्रः प्रसिद्धिश्च जायते सर्वसंमतः ।।९८।। शुभे शुभशतैर्युक्तो धनवानपि जायते ।। विज्ञानशास्त्रसंपन्नो दाता ब्राह्मणपूजकः ।।९९।। शुद्धे सर्व-कलायुक्तः सर्वार्थज्ञानवान्भवेत् ।। क्वचित्प्रतापी शूरश्च धनी सर्वजनप्रियः ।।१००।। ब्रह्मयोगे महाविद्वान्वेदशास्त्रपरायणः ।। ब्रह्मज्ञानरतोनित्यंसर्वकार्येषु कोविदः ।।१।। ऐंद्रे भूपकुले जातो राजा भवति विश्रुतः ।। अल्पायुश्च सुखी भोगी-गुणवानपि जायते ।।२।। वैधृतौ जायते मर्त्यो निरुत्साहो बुभुक्षितः ।। कुर्वाणोऽपि जनैः प्रीतिं प्रयात्यप्रियतां नरः ।।३।।

विष्कंभ योगमें जन्मनेवाला मनुष्य रूपवान्, गुणवान् होता है, अनेक प्रकारके आभूषणोंसे संयुक्त, महा बुद्धिमान्, पंडित होवे ।।७७।। प्रीतियोगमें जन्में तो स्त्रियोंका प्रिय हो, तत्त्वज्ञ, महाउत्साही नित्यप्रति स्वार्थमें उद्यम करनेवाला हो।।७८।। आयुष्मान् योगमें जन्मे तो वह मानी, धनी, कवि होता है, दीर्घ आयुवाला, पराक्रमी, युद्धमें शूर, वीर, होता है ।।७९।। सौभाग्य योगमें जन्मनेवाला राजाका मंत्री हो, सब कार्योंमें निपुण, स्त्रियोंका प्रिय होता है ।।२८०।। शोभन योगमें जन्मनेवाला बालक सुंदर हो, बहुत पुत्र तथा स्त्रीसे युक्त हो, सब कामोंमें आतुर, युद्धभूमिमें उत्साहवाला होवे ।।८१।। अतिगंड योगमें जन्मनेवाला अपनी माताको नष्ट करे, जो इस अतिगंड योगके अंतकी (घडियों) में जन्में तो संपूर्ण कुलको नष्ट करे ।।८२।। सुकर्मा योगमें जन्मनेवाला नर सुंदर कर्म करे, सबसे प्रसन्न रहै, सुंदर स्वभाववाला, रोगी भोगी अधिक गुणवाला हो ।।८३।। धृति योगमें जन्मनेवाला धृतिमान्, कीर्ति, पुष्टि, धनसे युक्त होता है. भाग्यवान्, गुण-

संपन्न, विद्यावान्, रूपवान् होता है ।।८४।। शूल योगमें जन्में तो शूल रोगकी पीडासे युक्त, धार्मिक, शास्त्रके पारको जाननेवाला होता है, विद्याके प्रयोजनमें निपुण, सदा यज्ञ करनेवाला होता है ।।८५।। गंड योगमें जन्में तो गंडमाला रोगकी पीडासे युक्त, बहुत क्लेशवाला, बडा शिरवाला, छोटा शरीरवाला, महास्थूल, बहुत भोगी, दृढव्रत होता है ।।८६।। वृद्धि योगमें जन्में तो वह दीर्घ आयुवाला, सबकोप्रिय दर्शन, सुरूप, बहुत पुत्रोंवाला, कलावान्, सुंदर स्त्रीवाला होता है ।।८७।। ध्रुवयोगमें जन्में तो वह अत्यंत समर्थ, स्थिर कर्म करनेवाला, धनवान्, अत्यंत भोगी, पराक्रमी होता है, ।।८८।। व्याघात योगमें जन्में तो वह नर सर्वज्ञ, सर्व पूजित होता है, सब काम करनेवाला, लोकमें सब कामोंमें प्रसिद्ध हो ।।८९।। हर्षण योगमें जन्में तो लोकमें महा भोगी, राजाका प्रिय हो, हृष्ट, सदा धनों करके युक्त, वेद शास्त्रको जाननेवाला होता है ।।२९०।। वज्र योगमें जन्में तो वज्रके समान मुष्टिवाला, सब विद्याओंको जाननेवाला, धन धान्यसे युक्त, वज्र-समान पराक्रमी हो ।।९१।। सिद्धियोगमें जन्में तो वह सब कामोंकी सिद्धिवाला हो, दाता, भोक्ता, सुखी, रूपवान् शोकी, रोगी होता है ।।९२।। व्यतीपातमें जन्में तो वह महा कष्टसे जीवै जो भाग्यके योगसे जीवै तो मनुष्योंमें श्रेष्ठ हो ।।९३।। वरीयान् योगमें जन्में तो वह अत्यंत श्रेष्ठ हो. शिल्प काव्य आदि कलाको जाननेवाला, गीत नृत्य आदिकोंको जाननेवाला, हो ।।९४।। परिघ योगमें जन्मनेवाला नर अपने कुलकी उन्नति करै, शास्त्रको जाननेवाला, कवि, सुंदर वाणीवाला, दाता, भोगी, प्रिय बोलनेवाला होता है ।।९५।। शिव योगमे जन्में तो वह नर सब कल्याण करनेवाला, लोकमें महादेवके समान, महा-बुद्धिवाला, वरदायी होता है ।।९६।। सिद्धि योगमें सिद्धिदाता, मंत्र सिद्धिका प्रवर्तक, दिव्य स्त्रीसे युक्त, संपूर्ण संपत्तिसे युक्त होता है ।।९७।। साध्य योगमें मनमें कार्य सिद्धि-वाला, यशवाला, सुखी, दीर्घसूत्री (देरीमें काम करनेवाला) विख्यात, सबका माना हुआ होता है ।।९८।। शुभ योगमें सैकडों शुभ कामोंसे युक्त, धनवान्, विज्ञान शास्त्रमें संपन्न दाता, ब्राह्मणोंका पूजक होता है ।।९९।। शुक्ल योगमें जन्मे तो वह कलाओंसे युक्त, सब प्रयोजनके ज्ञानवाला हो, कभी प्रतापी, शूरवीर, धनी, सब जनोंका प्रिय हो ।।३००।। ब्रह्म योगमें महाविद्वान्, वेदशास्त्रको जाननेवाला, हमेशा ब्रह्मज्ञानमें रत, सब कामोंमे चतुर होता है ।।१।। ऐंद्रयोगमें राजाके कुलमें जन्मनेवाला नर विख्यात राजा होवे, अल्प आयुवाला, सुखी, भोगी, गुणवान् होता है ।।२।। वैधृति योगमें जन्मे तो वह नर उत्साह-रहित, बुभुक्षित (कंगाल) हो और मनुष्योंके संग प्रीति करता हुआ भी अप्रिय हो जावे ।।३।। इति विष्कंभादिजन्मयोगफलम् ।।

अथ करणफलम्

ववाख्ये करणे जातो मानी धर्मरतः सदा ।। शुभमंगलकर्मा च स्थिरकर्मा च जायते ।।४।। वालवे करणे जातो देवतीर्थादिसेवकः ।। विद्यावान्सौख्यसंपन्नो राजमान्यश्च जायते ।।५।। कौलवे च नरो जातः प्रीतिः सर्वजनैः सह ।। संगति-र्मित्रवर्गैश्च मानवैश्चापि मित्रता ।।६।। तैतिले करणे जातः सौभाग्यगुणसंयुतः ।। स्नेहः सर्वजनैः सार्धं विचित्राणि गृहाणि च ।।७।। गराख्ये कृषिकर्मा च गृहकार्य-परायणः ।। यद्वस्तु कांक्षितं तच्च लभ्यतेऽत्र महोद्यमैः ।।८।। वणिजे करणे जातो

वाणिज्येनैव जीवति ।। वांछितं लभते लोके देशांतरगमागमैः ।।९।। विष्ट्याख्ये करणे जातो ह्यशुभारंभशीलवान् ।। कुशलो विषकार्येषु परघातरतः सदा ।।३१०।। शकुनौ जन्म यस्याभूत्पौष्टिकादिक्रियाकृती ।। औषधादिषु दक्षश्च भिषग्वृत्तिश्च जायते ।।११।। करणे च चतुष्पादे देवद्विजरतः सदा ।। गोकर्मा गोप्रभुर्लोके चतुष्पादचिकित्सकः ।।१२।। नागाख्ये करणे जातः स्थावरप्रीतिकारकः ।। कुरुते दारुणं कर्म दुर्भगो लोललोचनः ।।१३।। किंस्तुघ्ने करणे जातः शुभकर्मरतो नरः ।। तुष्टिं पुष्टिं च मांगल्यं सिद्धिं च लभते सदा ।।१४।।

ववकरणमें जन्मनेवाला मानी, सदा धर्मरत, शुभ मंगल कर्म करनेवाला, स्थिर कर्मवाला होता है ।।४।। बालव करणमें जन्मनेवाला देवता, तीर्थादिकोंकी सेवा करनेवाला, विद्यावान्, सुखसे युक्त, राजासे मान्य हो ।।५।। कौलव करणमें जन्मनेवाला नर सब जनोंके संग प्रीति रखता है, मित्र जनोंकी संगति करै, सब मनुष्योंसे मित्रता करै ।।६।। तैतिल करणमें जन्में तो सौभाग्य गुणसे संयुक्त, सब जनोंके साथ स्नेह रखनेवाला हो, विचित्र घरोंकी प्राप्तिवाला होवे ।।७।। गरकरणमें जन्मे तो वह खेती करनेवाला तथा घरके काममें निपुण हो, जिस वस्तुकी अभिलाषा करै उसीको महा उद्यम करनेसे प्राप्त करलेवै ।।८।। वणिज करणमें जन्मे तो वह वणिजकी आजीविका करै. देशांतरमें गमन करके अपने मन चाहे कामको सिद्ध करे ।।९।। विष्टियोगमें जन्मे तो वह अशुभ वस्तुका आरंभ करै, विषके कामोंमें निपुण, सदा पराये घात करनेमें रत रहै ।।३१०।। जो शकुनि करणमें जन्मे तो वह पुष्टिकारक क्रिया करनेवाला औषध आदिकोंमें चतुर, वैद्यकी आजीविका करनेवाला होता है ।।११।। चतुष्पाद करणमें जन्मे तो वह सदा देवता ब्राह्मणोंमें भक्ति रखै, संसारमें गौओंका काम, गौओंका स्वामी, तथा चौपायोंका इलाज करनेवाला हो ।।१२।। नागकरणमें जन्मे तो वह स्थावर (वृक्ष) से प्रीति रखै, दारुण काम करै, दुर्भाग्य, चञ्चल नेत्रोंवाला होता है ।।१३।। किंस्तुघ्न करणमें जन्मे तो वह सदा शुभ कर्ममें लगा रहै, तुष्टि, पुष्टि, मंगलपना इत्यादि सिद्धियोंको प्राप्त करै ।।१४।। इति ववादिकरणजन्मफलम् ।

अथ नवमांशफलम्

पिशुनश्चपलो दुष्टः पापकर्मा निराकृतिः ।। परेषां व्यसने सक्तश्चौरश्चप्रथमांशके ।।१५।। उत्पन्नविभवो भोक्ता संग्रामविगतस्पृहः ।। गंधर्वप्रमदासक्तो द्वितीयांशे नरो भवेत् ।।१६।। धर्मिष्ठः सतत व्याधिः सर्वसारज्ञ एव च ।। सर्वज्ञोदेवताभक्तस्तृतीयांशे च जायते ।।१७।। चतुर्थांशेभिजातस्तु दीक्षितो गुरुभक्तिमान् ।। यत्किंचिद्भूमिगंवस्तु तत्सर्वं लभते च सः ।।१८।। सर्वलक्षणसंपन्नो राजा भवति विश्रुतः। दीर्घायुर्बहुपुत्रश्च जायते पंचमांशके ।।१९।। स्त्रीनिर्जितः शुभैर्हीनो बहुभाषी नपुंसकः ।। अर्थध्वंसः प्रमादी चषष्ठांशे जायते नरः ।।३२०।। विक्रांतो मतिमाञ्छूरः संग्रामेष्वपराजितः ।। महोत्साही च संतोषी जायते सप्तमांशके ।।२१।। कृतघ्नो मत्सरी क्रूरः क्लेशभोक्ता बहुप्रजः ।। फलकालपरित्यागी जायते चाष्टमांशके

।।२२।। क्रियासु कुशलो दक्षः सुप्रतापी जितेंद्रियः ।। भृत्यैश्चावेष्टितो नित्यं जायते नवमेंशके ।।२३।।

जन्मराशिके प्रथम नवांशकमें जन्मे तो चुगलपन करनेवाला, चञ्चल बुद्धिवाला, दुष्ट, पापकर्म करनेवाला, बुरी आकृतिवाला, अन्योंके व्यसनमें आसक्त, तथा चोर होवे ।।१५।। दूसरे नवांशकमें जन्मे तो ऐश्वर्यवान्, भोगी, युद्धकी इच्छा रहित, गायन करनेवाला, स्त्रीविषे आसक्त होवे ।।१६।। तीसरे नवांशकमें जन्मनेवाला नर धर्मिष्ठ, निरन्तर व्याधिवाला, संपूर्ण सारको जाननेवाला, सर्वज्ञ, देवताका भक्त होवे ।।१७।। चौथे नवांशकमें जन्मे तो वह दीक्षित (यज्ञादिकारक) गुरुकी भक्तिवाला और भूमिमें गडेहुए धनको प्राप्त करनेवाला होता है ।।१८।। पांचवें नवांशकमें जन्मे तो वह दीर्घ आयुवाला, बहुत पुत्रोंवाला, सब लक्षणोंसे संपन्न प्रसिद्ध राजा होता है ।।१९।। छठे नवांशकमें जन्मे तो स्त्रीके वशमें रहनेवाला शुभ कामोसे रहित, बहुत बोलनेवाला, नपुंसक, द्रव्यको नष्ट करनेवाला, प्रमादी होता है ।।३२०।। सातवें नवांशकमें जन्म लेवे तो वह बलवान्, बुद्धिमान्, शूरवीर, युद्धमें जीतनेवाला महाउत्साही, संतोषी होता है ।।२१।। आठवें नवांशकमें जन्मे तो वह कृतघ्न ईर्षावाला, पापी, क्लेशभोगी, वहुत सन्तानवाला, फल (कार्य सिद्धिके) कालको त्यागनेवाला होता है ।।२२।। जो जन्मराशिके नवमांशकमें उत्पन्न होवे तो वह क्रियाओंमें कुशल, चतुर, सुंदर प्रतापवाला, जितेंद्रिय भृत्य (नौकरों) वाला हो ।।२३।। इति जन्मराशिनवांशकफलम् ।।

अथ गणफलम्

सुंदरो दानशीलश्च मतिमान्सबलः सदा ।। अल्पभोगी महाप्राज्ञो नरो देवगणोद्भवः ।।२४।। मानी धनी विशालाक्षो लक्ष्यवेधी धनुर्धरः ।। गौरः पौरजनाह्लादी नरो मर्त्यगणोद्भवः ।।२५।। उन्मादी भीषणाकारः सर्वदा कलिवल्लभः ।। नरो दुःखी सदा जातः प्रमेही राक्षसे गणे ।।२६।।

देवगणमें उत्पन्न होनेवाला नर सुंदर, दानी बुद्धिमान्, सदा बलवंत, अल्प भोगी, महापंडित होता है ।।२४।। मनुष्य गणमें उत्पन्न होनेवाला नर मानी, धनी, विशाल नेत्रोंवाला, लक्ष्य (निसाना) को बींधनेवाला, धनुषधारी होता है। गौरवर्ण, पुरके जनोंको आनंद करानेवाला होता है ।।२५।। राक्षस गणमें जन्मनेवाला नर उन्मादी, भयंकर सदा कलह करनेवाला, दुःखी और प्रमेह रोगवाला होता है ।।२६।। इति गणफलम्।

अथ ऋतुफलम्

महोद्यमी मनस्वी च तेजस्वी बहुकार्यकृत् ।। नानादेशरसाभिज्ञो वसन्तर्तुभवो नरः ।।२७।। बह्वारंभो जितक्रोधः क्षुधालुः कामुको नरः ।। दीर्घः शूरो बुद्धिमांश्च ग्रीष्मे जातः सदा शुचिः ।।२८।। गुणवान्भोगयुक्तश्च राजपूज्यो जितेंद्रियः ।। कुशलः सत्यवादी च वर्षर्तूत्थो नरो भवेत् ।।२९।। वाणिज्यकृषिवृत्तिश्च धनधान्यसमृद्धिमान् ।। तेजस्वी बहुमान्यश्च शरज्जातो नरो मतः ।।३३०। बहुवीर्यो नीतिविज्ञो ग्रामयुक्तः सदोद्यमी ।। ह्रस्वपादगलो भीरुर्हेमंते जायते नरः ।।३१।। रूपयौवनसंपन्नो दीर्घसूत्रो महोत्कटः।।क्षुधायुक्तः कामुकश्चशिशिरर्तुभवो नरः।।३२।।

वसंतऋतुमें जन्मनेवाला नर महा उद्यमी, बुद्धिमान्, तेजस्वी, बहुत कार्य करन वाला-अनेक देशोंके व्यवहार को जाननेवाला होता है ।।२७।। ग्रीष्म ऋतुमें जन्मे तो वह बहुत आरंभ कर्त्ता, क्रोधहीन, भूखवाला, कामी, लंबा, शूर वीर, बुद्धिमान् होता है, सदा पवित्र रहता है ।।२८।। गुणवान् भोगसे युक्त, राजपूज्य, जितेंद्रिय, कुशल, सत्यवादी ऐसा नर वर्षा ऋतुमें जन्मनेवाला होता है ।।२९।। वणिज तथा खेती करनेवाला, धन धान्यकी समृद्धिवाला, तेजस्वी, बहुत मान्य ऐसा नर शरदऋतुमें जन्मनेवाला होता है ।।३३०।। बहुत बलवान् , नीति जाननेवाला, ग्रामयुक्त, सदा उद्यमी, छोटे पैरोंवाला, छोटी ग्रीवा-वाला, डरपोक ऐसा नर हेमंतऋतुमें जन्मनेसे होता है ।।३१।। शिशिर ऋतुमें जन्मने वाला नर रूप यौवनसे संयुक्त, दीर्घसूत्री (देरीमें काम करनेवाला,) मंदमंदात्म क्षुधा युक्त, कामी होता है ।।३२।। इति ऋतुफलम् ।।

अथ पक्षफलम्

पूर्णचंद्रनिभः श्रीमानुद्यमी बहुशास्त्रवित् ।। कुशलो ज्ञानसंपन्न शुक्लपक्षभवो नरः ।।३३।। निष्ठुरो दुर्मुखो मूर्खः स्त्रीद्वेषी च जनोज्झितः ।। जायते च परप्रेष्यः कृष्णपक्षोद्भवो नरः ।।३४।।

शुक्लपक्षमें जन्मनेवाला नर पूर्णचंद्रमाके समान कांतिवाला, श्रीमान् उद्यमी, बहुत शास्त्रोंको जाननेवाला, कुशल, ज्ञानसे युक्त हो ।।३३।। कृष्णपक्षमें जन्मनेवाला कठोर, दुर्मुख, मूर्ख, स्त्रीसे वैर करनेवाला, जनोंसे त्यागा हुआ पराई नौकरी करनेवाला हो ।।३४।। इति पक्षफलम् ।।

अथोच्चगतरव्यादिग्रहफलम्

महाधनी महोग्रश्च तुंगस्थे भास्करे नरः ।। सुभूषणो महाभोगी धनी तुंगे निशाकरे ।।३५।। उच्चे भौमे सुपुत्रश्च तेजस्वी गर्वितो नरः ।। मेधावी दृढवाक्यश्च बलाढ्यश्च बुधे भवेत् ।।३६।। राजपूज्यश्च विख्यातो विद्वानार्यो गुरौ नरः ।। स्वोच्चे शुक्रे विलासी च हास्यगीतादिसंयुतः ।।३७।। स्वोच्चगे रविपुत्रे च चक्रवर्ती धनी भवेत् ।। राजलब्धनियोगश्च राहुः शनिसमो मतः ।।३८।।

सूर्य उच्चका होवे तो महाधनी, महाउग्र हो और चंद्रमा उच्चका हो तो सुंदर आभूषणोंवाला, भोगी, धनी, होवे ।।३५।। मंगल उच्चका हो तो सुंदर पुत्रों वाला, तेजस्वी, अभिमानी नर होवे ।। बुध उच्चका हो तो बुद्धिमान्, दृढवाक्यवाला, बलाढ्य होता है ।।३६।। बृहस्पति उच्चका हो तो राजपूज्य, विख्यात, विद्वान् श्रेष्ठजन होवे । शुक्र उच्चका होवे तो विलासी (भोगी) हास्य, गीत आदिकोंमें लगा रहता है ।।३७।। शनि उच्चका हो तो चक्रवर्ती राजा, धनी, वा राजासे लब्ध अधिकारवाला हो, राहुका फल शनिके समान जानना ।।३८।। इति रव्यादीनां स्वोच्चगतफलम् ।।

अथ मूलत्रिकोणगतग्रहफलम्

धनी सुखी कार्यविज्ञो रवौ मूलत्रिकोणगे ।। चन्द्रे धनी सुभोक्ता च भौमे शूरोऽदयः खलः ।।३९।। बुधे त्रिकोणे विज्ञश्च विनोदी विजयी नरः ।। गुरौ ग्राम-पुरादीनां मठस्य च पतिर्भवेत्।।४०।। शुक्रेत्रिकोणेसुज्ञश्चसुखयुक्तो महोत्तमः।।

मंदे नरो धनैः पूर्णो महाशूरः कुलंधरः ॥४१॥ सिंहवृषाजप्रमदाकार्मुकभृत्तौलिकुंभ धराः ॥ मूलत्रिकोणानि रविग्लौभौमज्ञेज्यशुक्रसौरीणाम् ॥४२॥

सूर्य मूलत्रिकोणमें हो तो धनी, सुखी, कार्यको जाननेवाला होवे। चंद्रमा मूलत्रिकोणमें हो तो धनी, भोगी होवे। मंगल हो तो शूर वीर तथा दुष्टजन हो ॥ ३९ ॥ बुध मूलत्रिकोणमें हो तो पंडित, आनंदयुक्त, विजयी मनुष्य हो, बृहस्पति हो तो ग्राम, पुर, मठ इन्हींका पति हो ॥३४०॥ शुक्र त्रिकोणमें हो तो पंडित, सुखयुक्त,; महान् उत्तम जन हो, शनि मूलत्रिकोणमें हो तो धनोंसे परिपूर्ण महाशूर वीर, कुलको बढानेवाला हो ॥४१॥

अथ मूलत्रिकोणलक्षणम् ॥ सिंह, वृष, मेष, कन्या, धन, तुला, कुंभ ये राशि सूर्य, चंद्र, मंगल, बुध, बृहस्पति, शुक्र, शनि इन ग्रहोंकी यथाक्रमसे मूल, त्रिकोण कहलाती है ॥४२॥ इति मूलत्रिकोणफलम् ॥

अथ स्वगृहस्थग्रहफलम्

स्वगृहस्थे रवौ लोके महोग्रश्च महोद्यमी ॥ चन्द्रे धर्मरतः साधुर्मनस्वी रूपवानपि ॥४३॥ स्वगृहस्थे कुजे मल्लो धनवानपराजितः ॥ बुधे नानाकलाभिज्ञः पंडितो धनवान्नरः ॥४४॥ धनी काव्यश्रुतिज्ञश्च सुचेष्टः स्वगृहे गुरौ ॥ स्फीतः कृषीवलः शुक्रे शनौ मान्यः खलो नर : ॥४५॥

सूर्य अपने घरमें बैठा हो तो लोकमें महाउग्र, महाउद्यमी हो। चंद्रमा हो तो धर्ममें रत, साधु, मनस्वी, रूपवान् हो ॥४३॥ मंगल अपने घरमें हो तो मल्ल, धनवान्, अपराजित (नहीं हारनेवाला) हो। बुध हो तो अनेक कला जाननेवाला, धनवान्, पंडित जन हो ॥४४॥ बृहस्पति अपने घरमें हो तो धनी, कवि, वेदवेत्ता, सुंदर चेष्टावाला हो। शुक्र हो तो उज्ज्वल स्वरूपवाला कृषीवल (खेती करनेवाला हो। शनि हो तो मान्य, दुष्टजन होता है ॥४५॥ इति स्वगृहस्थफलम् ॥

अथ मित्रगृहस्थग्रहफलम्

सूर्ये मित्रगृहे ख्यातः शास्त्रज्ञः स्थिरसौहृदः ॥ चंद्रे नरो भाग्ययुक्तश्चतुरो धनवानपि ॥४६॥ भौमे शस्त्रोपजीवी च बुधे रूपधनान्वितः ॥ गुरौ मित्रगृहे पूज्यः सतां सत्कर्मसंयुतः ॥ ४७॥ शुक्रे मित्रगृहे लोके धनी बंधुजनप्रियः ॥ शनौ परान्नभोजी च कुकर्मनिरतो नरः ॥४८॥

सूर्य मित्रके घरमें हों तो प्रसिद्ध, शास्त्रज्ञ, स्थिरमित्रतावाला हो। चंद्रमा हो तो भाग्ययुक्त, चतुर, धनवान् हो ॥४६॥ मंगल हो तो शस्त्रकी आजीविकावाला, बुध हो तो रूप धनसे युक्त हो। बृहस्पति मित्रके घरमें हो तो श्रेष्ठ जनोंका पूज्य, शुभ कर्म करनेवाला हो ॥४७॥ शुक्र मित्रके घरमें हो तो लोकमें धनी, बंधुजनोंका प्रिय हो, शनि मित्रघरमें हो तो पराये अन्नको भोजन करनेवाला, कुकर्मी जन हो ॥ ४८ ॥ इति मित्र राशिस्थरव्यादिफलम्॥

अथ नीचराशिस्थरव्यादिफलम्

नीचे सूर्ये भवेत्प्रेष्यो बंधुभिर्वर्जितो नरः ॥ चंद्रे रोगी स्वल्पपुण्यो दुर्भगो नीचराशिगे ॥४९॥ नीचे भौमे भवेन्नीचः कुत्सितो व्यसनातुरः ॥ बुधे क्षुद्रो बंधुवैरी गुरौ दीनो

मलान्वितः ।।३५०।। शुक्रे नीचे नष्टदारः स्वतंत्रः शीलवर्जितः ।। शनौ काणो दरिद्रश्च गताचारोऽतिगर्हितः ।।५१।।

सूर्य नीचका हो तो सेवा करनेवाला, भाइयोंसे त्यागा हुआ रहै । चंद्रमा नीच राशिका होवे तो रोगी, स्वल्प पुण्यवाला, कंगाल हो ।।४९।। मंगल नीचका हो तो नीच, कुत्सित, व्यसनवाला हो । बुध हो तो तुच्छ जन, बंधु जनोंसे वैर करनेवाला हो । बृहस्पति हो तो दीन मलिन रहै ।।३५०।। शुक्र नीचका हो तो उसकी स्त्री मरै, शीलरहित स्वतंत्र विचरै । शनि नीचका हो तो काणा, दरिद्री हो, आचाररहित, अत्यंत निंदित हो ।।५१।। इति नीचस्थफलम् ।।

अथ शत्रुगृहस्थग्रहफलम्

सूर्ये रिपुगृहे निःस्वो विषयैः पीडितो नरः ।। चंद्रे हृदययोगी च भौमे जायाजडोऽधनः ।।५२।। बुधे रिपुगृहे मूर्खो वाग्धनो दुःखपीडितः ।। जीवेरिभे नरः क्लीबो नाप्तवृत्तिर्बुभुक्षितः ।।५३।। शुक्रे शत्रुगृहे भृत्यः कुबुद्धिर्दुःखितो नरः ।। शनौ व्याध्यर्थशोकेन संतप्तो मलिनो भवेत् ।।५४।।

सूर्य शत्रुके घरमें हो तो दरिद्री, विषयोंसे पीडित जन हो । चंद्रमा हो तो हृदय में रोगवाला हो । मंगल हो तो मूर्खस्त्रीवाला, निर्धन हो ।।५२।। बुध शत्रुके घरमें हो तो मूर्ख, बातोंकाही धनवाला दुःखी हो । बृहस्पति शत्रुके घरमें हो तो नपुंसक हो, आजीविकाहीन बुभुक्षित हो ।।५३।। शुक्र शत्रुके घरमें हो तो भृत्य, कुबुद्धी दुःखी, जन हो शनि हो तो बीमारी और धनके शोकसे दुःखी और मलिन हो ।।५४।। इति शत्रुराशिस्थफलम् ।

अथाश्विन्यादिजन्मनक्षत्रफलम्

सुरूपः सुभगो दक्षः स्थूलकायो महाधनी ।। अश्विनीसम्भवो लोके जायते धनवल्लभः ।।५५।। अरोगी सत्यवादी च सप्राणश्च दृढव्रतः ।। भरण्यां जायते लोके स सुखी मतिमानपि ।।५६।। कृपणः पापकर्मा च क्षुधालुर्नित्यपीडितः ।। अकर्म कुरुते नित्यं कृत्तिका संभवो नरः ।। ५७।। धनी कृतज्ञो मेधावी नृपमान्यः प्रियंवदः ।। सत्यवादी सुरूपश्च रोहिणीजो भवेन्नरः ।।५८।। चपलश्चतुरो धीरः क्रूरकर्माप्यकर्मकृत् ।। अहंकारी परद्वेषी मृगे भवति मानवः ।।५९।। कृतज्ञो गर्वितो हीनो नरः पापरतः शठः ।। आर्द्रानक्षत्रसंजातो धन धान्यविवर्जितः ।।३६०।। शांतः सुखी च भोगी च सुभगो जनवल्लभः ।। पुत्रमित्रादिभिर्युक्तो जायते च पुनर्वसौ ।।६१।। देवधर्मरतो नित्यं बुद्धियुक्तो धनप्रियः ।। पुष्यर्क्षे जायते लोके शांतात्मा सुभगः सुखी ।।६२।। सर्वभक्षः कृतांतश्च कृतघ्नो वंचकः खलः ।। आश्लेषायां नरो जातो भ्रष्टकर्मा च जायते ।।६३।। कल्याणं प्रथमे पादे द्वितीये च धनक्षयः ।। मातुः पीडा तृतीये च पितुः सार्प्पे चतुर्थके ।।६४।। बहुभृत्यो धनी भोगी पितृभक्तो महोद्यमी ।। चमूनाथो राजसेवी मघायां जायते नर ।।६५।। विद्यागोधनसंयुक्तोगंभीरः प्रमदाप्रियः ।। पूर्वाफाल्गुनिजातस्तु सुखी पंडितपूजितः ।।६६।। दाता शूरो मृदुवक्ता धनुर्वेदार्थपण्डितः ।। उत्तराफाल्गुनीजातो महायोद्धा जनप्रियः ।।६७।।

असत्यवचनो दुष्टः सुरापो बंधुवर्जितः ।। हस्ते जातो भवेच्चौरो जायते परदारगः ।।६८।। पुत्रदारयुतस्तुष्टो धनधान्यसमन्वितः ।। देवब्राह्मणभक्तश्च चित्रायां जायते नरः ।।६९।। कोविदो धार्मिकोऽल्पार्थः कृपणः प्रियवल्लभः ।। सुखी स्वदेवभक्तश्च स्वातीजातो भवेन्नरः ।।३७०।। अतिलुब्धोऽतिपापी च निष्ठुरः कलहप्रिय. ।। विशाखायां नरो जातो वेश्याजनरतो भवेत् ।।७१।। पुरुषार्थी प्रवासी च बंधुकार्ये सदोद्यमी ।। अनुराधाभवो लोकः सदा हृष्टश्च जायते ।।७२।। बहुमित्रः प्रधानश्च विद्यार्थी च विचक्षणः ।। ज्येष्ठाजातो धर्मरतो जायते शूद्रपूजितः ।।७३।। स्थिरभोगी च मानी च धनवांश्च सुखी भवेत् ।। तृतीयपादे तुर्ये च मूलाद्येर्धे परित्यजेत् ।। ७४ ।। आद्यपादे पितुः पीडा मूले मातुर्द्वितीयके ।। तृतीये धनहानिश्चतुर्थे सर्वदा सुखम् ।। ।।७५।। दृष्टमात्रोपकारी च भाग्यवांश्च जनप्रियः ।। पूर्वाषाढाजातनरः सकलार्थविचक्षणः ।।७६।। बहुमित्रो महाकायो धार्मिको विनयी सुखी ।। उत्तराषाढसंभूतः शूरश्च विजयी रणे ।।७७।। कृतज्ञो विनयी दाता सदा रोगविवर्जितः ।। श्रीमांश्च बहुसंतानः श्रवणेजायते नरः ।।७८।। गीतप्रियो बंधुमान्यो हेमरत्नैरलंकृतः ।। धनिष्ठायां नरो जातश्चैकःशतपतिर्भवेत् ।।७९।। कृपणो धनपूर्णश्च परदारोपसेवकः ।। मानवः शततारायां विदेशगमने रतः ।।३८०।। वक्ता सुखी प्रजायुक्तो बहुनिद्रो नरर्थकः ।। पूर्वाभाद्रपदाजातो नरो भवति दुःखितः ।।८१।। गौरः समस्तधर्मज्ञः शत्रुघाती च पामरः ।। उत्तराभाद्रनक्षत्रजातः साहसिको भवेत् ।।८२।। संपूर्णांगः शुचिर्दक्षः साधुः शूरो विचक्षणः ।। रेवतीसंभवो लोके धनधान्यैरलंकृतः ।।८३।। निर्वेधे सौम्यसंयुक्ते नक्षत्रे शोभनं फलम् ।। विपरीतफलं तस्मै सवेधे क्रूरपीडिते ।।३८४।। इति जन्मनक्षत्रफलम् ।।

इति श्रीसर्वशास्त्रविशारदश्रीकाशीनाथकृतौ जातकलग्नचन्द्रिकायां प्रथमः परिच्छेदः ।।१।।

अश्विनी नक्षत्रमें जन्मनेवाला नर सुरूप, सुभोगी, चतुर, स्थूल शरीरवाला, महाधनी हो ।।५५।। भरणी नक्षत्रमें जन्मनेवाला नर रोगरहित सत्यवादी, प्राणोंसहित दृढ़ नियमवाला हो, सुखी, बुद्धिमान् होता है ।।५६।। कृत्तिकाविषे जन्मनेवाला नर कृपण, पापी, भूखवाला, नित्य पीडित, बुरे काम करनेवाला होता है ।।५७।। रोहिणी नक्षत्र विषे जन्मनेवाला नर धनी, कृतज्ञ, मेधावी, राजासे मान्य, प्रिय बोलनेवाला, सत्यवादी, सुरूप होता है ।।५८।। मृगशिरमें जन्मनेवाला चपल, चतुर, धीर, क्रूर, बुरे काम करनेवाला हो, अहंकारी और द्वेषी हो ।।५९।। आर्द्रा विषे जन्मनेवाला कृतज्ञ, अभिमानी, हीन, पापरत, मूर्ख, धनधान्यरहित होता है ।।३६०।। पुनर्वसुमें जन्मनेवाला शांत, सुखी, भोगी, ऐश्वर्यवान्, जनोंका प्रिय, पुत्र मित्रादिकोंसे युक्त होता है ।।६१।। पुष्य नक्षत्रमें जन्मनेवाला नर देवधर्ममें नित्य तत्पर, बुद्धियुक्त, धनप्रिय, शांतचित्तवाला, सुंदर, ऐश्वर्यवान्, सुखी

होवे ।।६२।। आश्लेषा नक्षत्र विषे जन्मनेवाला सब कुछ खानेवाला, कृतांत (दुष्टस्वभाववाला), कृतघ्न; ठग, दुष्ट, भ्रष्टकर्म करनेवाला होता है ।।६३।। आश्लेषा नक्षत्रके प्रथम चरणमें जन्मे तो कल्याण करै दूसरे चरणमें जन्मे तो धनको नष्ट करै, तीसरे चरणमें माताको पीडा करै, चौथे चरणमें जन्मे तो पिताको नष्ट करै ।।६४।। मघा नक्षत्रमें जन्मे तो बहुत भृत्योंवाला, धनी, भोगी, पिताका भक्त, महा उद्यमी हो, सेनाका पति, राजसेवी हो ।।६५।। पूर्वाफाल्गुनीमें जन्मे तो विद्या और गौसंबंधी धनसे संयुक्त, गंभीर, स्त्रियोंका प्रिय, सुखी, पंडितजनोंसे पूजित होवे ।।६६।। उत्तराफाल्गुनीमें जन्मे तो दाता, शूर वीर, सरल, उत्तम बोलनेवाला, धनुष विद्यामें निपुण, महायोद्धा, सब जनोंका प्रिय हो ।।६७।। हस्तनक्षत्रमें जन्मनेवाला असत्यवादी, दुष्ट, मदिरा पीनेवाला, बंधुहीन, चोर, पराई स्त्रीसे रमण करनेवाला होता है ।।६८।। चित्रा विषे जन्मनेवाला नर पुत्र स्त्रीसे संयुक्त, प्रसन्न धन धान्यसे संयुक्त, देवता और ब्राह्मणोंका भक्त होता है ।।६९।। स्वातीनक्षत्रमें जन्मनेवाला नर पंडित, धार्मिक, स्वल्प धनवाला, कृपण, स्त्रीसे प्रिय रहनेवाला, सुखी, अपने इष्टदेवका भक्त हो ।।३७०।। विशाखानक्षत्रमें जन्मनेवाला नर अतिलोभी, पापी, कठोर, कलह करनेवाला, वेश्यासे रमण करनेवाला होता है ।।७१।। पुरुषार्थी, परदेशमें रहनेवाला, भाईके काममें सदा उद्यमी, सदा प्रसन्न ऐसा नर अनुराधा नक्षत्रमें जन्मनेवाला होता है ।।७२।। बहुत मित्रोंवाला, मुख्यजन विद्याका प्रयोजनवाला, पंडित, धर्ममें तत्पर, शूद्रजनोंसे पूजित ऐसा नर ज्येष्ठानक्षत्रमें जन्मनेवाला होता है ।।७३।। स्थिर भोगी मानी, धनवान् सुखी, ऐसा नर मूलनक्षत्रके तीसरे चरणमें या चौथे चरणमें जन्मनेवाला होता है, मूलके पूर्वार्द्धको त्यागदे (निषेध है) ।।७४।। मूलके प्रथम चरणमें जन्मे तो पिताको पीडा हो, दूसरेमें जन्मे तो माताको पीडा हो, तीसरेमें जन्मे तो धनकी हानि करै, चौथेमें सब प्रकारका सुख हो ।।७५।। पूर्वाषाढामें जन्मनेवाला नर देखने मात्रसे उपकार करै, भाग्यवान् सब जनोंका प्रिय हो, सब कामोंमें चतुर हो ।। ७६ ।। उत्तराषाढ़ामें जन्मनेवाला नर बहुत मित्रोंवाला, महाशरीरवाला, धार्मिक, विनयी, सुखी, शूर वीर, रणमें विजयी होवे ।।७७।। श्रवणमें जन्मनेवाला कृतज्ञ, विनयी, दानी, सदा रोगसे वर्जित, लक्ष्मीवान्, और बहुत संतानवाला हो ।।७८।। धनिष्ठामें जन्मनेवाला गीतमें प्रिय, बंधुजनोंसे मान्य, सुवर्ण रत्नोंसे विभूषित, तथा अकेलाही सैकडोंका पति होवे ।।७९।। शतभिषामें जन्मनेवाला नर कृपण, धनसे पूर्ण, पराई स्त्रीसे रमण करनेवाला, विदेशमें गमन करनेवाला होता है ।।३८०।। पूर्वाभाद्रपद नक्षत्रमें जन्मनेवाला नर (अच्छे प्रकारसे) कहनेवाला, सुखी, संतानसे युक्त, बहुत नींद वाला, निरर्थक रहनेवाला, दुःखित होवे ।।८१।। उत्तराभाद्रपद नक्षत्रमें जत्मनेवाला गौरवर्ण, सब धर्मको जाननेवाला, शत्रुनाशक, तुच्छजन, हठ करनेवाला होता है ।।८२।। रेवती नक्षत्रमें जन्मनेवाला नर संपूर्ण (उत्तम) अंगोंवाला, पवित्र, चतुर, साधुजन, शूर वीर, पंडित, धन धान्यसे विभूषित होता है ।।८३।। वेधरहित अथवा शुभग्रहसे संयुक्त हुए नक्षत्रविषे जन्मे तो शुभफल हो, जो वेधसहित और क्रूरग्रहसे पीडित नक्षत्र हो तो विपरीत (अशुभ फल) हो ।।३८४।।

इति जन्मनक्षत्रफलम् इति श्रीवेरीपुरनिवासी–गौडवंशोद्भवद्विजशालग्रामात्मज-पंडितवसतिरामविरचितलग्नचंद्रिकाहिन्दीटीकायां प्रथमः परिच्छेदः ।।१।।

अथ द्वितीयपरिच्छेदः

तत्र लग्नादिद्वादशभावस्थरविफलम्

लग्ने सूर्येऽतितीव्रश्च चंचलात्मा स्मरातुरः ।। नेत्ररोगी पीडितांगो जायते चारुणाकृतिः ।।१।। सूर्ये धने विवादी च बहुशत्रुश्च निर्धनः ।। परापवादी सेर्ष्यश्च कृतघ्नश्च नरो भवेत् ।।२।। तृतीयगे दिवनाथे प्रसिद्धो रोगवर्जितः ।। भूपतिश्च दयालुश्च सुशीलः स भवेन्नरः ।।३।। सूर्ये चतुर्थे दुर्बुद्धिः कृशांगः सुखवर्जितः ।। अप्रभावो निष्ठुरश्च दुष्टसंगी भवेन्नरः ।।४।। पञ्चमेऽर्के कोपयुक्तो कुरूपः शीलवर्जितः ।। कुसंगलब्धवृत्तिश्च गतमांसश्च जायते ।।५।। षष्ठे सूर्ये गतारिश्च ख्यातमानः सुखी शुचिः ।। शूरोनुरागी भूपालसंमतश्च भवेन्नरः ।।६।। सप्तमेऽर्के कुदारश्च दुष्टप्रीतोल्पपत्रकः ।। गुह्यरोगी सपापश्च जातको हि प्रजायते ।।७।। अष्टमस्थे दिवानाथे कृतघ्नो हीनमानसः ।। शत्रुदग्धो वृथागामी बंधुहीनश्च जायते ।।८।। नवमस्थे रवौ जातः कुकर्मा भाग्यवर्जितः ।। विद्याविवेकहीनश्च कुशीलश्च प्रजायते ।।९।। दशमेऽर्के बंधुहीनः कुकर्मा शीलवर्जितः ।। स्त्रीचञ्चलो हीनतेजा हीनकोशश्च जायते ।।१०।। लाभे सूर्ये समुत्पन्नो नानालाभसमन्वितः ।। सात्त्विको धार्मिको मानी रूपवानपि जायते ।।११।। व्यये सूर्ये नरो रोगी सत्त्वहीनो वृथाटनः ।। असन्व्ययी पुत्रदारभक्तिहीनश्च जायते ।।१२।।

लग्नमें सूर्य हो तो अत्यंत तेज स्वभाववाला, चञ्चल मनवाला, कामदेवसे पीडित होता है, नेत्ररोगी, पीडित शरीरवाला, लाल आकृतिवाला होवे ।।१।। दूसरे घरमें सूर्य हो तो विवादी, बहुत शत्रुओंवाला, निर्धन, परसे विवाद करनेवाला, कृतघ्न होता है ।।२।। तीसरे घरमें सूर्य हो तो प्रसिद्ध, रोगरहित, राजा, दयालु, तथा सुंदर स्वभाववाला नर होता है ।।३।। चौथे घरमें सूर्य होवे तो दुष्ट बुद्धिवाला, कृशांग, सुखरहित होता है; प्रभावरहित, कठोर, तथा दुष्ट जनोंकी संगतिमें रहै ।।४।। पांचवें घरमें सूर्य हो तो क्रोधयुक्त, कुरूप, शीलरहित, मांसहीन होता है ।।५।। छठे घरमें सूर्य हो तो शत्रुरहित, विख्यात, सुखी, पवित्र, शूर वीर, अनुरागी राजाका संमत (माना हुआ) होता है ।।६।। सातवें घरमें सूर्य हो तो कुत्सित स्त्रीवाला, दुष्टोंसे प्रीति करनेवाला, अल्प पुत्रोंवाला, गुदाके रोगवाला, पापी होता है ।।७।। आठवें घरमें सूर्य हो तो कृतघ्न, हीन मनवाला, शत्रुओं करके दग्ध किया हुआ, वृथागमन करनेवाला, बंधुओंसे हीन होता है ।।८।। नवमें सूर्य हो तो कुकर्मी, भाग्यहीन, विद्याविवेकहीन, दुष्ट स्वभाववाला हो ।।९।। दशमें घरमें सूर्य हो तो बंधुओंसे हीन हो, कुकर्मी, शीलरहित, स्त्रियोंमें चञ्चल, तेजहीन, द्रव्यहीन होता है ।।१०।। ग्यारहवें घरमें सूर्य हो तो जन्मनेवाला नर अनेक लाभोंसे संयुक्त, सत्वगुणी, धार्मिक, मानी, रूपवान् होता है ।।११।। बारहवें घरमें सूर्य हो तो रोगी, बलहीन, वृथागमन करनेवाला, वृथा खर्च करनेवाला, भक्तिहीन होता है ।।१२।। इति सूर्यद्वादशभावफलानि ।

अथ चन्द्रद्वादशभावफलानि

लग्ने चन्द्रे जडः शुद्धः प्रसन्नो धनपूरितः ।। स्त्रीवल्लभो धार्मिकश्च कृतघ्नश्च नरो भवेत् ।।१३।। चंद्रे धने धनैः पूर्णो नृपपूज्यो गुणान्वितः ।। शास्त्रानुरागी सुभगो जनप्रीतश्च जायते ।।१४।। तृतीयस्थे निशानाथे धनविद्यादिभिर्युतः ।। कफाधिकः कामुकश्च वंशमुख्योऽपि जायते ।।१५।। चतुर्थस्थे निशानाथे पुत्रदारसमन्वितः ।। धनी सुखी यशस्वी च विद्यावानपि स स्मृतः ।।१६।। सुते चंद्रे सुताढ्यश्च रोगी कामी भयानकः ।। कृत्रिमैः पौरुषैर्युक्तो विनयी च भवेन्नरः ।।१७।। षष्ठे चंद्रे वित्तहीनो मृदुकायोतिलालसः ।। मन्दाग्निस्तीक्ष्णदृष्टिश्च पापबुद्धिर्भवेन्नरः ।।१८।। चंद्रे च सप्तमे जातो दुःखी कष्टी च वञ्चकः ।। कृपणो बहुवैरी च जायते पारदारिकः ।।१९।। अष्टमे तारकानाथो दीनोऽल्पायुः सकष्टकः ।। प्रगल्भश्च कृशांगश्च पापबुद्धिर्भवेन्नरः ।।२०।। धर्मे चंद्रे चारुकांतिःस्वधर्मनिरतः सदा ।। वीतिरोगः सतां श्लाघ्यः पापहीनश्च जायते ।।२१।। कर्मस्थाने सुधारश्मौ बहुभाग्यो महाधनी ।। मनस्वी च मनोज्ञश्च राजमान्यश्च जायते ।।२२।। लाभे चंद्रे लाभयुतः प्रगल्भः सुभगो नरः ।। सुमार्गगामी लज्जालुः प्रतापी भाग्यवान् भवेत् ।।२३।। व्यये चंद्रे पापबुद्धिर्बहुभक्षी पराजितः ।। कुसाधमो मद्यपश्च विकारी जातको भवेत् ।।२४।।

लग्नमें चंद्रमा हो तो जड, शुद्ध, प्रसन्न, धनसे पूरित, स्त्रीका पियारा, धार्मिक कृतघ्न होता है ।।१३।। धन स्थानमें चंद्रमा हो तो धनसे परिपूर्ण, राजासे पूज्य, गुण-युक्त, शास्त्रानुरागी, सुंदर जनोंसे प्रीति करनेवाला हो ।।१४।। तीसरे घरमें चंद्रमा हो तो धन और विद्यादिकोंसे युक्त हो, अधिक कफवाला, कामी, वंशमें मुख्य होता है ।।१५।। चौथे घरमें चंद्रमा हो तो पुत्र और स्त्रीसे युक्त हो, धनी, सुखी, यशस्वी, विद्यावान् भी होता है ।।१६।। पांचवें घरमें चंद्रमा हो तो पुत्रयुक्त, रोगी, कामी, भयानक हो, कृत्रिम पुरुषार्थोंसे युक्त, विनयवाला नर होता है ।।१७।। छठे घरमें चंद्रमा हो तो धनहीन, कोमल शरीरवाला, अत्यन्त लालची, मन्दाग्निवाला, तीक्ष्ण दृष्टिवाला, पापबुद्धिवाला हो ।।१८।। सातवें चंद्रमा हो तो दुःखी, कष्टी, ठग, कृपण, बहुत शत्रुओंवाला, पराई स्त्रीसे रमण करनेवाला हो ।।१९।। आठवें घरमें चंद्रमा हो तो दीन [गरीब], अल्प आयुवाला, कष्टवाला, प्रगल्भ (भरखम) दुवला, पापबुद्धिवाला हो ।।२०।। नवमें घरमें चंद्रमा हो तो उत्तम कांतिवाला, सदा अपने धर्ममें रत, रोगरहित, श्रेष्ठ जनोंसे श्लाघ्य, पापहीन हो ।।२१।। दशवें घरमें चंद्रमा हो तो बहुत भाग्यवाला, महाधनी, मनस्वी, मनोहर, राज्यमान्य हो ।।२२।। ग्यारहवें घरमें चंद्रमा हो तो लाभयुक्त, प्रगलभ (भरखम) ऐश्वर्य-वान्, सुमार्गगामी, लज्जावाला, प्रतापी भाग्यवान् होता है ।।२३।। बारहवें घरमें चंद्रमा हो तो पापवुद्धिवाला, वहुत खानेवाला, हारनेवाला, कुलमें अधम, मदिरा पीनेवाला, विकारी हो ।।२४।। इति लग्नादिद्वादशभावस्थचंद्रफलम् ।

अथ लग्नादिद्वादशभावस्थकुजफलम्

भौमे लग्ने कुरूपश्च रोगी बंधुविवर्जितः । असत्यवादी निर्द्रव्योजायते

पारदारिकः ॥२५॥ धने कुजे धनैर्हीनः क्रियाहीनश्च जायते ॥ दीर्घसूत्री सत्यवादी पुत्रवानपि मानवः ॥ २६॥ तृतीयगे कुजे जातः प्रतापी शीलसंयुतः ॥ रणे शूरो राजमान्यो भुवि ख्यातश्चजायते ॥२७॥ चतुर्थे भूसुते कृष्णः पित्ताधिक्ययोरि-निर्जितः ॥ वृथाटनो हीनपुत्रो महाकामी च जायते ॥२८॥ पञ्चमस्थे धरासूनौ कुसंतानः सदा रुजः ॥ बंधुवर्गे विरक्तश्च नरो बुद्धिविवर्जितः ॥२९॥ षष्ठे भौमे शत्रुहीनो नानार्थैः परिपूरितः ॥ स्त्रीलालसः पुष्टदेहः शुभचित्तश्च जायते ॥३०॥ भूमिपुत्रे सप्तमगे रुधिरावतोपि कोपवान् ॥ नीचसेवी वञ्चकश्च निर्गुणोपि भवेन्नरः ॥३१॥ अष्टमे मंगले कुष्ठी स्वल्पायुः शत्रुपीडितः ॥ अल्पद्रव्यः सरोगश्च निर्गुणोपि हि जायते ॥ ३२॥ धर्मस्थे धरणी पुत्रे कुकर्मा गतपौरुषः ॥ नीचानुरागी क्रूरश्च सकष्टश्च प्रजायते ॥३३॥ कर्मभावे महीपुत्रे शुभकर्मा शुभान्वितः ॥ सुपुत्री स्यात्सुखी शूरो गर्विष्ठोपि भवेन्नरः ॥३४॥ लाभे भौमे भूरिलाभो नानापापान्न-भक्षकः ॥ नेत्ररोगीभूपमान्यो देवद्विजरतो नरः ॥३५॥ असद्व्ययी व्यये भौमे नास्तिको निष्ठुरः शठः ॥ बहुवैरी विदेशे च सदा गच्छति मानवः ॥३६॥

मंगल लग्नमें हो तो कुरूप, रोगी, बंधुहीन, झूठ बोलनेवाला, निर्धन, अन्य स्त्रीसे रमण करनेवाला हो ॥२५॥ धनस्थानमें मङ्गल हो तो धनहीन, क्रियाहीन, दीर्घसूत्री, सत्य बोलनेवाला, पुत्रवान् हो ॥२६॥ तीसरे घरमें मङ्गल हो तो प्रतापी, शीलयुक्त, युद्धमें शूर, वीर, राजमान्य, पृथ्वीपर विख्यात होता है ॥२७॥ चौथे घरमें मङ्गल हो तो काला वर्णवाला, अधिक पित्तवाला शत्रुओंसे हारा हुआ, वृथागमन करनेवाला, पुत्र-हीन, महाकामी होता है ॥२८॥ पांचवें घरमें मंगल हो तो नेष्ट संतानवाला, सदारोगी बंधुजनोंमें विरक्त, बुद्धिरहित जन होता है ॥२९॥ छठे घरमें मंगल हो तो शत्रुरहित अनेक धनोंसे परिपूरित, स्त्रीकी लालसावाला, पुष्ट शरीरवाला, शुभ चित्तवाला होता है ॥३०॥ मंगल सातवें घरमें हो तो रुधिरसे भरा हुआ, क्रोधी, नीच जनोंकी सेवा करनेवाला, ठग, निर्गुण मनुष्य होता है ॥३१॥ आठवें मंगल हो तो कुष्ठी, स्वल्प आयुवाला, शत्रुसे पीडित, अल्प द्रव्यवाला, रोगी, और निर्गुण हो ॥३२॥ नवमें घरमें मंगल हो तो कुकर्मी पुरुषार्थरहित, नीच जनोंका स्नेही, क्रूर, कष्टसहित रहता है ॥३३॥ दशवें घरमें मङ्गल हो तो शुभ कर्मवाला, आनंदयुक्त, सुंदर पुत्रोंवाला, सुखी, शूर वीर, अभिमानी हो ॥३४॥ ग्यारहवें घरमें मंगल हो तो बहुत लाभ हो, अनेक प्रकारके पापान्नको भक्षण करै, नेत्र-रोगी, राजमान्य, देवता और ब्राह्मणकी भक्तिवाला हो ॥३५॥ बारहवें घरमें मंगल हो तो बुरे काममें द्रव्य खर्चकरनेवाला, नास्तिक, कठोर, मूर्ख, बहुतोंका वैरी, सदा परदेशमें गमन करै ॥३६॥ इति तन्वादिभावागतभौमफलम् ॥

अथ तन्वादिभावगतबुधफलम्

लग्नेबुधे च गीतज्ञो निष्पापो भूपपूजितः ॥ रूपज्ञानयशोयुक्तः प्रगल्भो मानवो भवेत् ॥३७॥ धनभावे चंद्रपुत्रे धनधान्यादिपूरितः ॥ शुभकर्मा सुखी नित्यं राज-पूज्यश्च जायते ॥३८॥ तृतीयस्थे बुधे जातः प्रशस्तो बंधुमानितः ॥ धर्मध्वजी

यशस्वी च गुरुदेवार्चको भवेत् ।।३९।। चतुर्थे चंद्रपुत्रे च बहुभृत्ययशोन्वितः ।। पटुवाक्यो भाग्ययुक्तः सत्यवादी च जायते ।।४०।। पञ्चमे रोहिणीपुत्रे पुत्रपौत्रसमन्वितः ।। सुबुद्धिः सत्त्वसंपन्नः सुखी भवति मानवः।।४१।। षष्ठे बुधे नृशंसश्च विरोधी सर्वबंधुषु । ईर्षाधिकः कामपरो विद्वानपि भवेन्नरः ।।४२।। सप्तमस्थे सोमपुत्रे रूपविद्याधिको नरः ।। सुशील कामशास्त्रज्ञो नारीमान्यश्च जायते ।।४३।। बुधेऽष्टमे कृतघ्नश्च कुबुद्धिः पारदारिकः ।। कामातुरोऽसत्यवादी रोगयुक्तो भवेन्नरः ।।४४।। धर्मे बुधे धार्मिकश्च कूपारामादिकारकः ।। सत्यवादी च दांतश्च जायते पितृवत्सलः।।४५।। दशमस्थे बुधे जातो धनधान्ययशोन्वितः।। बहुभाग्यश्च विजयी कांतियुक्तश्च मानवः ।।४६।। लाभे बुधे नित्यलाभो नीरोगश्च सदा सुखी ।। जनानुरागवृत्तिश्च कीर्तिमानपि जायते ।।४७।। बुधे व्ययेव्ययी लोके रोगी बंधुसमन्वितः ।। पापासक्तः पराधीनः परपक्षी च जायते ।।४८।।

लग्नमें बुध हो तो गायन विद्या जाननेवाला, पापरतिह, राजासे पूजित, रूपवान् और यशसे संयुक्त भरखम हो ।।३७।। दूसरे घरमें चंद्रमा हो तो धन धान्यसे भरपूर, शुभ कर्म करनेवाला, नित्य सुखी राजपूज्य होवे ।।३८।। तीसरे घरमें चंद्रमा हो तो श्रेष्ठजन, बधुओंसे मान्य, धर्मकी ध्वजारूप, यशवाला, गुरु और देवताका पूजक हो ।।३९।। चौथे घरमें बुध हो तो बहुत भृत्योंवाला, यशयुक्त, अच्छा बोलनेवाला, भाग्ययुक्त, सत्य बोलनेवाला हो ।।४०।। पांचवें घरमें बुध हो तो पुत्र पौत्रादिकोंसे युक्त हो, सुंदर बुद्धिवाला, बलयुक्त, सुखी मनुष्य हो ।।४१।। छठे घरमें बुध हो तो जन्मनेवाला नर क्रूर हो, सब बंधुओंमें विरोधी, अधिक ईर्षावाला, काममें तत्पर, विद्वान् हो ।।४२।। सातवें घरमें बुध हो तो अधिक रूप और अधिक विद्यावाला हो, सुंदर शीलवाला, काम शास्त्रको जाननेवाला, स्त्रियोंसे मान्य हो ।।४३।। आठवें घरमें बुध हो तो कृतघ्न, कुबुद्धि, पराई स्त्रीसे रमण करनेवाला, कामातुर, असत्य बोलनेवाला, रोगसे युक्त होता है ।।४४।। नवमें स्थानमें बुध हो तो धार्मिक, वापी और बाग आदिके करनेवाला, सत्य बोलनेवाला (दांत), जितेंद्रिय, पिताका प्रिय हो ।।४५।। दशवें घरमें बुध हो तो धन धान्य और यशसे युक्त, बहुत भाग्यवाला, विजयी, कांतियुक्त मनुष्य होता है ।।४६।। ग्यारहवें घरमें बुध हो तो नित्यलाभ हो, रोगरहित, सदा सुखी रहै, मनुष्योंमें स्नेह रक्खै, कीर्तिमान् हो ।।४७।। बारहवें घरमें बुध हो तो संसारमें द्रव्य खर्चनेवाला हो, रोगी हो, बंधुजनोंसे युक्त हो, पापमें आसक्त रहै, पराधीन अन्यका पक्षकरनेवाला हो ।।४८।। इति बुधद्वादशभावफलम् ।।

अथ गुरुद्वादशभावफलम्

लग्ने गुरौ सुशीलश्च प्रगल्भो रूपवानपि।। नृपाभीष्टश्च नीरोगी ज्ञानी सौम्यश्च जायते ।।४९।। धने जीवे धनी लोकः कृतज्ञो बंधुसंयुतः ।। गजाश्वमहिषीयुक्तः कांतिमानपि जायते ।।५०।। जीवे तृतीये तेजस्वी कर्मदक्षो जितेंद्रियः ।। मित्राप्तसुखसंपन्नस्तीर्थयात्राप्रियो भवेत् ।।५१।। सुखे जीवे सुखी लोके सुभगो राजपूजितः ।। विजितारिः कुलाध्यक्षो गुरुभक्तश्च जायते।।५२।। सुते जीवे सुतैर्युक्तो

धार्मिकः पंडितः सुखी ।। शुद्धचेता दयायुक्तो विनयी च भवेन्नरः ।।५३।। षष्ठे गुरौ विघ्नयुक्तो बहुशत्रुरनिष्ठुरः ।। उद्वेगी मतिहीनश्च कामुको जायते नरः ।।५४।। सप्तमस्थे सुराचार्ये कामचित्तो महाबलः ।। धनी दाता प्रगल्भश्च चित्रकर्मा प्रजायते ।।५५।। जीवेऽष्टमे सदा रोगी कृपणः शोकसंयुतः ।। बहुवैरीकुकर्मा च कुरूपश्च भवेन्नरः ।।५६।। धर्मे जीवे धर्मकर्ता साधुसंगी च शास्त्रवित् ।। विनयी तीर्थसेवी च ब्रह्मज्ञश्च स जायते ।।५७।। कर्मभावगते जीवे पुण्यकीर्तिसुखान्वितः ।। राजतुल्यः सुरूपश्च दयालुर्जायते नरः ।। ।।५८।। लाभे गुरौ विवेकी स्याद्धस्त्यश्वादिधनैर्युतः ।। अलोलुपः सुरूपश्च गुणवानपि जायते ।।५९।। व्यये बृहस्पतौ रोगी व्यसनी परधर्मकृत् ।। बंधुवैरी नीचसेवी गुरुद्वेषी च जायते ।।६०।।

लग्नमें बृहस्पति हो तो सुंदर शीलवाला, भरखम, रूपवान्, राजासे मान्य, रोगरहित, ज्ञानी, सौम्य जन हो ।।४९।। दूसरे घरमें बृहस्पति हो तो धनी, कृतज्ञ बन्धुजनोंसे युक्त हो, हस्ती घोड़े और भैंस इन्होंसे युक्त हो, कांतिमान् हो ।।५०।। तीसरे घरमें बृहस्पति हो तो तेजस्वी, काममें चतुर, जितेंद्रिय, मित्रसे प्राप्त सुखसे संपन्न हो, तीर्थ यात्रामें प्रीतिवाला नर हो ।।५१।। चौथे घरमें बृहस्पति हो तो संसारमें सुखी ऐश्वर्यवान् हो, राजासे मान्य, शत्रुओंको जीतनेवाला, कुलका पति, गुरुकी भक्तिवाला हो ।।५२।। पांचवें घरमें बृहस्पति हो तो पुत्रादिकोंसे युक्त हो, धार्मिक, पंडित, सुखी हो, शुद्ध चित्तवाला, दयायुक्त, विनयी जन होवे ।।५३।। छठे घरमें बृहस्पति हो तो विघ्नयुक्त, वहुत शत्रुओंवाला, कठोर, उद्वेगी, बुद्धिहीन, कामी जन होता है ।।५४।। सातवें घरमें बृहस्पति हो तो कामी, महावली, धनी, दानी, प्रगल्भ (भरखम), विचित्र कर्म करनेवाला हो ।।५५।। आठवें घरमें बृहत्स्पति हो तो सदारोगी, कृपण, शोकसंयुक्त, बहुतोंका वैरी, कुरूपी होवे ।।५६।। नवमें घरमें बृहस्पति हो तो साधुओंका संगी, शास्त्रको जाननेवाला, विनयी, तीर्थसेवा करनेवाला, व्रह्मवेत्ता हो ।।५७।। दशवें घरमें बृहस्पति हो तो पुण्य, कीर्ति, सुख, इनसे युक्त हो, राजाके समान हो, सुंदर रूपवाला दयालु जन हो ।।५८।। ग्यारहवें घरमें बृहस्पति हो तो ज्ञानी, हस्ती घोड़े आदि धनोंकरके युक्त, अत्यंत तृष्णा करके रहित, सुंदर रूपवाला, गुणवान् भी होवे ।।५९।। बारहवें घरमें बृहस्पति हो तो रोगी हो, व्यसनी हो, सदा पराये धर्मको करै, बंधुओंसे वैर करै. नीचसेवी, गुरुका द्वेषी हो ।।६०।। इति गुरुद्वादशभावफलम् ।।

अथ शुक्रद्वादशभावफलम्

लग्नेशुक्रे सुशीलश्च वृत्तिमानपि सुंदरः ।। शुचिर्विद्वान्मनोज्ञश्च धार्मिकश्च भवेन्नरः ।।६१।। धने शुक्रे धनी विद्वान्बन्धुमान्यो नृपार्चितः ।। यशस्वी गुरुभक्तश्च कृतज्ञश्च भवेन्नरः ।।६२।। भार्गवे सहजे जातो धनधान्यसुतान्वितः ।। नीरोगी राजमान्यश्च प्रतापी जापि जायते ।।६३।। सुखे शुक्रे सुखी विज्ञो बहुभार्यो धनान्वितः ।। ग्रामाधिपो यशस्वी स्याद्विवेकी च भवेन्नरः ।।६४।। सुते शुक्रे समृद्धश्च सुरूपोऽपि सदा नरः ।। पुत्रकन्यापौत्रयुतः सुभगोपि भवेन्नरः ।।६५।। षष्ठे शुक्रो भवेद्दम्भी जाड्य-

हानिभयान्वितः ।। दुःसंगी कलही तातद्वेषी चैव सदा नरः ।।६६।। सप्तमे भृगुपुत्रे स्याद्धनी दिव्यांगनायुतः।। नारोगः सुखसंपन्नो बहुभाग्यश्च जायते ।।६७।। अष्टमस्थे दैत्यपूज्ये सरोगः कलहप्रियः ।। वृथाटनी कार्यहीनो जनानां च प्रियो मतः ।।६८।। धर्मे शुक्रे धर्मपूर्णो ज्ञानवृद्धः सुखी धनी ।। नरेन्द्रमान्यो विजयी नराणां च प्रियः सदा ।।६९।। कर्मस्थिते भृगोः पुत्रे सुकर्मा निधिरत्नवान् ।। राजसेवी धार्मिकश्च जायते दयिताप्रियः ।।७०।। लाभे शुक्रे सदा लाभो यशःसत्यगुणान्वितः ।। धनी भोगी क्रियाशुद्धो जायते मानवोत्तमः ।।७१।। व्यये शुक्रे व्ययाढयश्च गुरुमित्र-विरोधवान् ।। मिथ्यावादी बंधुवर्गे गुणहीनोपि जायते ।।७२।।

लग्नमें शुक्र हो तो सुंदर शीलस्वभाववाला, अच्छी वृत्तिवाला, सुंदर, पवित्र, विद्वान् मनोहर, धार्मिक नर होवे ।।६१।। दूसरे घरमें शुक्र हो तो धनी, विद्वान् बंधुओंसे मान्य, राजासे पूजित हो, यशस्वी, गुरुका भक्त कृतज्ञ होवे ।।६२।। तीसरे घरमें शुक्र हो तो धन धान्य और पुत्रसे युक्त, रोगरहित, राजमान्य, प्रतापी हो ।।६३।। चौथे घरमें शुक्र हो तो सुखी, पंडित हो, बहुत स्त्रियोंवाला, धनसे युक्त हो, ग्रामका अधिपति, यशस्वी, विवेकी हो ।।६४।। पांचवें घरमें शुक्र हो तो समृद्धिमान्, सुंदर, रूपवान् हो, पुत्र पौत्रा-दिकोंसे युक्त हो, बहुत ऐश्वर्यवान् हो ।।६५।। छठे घरमें शुक्र हो तो पाखंडी हो, मूर्खता रहै, निर्भयपना रहै, दुष्ट जनोंकी संगतिवाला, कलहकारी, पितासे वैर करनेवाला हो ।।६६।। सातवें घरमें शुक्र हो तो धनी, दिव्यस्त्रीसे संयुक्त, रोगरहित, सुखसंपन्न, तथा बहुत भाग्यवान् हो ।६७।। आठवें घरमें शुक्र हो तो रोगी हो, कलहमें प्रीति रहै, वृथा गमन करता रहै, कार्यहीन हो, सब जनोंका प्रिय हो ।।६८।। नवमें घरमें शुक्र हो तो धर्मसे परिपूर्ण हो, ज्ञान बढ़ा हुआ, सुखी, धनी हो, राजासे मान्य, विजयी, मनुष्योंका सदा प्रिय रहै ।।६९।। दशवें घरमें शुक्र हो तो सुंदर काम करनेवाला, खजाना तथा रत्नोंवाला, राजसेवी, धार्मिक, स्त्रीका प्रिय हो ।।७०।। ग्यारहवें घरमें शुक्र हो तो सदा लाभ हो, यश, सत्य, और गुणसे युक्त हो, धनी, भोगी, शुद्ध क्रियावाला, उत्तम मनुष्य हो ।।७१।। बारहवें घरमें शुक्र हो तो खर्चावाला, गुरु मित्रसे विरोध करनेवाला, गूढ बोलनेवाला, बंधुजनोंमें गुणहीन हो ।।७२।। इति शुक्रद्वादशभावफलम् ।

अथ शनिद्वादशभावफलम्

लग्ने शनौ सदा रोगी कुरूपः कृपणो नरः।। कुशीलः पापबुद्धिश्च शठश्च भवति ध्रुवम् ।।७३।। धने मंदे धनैर्हीनो वातपित्तकफातुरः ।। देहास्थिपित्तरोगश्च गुणैः स्वल्पोपि जायते ।।७४।। छायात्मजे तृतीयस्थे प्रसन्नो गुणवत्सलः ।। शत्रुमर्दी नृणां मान्यो धनी शूरश्च जायते ।।७५।। सुखे मन्दे सुखैर्हीनो हृतार्थो बांधवैर्नरः ।। गुणस्वभावो दुःसंगी कुजनैश्च न संशयः ।।७६।। पुत्रे मन्दे पुत्रहीनः क्रिया कीर्ति-विवर्जितः ।। हीनकोशो विरूपश्च मानवो भवति ध्रुवम् ।।७७।। शत्रुभावस्थिते मंदे शत्रुहीनो महाधनी ।। पशुपुत्रयशोयुक्तो नीरोगी जायते नरः ।।७८।। कलत्रस्थे मित्रपुत्रे सकलत्रो रुजान्वितः ।। बहुशत्रुर्विवर्णश्च कृशश्च मलिनो भवेत् ।।७९।।

क्रोधातुरोऽष्टमे मंदे दरिद्रो बहुरोगवान्।। मिथ्याविवादकर्त्तास्याद्वातरोगी भवेन्नरः ।।८०।। धर्मे मन्दे धर्महीनो विवेकी च रिपोर्वशः ।। नृशंसो जायते लोके परदाररतः सदा ।।८१।। कर्मभावे सूर्यपुत्रे कुकर्मा धनवर्जितः।। दयासत्यगुणैर्हीनश्चंचलोऽपि भवेत्सदा ।।८२।। छायात्मजे तु लाभस्थे सर्वविद्याविशारदः ।। खरोष्ट्रमहिषैः पूर्णो राजमान्योऽशुचिर्भवेत् ।।८३।। असद्व्ययी व्यये मन्दे कृतघ्नो वित्तवर्जितः।। बन्धुवैरी कुवेषः स्याच्चंचलश्च सदा नरः ।।८४।।

लग्नमें शनि हो तो सदा रोगी रहै, कुरूप, कृपण कुशील, पाप बुद्धिवाला, निश्चय मूर्ख होवे ।।७३।। दूसरे घरमें शनि हो तो धनहीन, वात पित्त कफसे पीडित, देहमें अस्थिरोग, तथा पित्तरोगवाला, स्वल्प गुणी हो ।।७४।। तीसरे घरमें शनि हो तो प्रसन्न, गुणमें प्रिय, शत्रुओंका नाशक, मनुष्योंका मान्य, धनी, शूरवीर होवे ।।७५।। चौथे घरमें शनि हो तो सुखहीन, बंधु जनों करके हरा हुआ धनवाला–अर्थात् उसके भाई धनको हर लेवें, गुणका स्वभाववाला, दुष्ट जनोंके साथ दुष्ट संगवाला निश्चय हो ।।७६।। पांचवें घरमें शनि हो तो पुत्रहीन, क्रिया कीर्तिहीन, द्रव्यहीन बुरे रूपवाला हो ।।७७।। छठे घरमें शनि हो तो शत्रुहीन, महाधनी, पशुपुत्र यशयुक्त, रोगरहित हो ।।७८।। साहवें घरमें शनि हो तो स्त्रीसहित रोगी रहै, बहुत शत्रु रहैं, बुरा वर्ण हो, दुबला हो, मलीन हो ।।७९।। आठवें शनि हो तो क्रोधातुर, दरिद्री, बहुत रोगवाला हो, झूठ विवाद करनेवाला, वातरोगी मनुष्य होवे ।।८०।। नवमें घरमें शनि हो तो धर्महीन हो, ज्ञानी हो, शत्रुके वशमें रहै, क्रूर, पराई स्त्रीसे सर्वदा रमण करनेवाला हो ।।८१।। दशवें घरमें शनि हो तो कुकर्मी, धनहीन हो, दया सत्य और गुण करके हीन हो, सदा चन्चल रहैं ।।८२।। ग्यारहवें घरमें शनि हो तो सब विद्यामें निपुण हो, गधा, ऊंट, भैंस इत्यादिकोंसे पूर्ण, राजाके मान्य रहै और अपवित्र रहै ।।८३।। बारहवें घरमें शनि हो तो वृथा खर्च करे, कृतघ्न हो, धनहीन होवे, बंधुओंका वैरी, कुवेश धारण रक्खे सर्वदा चन्चल रहै। (राहुकेतुका फल शनिके समान जानना ।।८४।। इति लग्नादिद्वादशभावगतशनिफलम् ।।

अथ स्त्रीजन्मलग्नविचारः

लग्ने च सप्तमे पापे सप्तमे वत्सरे पतिः ।। म्रियते चाष्टमे वर्षे चन्द्रो षष्ठेऽष्टमे यदा ।।८५।। गुरौ शुक्रे मृतापत्या मृतगर्भा च मंगले ।। अष्टमस्थो ग्रहो नूनं स्त्रियाश्चेत् शोभनो न सः ।।८६।। एकः पुत्रो भवेद्राजा पंचमस्थो यदा रविः ।। मंगले च त्रयः पुत्राः गुरौ पंच प्रकीर्तिताः ।।८७।। पंचमस्थे निशानाथे स्त्रियाः कन्याद्वयं भवेत् ।। बुधे कन्याश्चतस्रश्च शुक्रे सप्त च कन्यकाः ।।८८।। षडेव कन्या जायंते धर्मस्थाने यदा सितः ।। सप्तमे चेद्यदा राहुः स्त्रियाः पुत्रस्तदा भवेत् ।।८९।। सुरूपा भार्गवे लग्ने साहंकारा धरासुते ।। बुधेवक्रा गुरौशुद्धा शनौ दारिन्द्य दुर्भगा ।।९०।। पापयोरन्तरे लग्ने चन्द्रे वा यदि कन्यका ।। जायते च तदा हंति पितृश्वशुरयोः कुलम् ।।९१।। द्वादशे चाष्टमे भौमे क्रूरे तत्रैव संस्थिते ।। लग्ने च सिंहिकापुत्रे रंडा भवति कन्यका ।।९२।। सप्तमे भार्गवे जाता कुलदोषकरी भवेत् ।।

कर्कराशिस्थिते भौमे स्वैरं भवति वेश्मसु ।।९३।। लग्नात्सप्तमगः पापश्चंद्रात्सप्तमगोऽपि वा ।। सद्यो निहंति दम्पत्योरेको नास्त्यत्र संशयः ।।९४।। लग्ने व्यये चतुर्थे च पञ्चमे सप्तमे ग्रहाः ।। पतिवश्या भवेन्नारी नारीवश्यो भवेत्पतिः ।।९५।। इति स्त्रीजन्मलग्नाद्ग्रहयोगफलम् ।।

इति श्रीस० काशीनाथकृतजातकलग्नचन्द्रिकायां
ग्रहयोगो नाम द्वितीयः परिच्छेदः ।।२।।

अथ स्त्रीजन्मलग्नविचारः। लग्नमें और सातवें पापग्रह हो तो सातवें वर्षमें पति मरै, जो छठे आठवें घरमें चंद्रमा हो तो आठवें वर्षमें पति मरै ।।८५।। बृहस्पति और शुक्र आठवें घरमें होवे तो उसके संतान नहीं जीवे, आठवें घरमें मंगल हो तो गर्भ नष्ट हो, स्त्रीके जन्मसमय आठवें घरमें कोई ग्रह शुभदायी नहीं है ।।८६।। पांचवें घरमें सूर्य हो तो एकही पुत्र राजा हो, मंगल हो तो तीन पुत्र हों, बृहस्पति हो तो पांच पुत्र हों ।।८७।। पांचवें चंद्रमा हो तो स्त्रीके दो कन्या होवें, बुध हो तो चार कन्या हों, शुक्र हो तो स्त्रीके सात कन्या हों ।।८८।। यदि नवमें घरमें शुक्र हो तो छह कन्या हों सातवें घरमें राहु हो तो स्त्रीके पुत्र हो ।।८९।। शुक्र लग्नमें हो तो सुंदर रूपवती स्त्री हो, मंगल हो तो अहंकार युक्त स्वभाववाली हो, बुध हो तो कुटिला, बृहस्पति हो तो शुद्ध हो, शनि हो तो दरिद्री दुर्भागी हो ।।९०।। पापग्रहोंके मध्यमें लग्न हो अथवा चंद्रमा हो तो जन्मनेवाली कन्या पिता और ससुरालके कुलको नष्ट करै ।।९१।। बारहवें, आठवें घरमें मंगल हो और तहांही क्रूर ग्रह बैठा हो, लग्नमें राहु हो तो वह कन्या रांड हो ।।९२।। सातवें शुक्र हो तो जन्मनेवाली कन्या कुलको दोष लगानेवालै हो, कर्क राशिपर मंगल हो तो व्यभिचारिणी हो ।।९३।। लग्नसे सातवें घरमें और चंद्रमासे भी सातवें घरमें यदि एक भी पापग्रह हो तो शीघ्रही पतिसहित स्त्रीको नष्ट करै इसमें संदेह नहीं ।।९४।। लग्नमें, बारहवें, चौथे, पांचवें, सातवें, ग्रह होवें तो स्त्री पतिके वशमें रहै, पति स्त्रीके वशमें रहै ।।९५।।

इति श्रीवेरीपुरनिवासिद्विजशालग्रामात्मजपंडितवसतिरामविरचिते
लग्नचन्द्रिकाहिन्दीटीकायां द्वितीयः परिच्छेदः ।।२।।

अथ तृतीयपरिच्छेदः

अथ सूर्यपुरुषाकृतिचक्रम्

लिखित्वा नरचक्रं च यत्र सूर्यो व्यवस्थितः। तन्नक्षत्रादिकं कृत्वा त्रयं दद्याच्च मस्तके ।।९६।। वदने च त्रयं दद्यादेकैकं स्कंधयोर्द्वयोः ।। बाहुद्वये तथैकैकं पाण्योरेकैकमेव च ।।९७।। ऋक्षाणि हृदये पञ्च नाभौ स्यादेकमेव हि ।। ऋक्षं गुह्ये

भवेदेकमेकैकं जानुनोर्द्वयोः ॥९८॥ नक्षत्राणि षडन्यानि निबध्यात्पादयोर्बुधः ॥
सूर्यनक्षत्रतो जन्मनक्षत्रावधि गण्यते ॥९९॥ मस्तकस्थे च नक्षत्रे पट्टबंधी भवेन्नरः ॥
मुखे मिष्टान्न भोक्ता स्यात्स्कंधभे गजवाहनः ॥१०० ॥५००॥ बाह्वोर्भे बलवान्मर्त्यः पाणिभे तस्करो भवेत् ॥ हृदये चेश्वरो जातो नाभौ स्वल्पेन तोषितः ॥१॥
गुह्यभे परदारः स्याज्जानुभे परदेशगः ॥ पापस्थिते स्वनक्षत्रे निर्धनोऽल्पायुरेव च ॥२॥

अथ तृतीयः परिच्छेदः ॥ मनुष्यके आकार चक्र लिखके जहां सूर्य स्थित हो उस नक्षत्रको आदिमें करके तीन नक्षत्र मस्तकपर धरै ॥९६॥ तीन मुखपर धरै, दोनों कंधोंपर एक २ धरै, दोनों भुजाओंपर एक २ धरै, दोनों हाथों विषे एक २ धरै ॥९७॥ हृदयपर पांच नक्षत्र धरै, नाभीपर एकही नक्षत्र धरै, गुदापर एक नक्षत्र धरै, दोनों गोडोंपर एक २ धरै, ॥९८॥ फिर बाकी रहे छह नक्षत्रोंको पैरोंमें धर देवै, पीछे सूर्यके नक्षत्रसे जन्मके नक्षत्रतक गिनै ॥९९॥ मस्तकपर स्थित नक्षत्रमें हो तो पट्टबंधी (चपरास बांधने आदिसे राजसेवा आदिमें नियुक्त) मुखमें आवे तो मिष्टान्न भोजन करै, दोनों कंधोंपर आवे तो हस्तीकी सवारी करै ॥१००॥ ५००॥ भुजापर नक्षत्र हो तो बलवान् मनुष्य हो, हाथोंपर नक्षत्र हो तो चोरी करै, हृदयपर हो तो ऐश्वर्यवान् हो, नाभिपर हो तो थोडी वस्तुसे संतुष्ट होजावे ॥१॥ गुदापर नक्षत्र आवे तो पराई स्त्रीसे रमण करै, गोडोंपर नक्षत्र हो तो परदेशमें गमन करै, यदि अपना जन्म नक्षत्र पैरोंपर स्थित होवे तो निर्धन और अल्प आयुवाला हो ॥२॥ इति सूर्यपुरुषाकृतिचक्रफलम् ॥

अथ चंद्रर्डिभचक्रम्

जन्मराशेश्च नक्षत्रान्नक्षत्रं वर्तमानकम् ॥ गणयेद्गणकः प्राज्ञश्चन्द्रस्यैव शुभाशुभम् ॥३॥ षडास्ये ६ पृष्ठके षट्कं ६ करे षट्कं ६ त्रयं ३ गुदे ॥ त्रयं ३ पादे त्रयं ३ पीठे दातव्य गणकोत्तमैः ॥४॥ मुखे हानिश्चविज्ञेया धनहानिश्च पृष्ठभे ॥
हस्ते राजभयं ज्ञेयं राजमानं च गुह्यभे ॥५॥ स्थानभ्रष्टो भवेत्पादे कंठे सर्वसुखं भवेत् ॥ जन्मनक्षत्रतश्चंद्रनक्षत्रस्य फलं क्रमात् ॥६॥

जन्म राशिके नक्षत्रसे वर्तमान नक्षत्रतक बुद्धिमान् ज्योतिषी गिनै फिर चंद्रमाका शुभाशुभ फल कहै ॥३॥ छह नक्षत्र मुखपर धरै, पीठपर छह धरै, गुदापर तीन धरै, पैरोंपर तीन धरै, पीठपर तीन धरै, उत्तम ज्योतिषी इस प्रकार नक्षत्र स्थापन करै ॥४॥ मुखके नक्षत्रोंमें हानि हो, पीठके नक्षत्रोंमें धनकी हानि हो, हाथके नक्षत्रोंमें राजासे भय हो गुदाके नक्षत्रोंमें राजासे मान हो ॥५॥ पैरोंमें हो तो स्थानसे भ्रष्ट हो, कंठपर सब सुखदायी कहै हैं इस प्रकार जन्म नक्षत्रसे क्रमसे चंद्र नक्षत्रका फल कहै हैं ॥६॥ इति चंद्रर्डिभचक्रम् ॥

अथ भौमनरचक्रम्

यस्मिन्नृक्षे भवेद्भौमस्तदादित्रीणि मस्तके ॥ त्रयं नेत्रे त्रयं मौलौ चतुष्कं बाहुयुग्मके ॥७॥ कंठे द्वयं पंच हृदि त्रयं गुह्ये श्रुतिः पदोः ॥ मुखे रोगो धनं नेत्रे यशो मौलौ

धनं हृदि ॥८॥ कंठे हिक्का रतिर्गुह्ये पादे देशांतरं व्रजेत् ॥ वामबाहौ भवेद्रोगो दक्षिणे गणको भवेत् ॥९॥

जिस नक्षत्रपर मंगल हो उससे आदि लेके तीन नक्षत्र मस्तकपर धरै फिर तीन नेत्रपर, तीन ललाटपर धरै, चार नक्षत्र दोनों भुजाओंपर धरे ॥७॥ कंठपर दो नक्षत्र धरै, हृदयपर पांच नक्षत्र धरै, गुदापर तीन नक्षत्र धरै, पैरोंपर चार नक्षत्र धरै, मुखपर होवे तो रोग हो, नेत्रोंमें धन हो, मस्तकपर यश, हृदयपर धन हो ॥८॥ कंठपर हिचकी रोग, गुदापर हो तो अरुचि रोग हो, पैरोंमें हो तो विदेशमें गमन करै बायीं भुजापर हो तो रोग हो, दहिनीपर हो तो ज्योतिषी होवे ॥९॥ इति भौमनरचक्रम् ॥

अथ बुधनरचक्रम्

बुधो यत्र भवेदृक्षे तदादौ विलिखेत्क्रमात् ॥ मुखे ज्ञानाय पंच स्युर्नेत्रे राज्याय पंच च ॥१०॥ पंच कंठे सुखाय स्याद्धृदि ज्ञानाय पंच च ॥ क्षयाय पादयोः पंच करयोर्ज्ञानदं द्वयम् ॥११॥ एकं गुह्यस्थनक्षत्रं क्षयदं परिकीर्तितम् ॥ बुधभाज्जन्मभं यावद्बुधचक्रं विचारयेत् ॥१२॥

जिस नक्षत्रपर बुध हो उसको आदि लेके क्रमसे लिखे तहां मुखपर पांच नक्षत्र ज्ञानदायी हैं, नेत्रपर पांच नक्षत्र राज्य देनेवाले हैं ॥१०॥ कंठपर पांच नक्षत्र सुखदायी हैं, हृदयपर पांच नक्षत्र ज्ञानदायी हैं, फिर पैरोंपर पांच नक्षत्र नाश करनेवाले हैं, हाथोंपर दो नक्षत्र ज्ञानदायी हैं ॥११॥ गुदापर एक नक्षत्र नाश करनेवाला है इस प्रकार बुधके नक्षत्रसे जन्म नक्षत्र तक बुधचक्रको विचारै ॥१२॥ इति बुधपुरुषाकारचक्रम् ॥

अथ गुरुडिम्भचक्रम्

मौलौ चत्वारि राज्यं युगपरिगणितं स्कंधयुग्मे च लक्ष्मीरेकं कंठे विभूतिर्मदनपरिमितं वक्षसि प्रीतिलाभः ॥ षड्भिः पीडांघ्रियुग्मे जलधिपरिमितं वामबाहौ च मृत्युर्दृग्युग्मे त्रीणि दद्युर्नृपतिसमसुखं वाक्पतेश्चक्रमेतत् ॥१३॥

मस्तकपर चार नक्षत्र राज्यदायी हैं, चार नक्षत्र दोनों कंधोंपर लक्ष्मी देनेवाले हैं, एक नक्षत्र कंठपर ऐश्वर्य देनेवाला है, पांच नक्षत्र हृदयमें धरै वे प्रीति देनेवाले हैं, छह नक्षत्र दोनों पैरोंपर धरै सो पीडा करनेवाले हैं, फिर चार नक्षत्र बायीं भुजापर वे मृत्यु देनेवाले हैं, दोनों नेत्रोंपर तीन नक्षत्र हैं वे राजाके समान सुख देनेवाले हैं ऐसा यह बृहस्पतिका चक्र है ॥१३॥ इति गुरुडिंभचक्रम् ॥

अथ शुक्रडिंभचक्रम्

मौलौ पंच द्वयं वक्त्रे चतुष्कं हृदये स्वभात् ॥ सप्त बाहौ त्रयं गुह्ये द्वे जान्वोर्अंघ्रिः पदे ॥१४॥ सुखं हृदि तथा मौलौ गुह्यमे मरणं ध्रुवम् ॥ मुखे सुभोजनं बाहौ मृत्युर्जानुपदोर्व्यथा ॥१५॥

शुक्रके नक्षत्रसे लेके पांच नक्षत्र मस्तकपर धरै, दो मुखपर धरै, चार नक्षत्र हृदयपर धरै, सात नक्षत्र भुजापर धरै, तीन गुदापर, दो गोडोंपर चार पैरोंपर धरै ॥१४॥

हृदयपर तथा मस्तकपर जन्म नक्षत्र आवे तो सुख हो, गुदापर हो तो मृत्यु हो, मुखपर सुंदर भोजन मिले, भुजापर मृत्यु, गोडे और पैरोंपर आवे तो पीडा हो ॥१५॥ इति शुक्रडिंभचक्रम् ॥

अथ शनिडिंभचक्रम्

यस्मिञ्छनिश्चरति वक्त्रगते तदृक्षं चत्वारि दक्षिणकरेंऽघ्रियुगे भषट्कम् ॥ चत्वारि वामकरगान्युदरे च पंच मूर्ध्नि त्रयं नयनयोर्द्वितयं [1]गुदे च ॥१६॥ मुखस्थिते भानुसुतेऽतिपीडा लक्ष्मीर्यशो दक्षिणहस्तसंस्थे ॥ पादद्वये निष्फलता च वामे करे च युद्धे तनु संशयश्च ॥१७॥ हृदयर्थो मस्तके राज्यं नेत्रयोः परमं सुखम् ॥ गुदे च प्राणसंदेहः शनिचक्रे विनिर्दिशेत् ॥१८॥ मुखाच्चरति गुह्ये च गुह्याद्याति मस्तके ॥ मस्तकाल्लोचने याति लोचनाद्धृदयं व्रजेत् ॥१९॥ हृदयाद्वामहस्तं च वामहस्तात्पदद्वयम् ॥ पादाच्च दक्षिणं हस्तं शनिचारोयमुच्यते ॥२०॥

जिस नक्षत्रपर शनि हो वह नक्षत्र मुखपर धरना, फिर उससे आगेके चार नक्षत्र नरचक्रमें दहिने हाथपर धरै, दोनों चरणोंपर छह नक्षत्र धरै चार नक्षत्र बायें हाथपर धरै, उदरपर पांच रक्खै, मस्तकपर तीन, नेत्रोंपर दो नक्षत्र धरै, गुदापर भी दो नक्षत्र धरै ॥१६॥ शनि मुखपर स्थित हो तो अत्यंत पीडा हो, दहिने हाथदय हो तो लक्ष्मी और यश प्राप्त हो, दोनों पैरोंपर निष्फलता, बायें हाथपर हो तो युद्धमें शरीरका संदेह हो ॥१७॥ हृदयपर द्रव्यप्राप्ति, मस्तकपर राज्यप्राप्ति हो, नेत्रोंपर परम सुख हो, गुदापर प्राणोंका संदेह हो ऐसा शनिचक्रमें कहना ॥१८॥ (कहीं ऐसा भी मत है कि) शनैश्चर मुखसे गुदापर जाता है, गुदासे मस्तकपर आता है, मस्तकसे नेत्रोंपर आता है, नेत्रोंमेंसे हृदयपर आता है ॥१९॥ हृदयसे बायें हाथपर, बायें हाथसे दोनों पैरोंपर, पैरोंसे दहिने हाथपर आता है ऐसा यह शनिचार (चलना) है ॥२०॥ इति नराकारशनिचक्रम् ॥

अथ राहुपुरुषाकृतिचक्रम्

यस्मिन्नृक्षे भवेद्राहुस्तदादौ सप्त पादयोः ॥ दक्षिणे च करे पंच शिरसि त्रीणि दापयेत् ॥२१॥ नक्षत्रे द्वे हृदि न्यस्य मुखे चैकं नियोजयेत् ॥ पंच वामकरे दद्यान्नाभौ चैकं नियोजयेत् ॥२२॥ गुह्यदेशे त्रयं दद्याद्राहुचक्रमिदं स्मृतम् ॥२३॥ पादयोर्धनहानिः स्यात्सन्तापो दक्षिणे करे ॥ मस्तके च भयं शत्रोर्हृदये दुर्जनप्रियः ॥२४॥ मुखे दुर्जनसंहारो मृत्युर्वामकरे भवेत् ॥ नाभिगं सर्वनाशाय गुह्ये प्राणविनाशनम् ॥२५॥

जिस नक्षत्रपर राहु हो उससे आदि लेके सात नक्षत्र पैरोंपर धरै, फिर पांच नक्षत्र दहिने हाथपर धरै तीन नक्षत्र शिरपर धरै ॥२१॥ दो नक्षत्र हृदयपर धरै, एक मुखपर धरै, पांच बायें हाथपर धरै, एक नक्षत्र नाभिपर धरै ॥२२॥ तीन नक्षत्र गुदापर धरै ऐसा राहु चक्र कहा है ॥२३॥ पैरोंपर जन्म नक्षत्र आवे तो धनकी हानि हो, दहिने हाथपर हो तो संताप हो, मस्तकविषे हो तो शत्रुसे भय हो, हृदयपर हो तो दुर्जनसे मित्रता होवे ॥२४॥ मुखपर आवे तो दुष्ट जनोंका नाश हो, बायें हाथपर हो तो मृत्यु

---

१ गुदैकमिति पाठे सप्तविंशतिनक्षत्रसंख्या न भवतीति गुदे चेति गुदेपि द्वयमित्यर्थः।

हो, नाभिपर हो तो सर्व वस्तुका नाश, गुदापर जन्म नक्षत्र आवे तो प्राणोंका नाश हो ।।२५।। इति राहुपुरुषाकृतिचक्रम् ।

अथ केतुडिम्भचक्रम्

यस्मिन्नृक्षे भवेत्केतुस्तदादौ तु फलं वदेत् ।। नेत्रे द्वे रोगशोकाय मुखे लाभाय पञ्च च ।।२६।। राज्यप्रदं त्रयं मौलौ नक्षत्रं परिकीर्तितम् ।। चतुष्कं दक्षिणे हस्ते नक्षत्रं च यशःप्रदम् ।।२७।। वामहस्ते चतुष्कं च भयरोगकरं सदा ।।एकं नाभौ च नाशाय गुह्ये द्वे मृत्युकारके ।।२८।। ऋक्षाणि पादयोः षट्कं धननाशकराणि वै ।। केतुचक्रस्य माहात्म्यं देहस्थं ज्ञायते बुधैः ।।२९।।

जिस नक्षत्रपर केतु हो उसका आदिसे फल कहै–जैसे पहले दो नक्षत्र नेत्रोंपर रोग और शोकको देनेवाले हैं, मुखपर पांच नक्षत्र लाभ देनेवाले हैं ।।२६।। फिर तीन नक्षत्र मस्तकपर राज्य देनेवाले कहे हैं, चार नक्षत्र दहिने हाथपर यश देनेवाले हैं ।।२७।। वायें हाथपर चार नक्षत्र सदा भय और रोग करनेवाले हैं, एक नक्षत्र नाभिपर नाश करनेवाला है, गुदापर दो नक्षत्र मृत्यु करनेवाले हैं ।। ।।२८।। पैरोंपर छह नक्षत्र धनका नाश करनेवाले हैं इस प्रकार पंडित जनोंने यह केतुनराकारचक्रका प्रभाव जानना ।।२९।। इति केतुडिंभचक्रम् ।।

अथ स्त्रीणां सूर्यपुरुषाकृतिचक्रम्

मौलौ त्रयं मुखे सप्त स्तनयोरष्टभानि च ।। हृदि त्रयं त्रयं नाभौ त्रयं गुह्ये च विन्यसेत् ।।३०।। मौलौ संतापकृत्सूर्यो मुखे मिष्टान्नदो भवेत् ।। स्तनयोः कामदः प्रोक्तो हृदये सुखदः स्त्रियः ।।३१।। नाभौ पतिसुखं दत्ते गुह्ये कामकरः सदा ।। सूर्यडिभाख्यचक्रं तु स्त्रीणां प्रोक्तं विशेषतः ।।३२।।

और सूर्य नक्षत्रसे आदिले मस्तकपर तीन, मुखपर सात, स्तनोंपर आठ, हृदयपर तीन, नाभिपर तीन, गुदापर तीन नक्षत्र धरै ।।३०।। मस्तकपर (जन्मनक्षत्र आवे तो) सूर्य संताप करनेवाला है, मुखपर मिष्टान्न भोजन दे, स्तनोंपर कामना दे, हृदयपर हो तो स्त्रीको सुख देनेवाला है ।।३१।। नाभिपर हो तो पतिको सुख दे, गुदापर हो तो कामना करै इस प्रकार यह सूर्य डिभाख्य चक्र स्त्रियोंका विशेष (इसे अन्य प्रकारसे देखना) कहा है ।।३२।। इति सूर्यपुरुषाकृतिचक्रम् ।।


अथ सूर्यकालानलचक्रम्

ऊर्ध्वास्तिस्रस्त्रिशूलाग्रा रेखास्तिस्रस्तिरः स्थिताः ।। द्वेद्वे रेखे कोणयोश्च शृङ्गयुग्म तथैकया ।।३३।। मध्यत्रिशूलदंडाधो भानुनक्षत्रमालिखेत् ।। अन्यान्य भिजिता सार्द्धं विलिखेद्दंडमस्तके ।।३४।। अधः स्थितैस्त्रिनक्षत्रैरुद्वेगवधबंधनम् ।। रेखाष्टके भवेल्लाभ ऋक्षषट्के तथा पुनः ।।३५।। शृगद्वये रोगभंगो मृत्युः शूलत्रये स्फुटम् ।। विवादे विग्रहे युद्धे रोगार्त्ते गमने तथा ।।३६।। सूर्यकालानलं चक्रं कथितं

गणकोत्तमैः ।। रवेर्वेधे मनस्तापो द्रव्यहानिर्धरा सुते ।।३७।। रोगपीडाकरो मन्दो राहुकेतू च मृत्युदौ ।। गुरोर्वेधे भवेल्लाभो रतिलाभश्च भार्गवे ।।३८।। स्त्रीलाभश्चंद्रवेधे न सुखं च बुधवेधतः ।। जन्मराशेश्च वेधेन फलमेतत्प्रकीर्तितम् ।।३९।।


ऊपरको तीन रेखा त्रिशूलके अग्रभाग आकारवाली खींचै, तीन रेखा तिरछी खींचै, दो २ रेखा कोणोंमें खींचै, एक २ रेखासे दो शृंग बनावे ।।३३।। मध्यमें त्रिशूलके दंडके नीचे सूर्यके नक्षत्रको लिखै फिर अन्य अभिजित् सहित सब नक्षत्रोंको क्रमसे इन रेखाओंके मस्तकपर लिखै ।।३४।। नीचे स्थित हुए तीन नक्षत्रोंमें (जन्मका नक्षत्र आवे तो) उद्वेग भय बंधन हो, रेखाष्टक (चारों कोणोंकी ८ रेखा) में हो तो लाभ हो छह नक्षत्रोंमें (तिरछी रेखाओंमें) हो तो भी लाभ हो ।।३५।। शृंगके दोनों नक्षत्रोंमें रोग दूर हो, त्रिशूलाग्र रेखाओंमें अवश्य मृत्यु हो । विवाद, विग्रह, युद्ध, रोग, पीडा, गमन इनमें ।।३६।। यह सूर्य कालानलचक्र विचारना पंडित जनोंने कहा है ।। इति सूर्यकालानलचक्रम् ।। अथ वेधफलम् । (वेधचक्रमें) सूर्यका वेध हो तो मनमें संताप हो, मंगलका वेध हो तो द्रव्यकी हानि हो ।।३७।। शनिके वेधमें रोग पीडा हो, राहु केतुका वेध हो तो मृत्यु ही, बृहस्पतिका वेध हो तो लाभ हो, शुक्रका वेध हो तो संभोगप्राप्ति हो ।।३८।। चंद्रमाका वेध हो तो स्त्रीका लाभ हो, बुधका वेध हो तो सुख हो, जन्मराशिके वेधसे यह फल कहा है ।।३९।। इति जन्मराशिवेधफलम् (अब इससे आगे लिखे हुए सूर्यकालानलचक्रको समझो।)

॥ सूर्यकालानलचक्रम् ॥



आगे कहे हुए श्लोकोंका अर्थ इस दुर्गचक्रमें समझो.

अथ दुर्गचक्रम्



अथ दुर्गचक्रम्

दुर्गाकारं लिखेच्चक्रं रेखात्रयसमन्वितम् ।। ईशाने ग्रामनक्षत्रं दत्त्वा चाभिजिता सह ।।४०।। चतुष्कं च चतुष्कं च कोणेषु सकलेषु च ।। मध्येमध्ये संग्रहं च दद्याद्विज्ञस्त्रयंत्रयम् ।।४१।। दुर्गमध्ये स्थिते सूर्ये जलशोषः प्रजायते ।। चंद्रे भंगः कुजे दाहो बुधे बुद्धियुतो नृपः ।।४२।। बृहस्पतौ दुर्गमध्ये सुभिक्ष प्रचुरं भवेत् ।। चलचित्तौ नृपः शुक्रे भेदभंगौ शनैश्चरे ।।४३।। राहुकेतौ दुर्गमध्ये विषदग्धो भवेन्नृपः ।। सूर्यः शनैश्चरो भौमो राहुः केतुर्यदा स्थितः ।।४४।। एते ग्रहा दुर्गमध्ये दुर्गभंगः प्रजायते ।। गुरुः शुक्रो बुधश्चंद्रो दुर्गमध्ये यदा स्थिताः ।।४५।। तदा दुर्गो न भज्येत महेंद्रेणापि भेदितः ।।४६।।

दुर्गाकार (किलाके सदृश) चक्र निकाले तीन रेखा (चक्र) ऊपर बनावे फिर गांवके नक्षत्रको ईशान कोणमें धरके अभिजित्सहित सब नक्षत्रोंको धरै ।।४०।। सब कोणोंमें चार २ और मध्यमें तीन २ नक्षत्र ग्रहोंसहित धरै ।।४१।। दुर्गके मध्यमें सूर्य आजावे तो (किलामें) जलका शोष हो जायगा, चंद्रमा हो तो दुर्गभंग हो, मंगल हो तो दुर्ग जलजावे, बुध दुर्ग मध्यमें हो तो राजा बुद्धियुक्त रहै ।।४२।। बृहस्पति दुर्गमें हो तो सुभिक्ष (अन्नपानादि भरपूर रहै) शुक्र हो तो राजाका चित्त चलायमान हो, शनि हो तो (किला) टूट फूट जावे ।।४३।। राहु केतु दुर्गके मध्यमें आजावें तो वह राजा

विषसे दग्ध हो, सूर्य, शनि, मंगल, राहु, केतु ॥४४॥ ये पाप ग्रह दुर्गमें स्थित हों तो दुर्गभंग हो (किला टूटे) बृहस्पति, शुक्र, बुध, चंद्रमा ये ग्रह दुर्गके बीच में आवें तो ॥४५॥ वह दुर्ग इंद्रका तोडा हुआ भी नहीं टूटे ॥४६॥ इति दुर्गचक्रम् ॥

अथ रव्यादीनां मध्यमचारः

मासं शुक्रबुधादित्याः सपादद्विदिनं शशी ॥ भौमस्त्रिपक्षंजीवोऽब्दं सार्धवर्षद्वयं शनिः ॥ राहुः केतुः सदा भुंक्ते सार्धमेकं तु वत्सरम् ॥४७॥

शुक्र बुध सूर्य ये एक महीनातक राशिपर ठहरते हैं, चंद्रमा सवादो २। दिन तक, मंगल डेढ महीना तक, बृहस्पति एक वर्ष, शनि अढाई वर्षतक, राहु केतु डेढ वर्षतक ठरहतें हैं ॥४७॥ इति रव्यादीनां मध्यमचारः ॥

अथ जन्मलग्नज्ञानम्

न पश्यति शशी लग्नं लग्नस्वामी न पश्यति ॥ न पश्यति यदा सूर्यः सोऽन्यजातस्तदोच्यते ॥४८॥ सुतपतिरस्तगतो वा पापयुतः पापमध्यगो वा स्यात् ॥ संततिबाधां कुरुते केन्द्रे वा पापसंयुते चंद्रे ॥४९॥ उदयाद्या गता नाड्यस्तासामर्धेन संख्यया ॥ सूर्यर्क्षाद्यद्भवेदृक्षं तेन लग्नस्य निर्णयः ॥५०॥ तिस्रो मीने च मेषे च चतस्रो वृषकुंभयोः ॥ मिथुने मकरे पंच पंच चापे च कर्कटे ॥ ५१ ॥ सूतिकायां स्त्रियो ज्ञेयाः पंच कन्या तुलेपि च। योषितोन्येषु लग्नेषु तिस्रः प्रोक्ता मनीषिभिः ॥५२॥ लग्ने तदीशपार्श्वे वा यावंतश्च खयायिनः ॥ धनगा व्ययगाश्चैव तावत्यः सूतिकाः स्मृताः ॥५३॥ चंद्रलग्नांतरस्थैर्वा ग्रहैस्तुल्याश्च सूतिकाः ॥ यथा राहुस्तथा शय्या मंगलः क्षेत्रभंगदः ॥५४॥ रविस्थाने भवेद्दीपः शनौ लोहं निगद्यते ॥ मेषादिद्वादशर्क्षेषु त्रिरावृत्तिक्रमेण तु ॥ ५५ ॥ पर्वादिकं गृहद्वारं जन्मकालान्निगद्यते ॥५६॥

चंद्रमा लग्नको नहीं देखता हो और लग्नका स्वामी भी लग्नको नहीं देखता हो, सूर्य भी लग्नको नहीं देखता हो तो वह बालक अन्यसे उत्पन्न हुआ जानना ॥४८॥ पांचवें घरका पति अस्त हो, अथवा पापग्रहसे युक्त या पापग्रहके मध्यमें आ रहा हो और चंद्रमा पापग्रहसे युक्त होके केंद्रमें बैठा हो तो उस नरको संतानकी बाधा रहै ॥४९॥ लग्नविचारः ॥ उदयसे आदि ले गत घटियोंको (इष्टको) आधी कर तिस संख्यातक सूर्यके नक्षत्रसे गिनै जितनी संख्या नक्षत्रकी हो उसही नक्षत्रका लग्न जानो (यह स्थूलमत है) ॥५०॥ मीन और मेष लग्नमें तीन स्त्री कहो, वृष कुंभमें चार स्त्री कहो, मिथुन मकरमें पांच स्त्री कहो, धन कर्कमें पांच स्त्री कहो ॥५१॥ और कन्या तुलामें पांच स्त्री सूतिकाके पास कहो (यह भी स्थूल मत है) और इनसे अन्य लग्न हो, तो पंडित जनोंने तीनही स्त्री कहना ॥५२॥ दूसरा प्रकार ॥ लग्नमें अथवा लग्नके स्वामीके पास जितने ग्रह हों, अथवा धन स्थानमें वा बारहवें स्थानमें जितने ग्रह हों उतनीही स्त्री सूतिकाके समीप कहो ॥५३॥ अथवा चंद्रमाके और लग्नके मध्यमें जितने ग्रह हों उतनी ही कहना, जिस (दिशा) में राहु हो वहां शय्या बतावे, जिस घरमें मंगल हो तो उससे नालच्छेदनका स्थान कहै ॥५४॥ सूर्यके स्थानमें दीपक हो, शनिके स्थानमें लोहा कहना,

मेष आदि राशियोंकी (लग्नकी) तीन आवृत्ति क्रम करनेसे जन्म कालसे पूर्व आदि घरका द्वार कहे ॥५५-५६॥ इति जन्मलग्नज्ञानम् ॥

अथाष्टोत्तरीदशा

चत्वारि भानि पापेषु शुभेषु त्रीणि योजयेत् ॥ आर्द्रादिमृगपर्यंतं लिखेदभिजिता सह ॥५७॥ षडादित्ये च वर्षाणि चन्द्रे पञ्चदशैव तु ॥ मंगले चाष्टवर्षाणि बुधे सप्तदशैव तु ॥५८॥ शनौ च दशवर्षाणि जीवे चैकोनविंशतिः ॥ राहौ द्वादशवर्षाणि शुक्रे सैका च विंशतिः ॥५९॥ जन्मर्क्षगतनाडिघ्नं परायुः खगजैर्भजेत् ॥ लब्धं परायुषं १०८ शोध्यं शेषमायुः स्फुटं भवेत् ॥६०॥ परमायुः प्रमाणेन १०८ गुणयेद्गतनाडिकाः ॥ नक्षत्रस्य हरेद्भागं नवत्या ९० फ्लं विशोधयेत् ॥६१॥ आर्द्राचतुष्कमादित्ये चन्द्रे ज्ञेयं मघात्रयम् ॥ भौमे हस्तचतुष्कं स्यादनुराधात्रिकं बुधे ॥६२॥ पूषाचतुष्कं मन्दे च धनिष्ठात्रितयं गुरौ ॥ राहौ बुध्न्यभचत्वारि कृत्तिकात्रितयं भृगौ ॥६३॥ दशादशाहताः कार्या भागो नन्दैर्विधीयते ॥ अन्तर्दशेयं तस्यैव प्रथमं ज्ञायते दशा ॥६४॥

अथ अष्टोत्तरीदशा ॥ पापग्रहोंमें चार नक्षत्र, शुभ ग्रहोंमें तीन नक्षत्रतक (दशा) जानै, आर्द्रासे लेकर मृगशिर पर्यंत अभिजित् नक्षत्र सहित गिनै ॥५७॥ सूर्यकी दशा ६ छह वर्षतक, चंद्रमाकी दशा १५ पंद्रह वर्षतक, मंगलकी आठ ८ वर्षतक, बुधकी सतरह १७ वर्षतक ॥५८॥ शनिकी दशा दश १० वर्षतक, बृहस्पतिकी उन्नीस १९ वर्षतक, राहुकी बारह १२ वर्षतक, शुक्रकी इक्कीस २१ वर्षतक रहती है ॥५९॥ जन्मनक्षत्रकी गतघड़ीसे परम आयुको गुणै फिर अस्सी ८० का भाग देवे लब्ध हुए को परायु १०८ में घटा देवे बाकी रही स्फुट आयु जाननी ॥६०॥ परम आयुके प्रमाण १०८ से गत घडियोंको गुणै फिर नक्षत्रका (२७) भागदे बाकी रहेको नव्वेसे गुणके (फिर भागदे) यह भुक्त भोग्यदशा देखनेका क्रम है ॥६१॥ आर्द्रासे आदिले चार नक्षत्रतक सूर्यदशा मघासे तीन नक्षत्रतक चंद्रमाकी दशा है, हस्तसे चार नक्षत्रतक मंगलकी दशा है, अनुराधासे चार नक्षत्रतक बुधकी दशा है ॥६२॥ रेवतीसे चार नक्षत्रतक शनिकी दशा, धनिष्ठासे तीन नक्षत्रतक बृहस्पतिकी दशा, उत्तराभाद्रपदा आदि चार नक्षत्रोंमें राहुकी दशा, कृत्तिका आदि तीन नक्षत्रोंमें जन्म हो तो शुक्रकी दशा जानो ॥ ॥६३॥ अंतर्दशा विचार॥ दशाके वर्षोंमें अंतर्दशा देखना हो तो उस दशा और अंतर्दशा आनेवाली दशाके वर्षोंसे गुणके नौका भाग दे लब्ध हुए मासादि जानै, पहले जिसकी दशा हो उसकी अंतर्दशा होती है ॥६४॥ इति अष्टोत्तरी दशा ॥

अथ रविमहादशावर्ष ६ फलम्

उद्विग्नचित्तः परिनष्टवित्तः शरीररोगः स्वजनैर्वियोगः ॥ निपीडितो राजजनैः प्रवासी नरोऽश्वघाती च रवेर्दशायाम् ॥६५॥

अथ रविमहादशावर्ष ६ फलम् ॥ सूर्यकी दशामें चित्त उद्विग्न रहै, द्रव्य नष्ट हो, शरीरमें रोग रहै, स्वजनोंके संग वियोग रहे, राजाके जनोंसे पीडित हो, परदेशमें जावे, घोडासे पीडा हो ॥६५॥

अथ रविदशायामन्तर्दशाः

सूर्यमहादशायां सूर्यांतर्दशामासाः ४।०।०।०। सूर्यस्यांतर्गते सूर्ये लाभो राजकुलाद्भवेत् ।। चित्तपीडा व्ययोर्थानां विप्रयोगश्च बंधुभिः ।।६६।। रविदशामध्ये चंद्रांतर्दशामासादिः १०।०।०।०। शत्रुनाशोऽर्थलाभश्च चिंतानाशः सुखागमः ।। सूर्यस्यांतर्गते चन्द्रे व्याधिनाशश्च जायते ।।६७।। भौमांतर्दशामासादिः ५।१०।०।०। मणिमुक्ताकांचनापि जायंतेऽत्र सुखं तथा ।। प्राप्यते भूपतेर्मानः सूर्यस्यांतर्गते कुजे ।।६८।। बुधांतर्दशामासादिः ११।१०।०।०। विलासः सुखदारिद्र्ये जायते रोगसंभवः ।। पामाविर्चाचिकादीनि सूर्यस्यांतर्गते बुधे ।।६९।। शनेरंतर्दशामासादिः ६।२०।०।०। राजभीतिः शत्रुभीतिः कलहो दुःखमेव च ।। जायते धननाशश्च सूर्यस्यांतर्गते शनौ ।।७०।। गुरुदशामासादिः १२।२०।०।०।० निष्पापो व्यसनैर्हीनो नीरोगी धनवानपि ।। प्राप्नोति पदवीं गुर्वीं सूर्यस्यांतर्गते गुरौ ।।७१।। राहुदशामासादिः८।०।०।०। व्यसनं वित्तनाशश्च शंका चाथ पराजयः ।। सूर्यस्यान्तर्गते राहौ द्यूतं बंधुजनैः कलिः ।।७२।। शुक्रांतर्दशामासादिः १४।०।०।०। ज्वररोगः शिरोरोगो नानापीडा कलेवरे ।। क्वापि बंधुजनः क्लेशः सूर्यस्यांतर्गते सिते ।।७३।।

अथ रविदशायामन्तर्दशा। सूर्यकी महादशामें सूर्यकी अंतर्दशाके मास आदि ४।०।०।० (ये अंक मास तिथी घटी पलके हैं ऐसे सब जगह जानो) सूर्यके अंतरमें सूर्य आवे तो राजकुलसे लाभ हो, चित्तमें पीडा रहै, द्रव्य खर्च हो, बंधुजनोंके साथ वियोग हो ।।६६।। सूर्यकी दशामें चंद्रमाकी अंतर्दशा मासादि १०।०।०।० सूर्यके अंतर चंद्रमाकी दशा आवे तो शत्रुनाश, द्रव्यकी प्राप्ति, चिंतानाश, सुखप्राप्ति, व्याधिनाश होता है ।।६७।। मंगलके अंतर्मासादि ५।१०।०।० सूर्यके अंतरमें मंगलकी अंतर्दशा हो तो मणि मोती सुवर्ण आदिसे सुखकी प्राप्ति हो, राजासे मान हो ।।६८।। बुधकी अंतर्दशा ११।१०।०।० है।। सूर्यके अंतर बुधकी दशा आवे तो विलास, सुख, दारिद्र्य, रोगकी उत्पत्ति पामा, विर्चचिका (खाजरोग) हो ।।६९।। शनिकी अंतर्दशामा० ६ दि० २०।०।० है सूर्यके अंतर शनिकी दशा आवे तो राजासे डर हो, शत्रुसे डर हो, कलह हो, दुःख हो, धनका नाश हो ।।७०।। बृहस्पति दशा मा० २२ दिन २०।०।० है सूर्यके अंतर गुरुकी दशा आवे तो पापरहित, व्यसनरहित, रोगरहित, हो, धनवान् होवे, बड़ी पदवी मिले ।।७१।। राहुकी दशा मा० ८।०।०।० सूर्यके अंतर राहुकी अंतर्दशा हो तो व्यसन, द्रव्यनाश, शंका, पराजय, जूवा खेलना, बंधुजनोंके साथ क्लेश हो ।।७२।। शुक्रकी अंतर्दशा १४।०।०।० सूर्यके अंतर शुक्रकी दशा आवे तो ज्वर हो शिरमें रोग हो, शरीरमें अनेक प्रकारकी पीडा हों, कभी बंधुजनोंके साथ क्लेश हो ।।७३।। इति० ।।

अथ चंद्रमहादशावर्ष १५ फलम्

गजाश्वरत्नानि महाप्रतापो मिष्टान्नपानं विविधं सुखं च ।।
अरोगिता सर्वजनानुरागो भवेद्दशायां शशिनो जनस्य ।।७४।।

अथ चंद्रमादशा वर्ष १५ फलम्। चंद्रमाकी दशा आवे तो मनुष्योंको हस्ती, घोडे और रत्न प्राप्त हों, महा प्रताप हो, मिष्टान्न पान मिले, अनेक प्रकारका सुख मिले, रोग नहीं हो, सब जनोंसे स्नेह हो ॥७४॥

अथ चंद्रांतर्दशा

चंद्रमहादशामध्ये चंद्रांतर्दशामासादिः २५।०।०।०। शोभनस्त्रीसमायोगो वस्त्राभरणसंपदः ॥ शुभकन्यासमुत्पत्तिश्चंद्रस्यांतर्गते विधौ ॥ ७५ ॥ भौमांतर्दशामासादिः १३।१०।०।०। असृक्पित्तरुजा पीडा वह्निचोराद्युपद्रवः ॥ कलहः स्त्रीजनैःसार्द्धं चंद्रस्यांतर्गते कुजे ॥ ७६ ॥ बुधांतर्दशामासादिः ॥२८।१०।०।०। सर्वत्र लभते लाभो गजवाजिधनादिकम् ॥ गोमहिष्यादिकं चापि चंद्रस्यांतर्गते बुधे ॥७७॥ शन्यंतर्दशामासादिः ॥१६।२०।०।०। उद्वेगो वित्तनाशश्च शोकः शत्रूदयाद्भयम्॥ कलहो बंधुवर्गेण चंद्रस्यांतर्गते शनौ ॥७८॥ गुरोरंतर्दशामासादिः ॥३१।२०।०।०। धनधर्मादिसंपत्तिर्वस्त्रालंकारभूषणम् ॥ सर्वत्र लभते लाभं चंद्रस्यांतर्गते गुरौ ॥७९॥ राह्वंतर्दशामासादिः २०।०।०।०। रिपुरोगाग्निभीतिश्च बंधुनाशो धनक्षयः ॥ भवेदुद्वेगचित्तश्च चन्द्रस्यांतर्गते त्वगौ ॥ ८० ॥ शुक्रांतर्दशामासादिः ३५।०।०।०। उत्तमस्त्रीजनैर्योगो दिव्यकन्यासमुद्भवः ॥ धनधान्यादिलाभश्च चंद्रस्यांतर्गते सिते ॥ ८१ ॥ रव्यंतर्दशामासादिः १०।०।०।०॥ लाभो राजकुलेभ्यश्च रोगनाशो रिपुक्षयः ॥ जायते सुखमैश्वर्यं चंद्रस्यांतर्गते रवौ ॥८२॥

अथ चंद्रांतर्दशा ॥ चंद्रमाकी महादशामें चंद्रमाकी अंतर्दशा मास २५।०।०।०। होती है। चंद्रमामें चंद्रमाकी दशा आवे तो सुंदर स्त्रीके संग समागम हो, वस्त्र आभूषण संपत्ति मिले सुंदर कन्याकी उत्पत्ति हो ॥७५॥ चंद्रमाकी दशामें मंगलकी अंतर्दशा मास १३। दि० १०।०।० होती है इसका फल यह है कि, रक्तपित्तकी पीडा हो, अग्नि चोर आदिकोंका उपद्रव हो, स्त्रियोंके साथ कलह होवे ॥७६॥ बुधकी अंतर्दशा २८।१०।०।०। है। चंद्रमाके अंतरमें बुधकी दशा आवे तो सब जगह लाभ हो, हस्ती, घोडे, धन आदि मिलें, गौ, भैंस आदि मिलें ॥७७॥ शनिकी अंतर्दशा १६।२०।०।०। है चंद्रमाके अंतरमें शनि हो तो उद्वेग, द्रव्यनाश, शोक, शत्रु उठनेका भय, बंधुओंके साथ लराई हो ॥७८॥ गुरुकी अंतर्दशा ॥ ३१।२०।०।०। है चंद्रमा विषे गुरुकी अंतर्दशा आवे तो धन धर्म आदि संपत्ति बढै, वस्त्र आभूषण मिलैं, सब जगह लाभ होवे ॥७९॥ राह्वंतर मासादि २०।०।०।०। चंद्रमाके अंतरमें राहुकी दशा हो तो शत्रु, रोग, अग्नि, इनसे भय हो, बंधुनाश, धनक्षय, चित्तमें उद्वेग हो ॥८०॥ शुक्रान्तर्दशा मासादि ३५।०।०।०। चंद्रमाके अंतर शुक्रकी दशा आवे तब उत्तम स्त्रियोंके साथ समागम हो, दिव्य कन्या उत्पन्न हो, धन धान्यादि लाभ हो ॥८१॥ रव्यन्तर्दशामासादि १०।०।०।०। चंद्रमाके अंतर सूर्यकी दशा हो तो राजकुलसे लाभ हो, रोग नाश हो, शत्रुनाश हो, सुख ऐश्वर्य बढै ॥८२॥

अथ भौममहादशावर्ष ८ फलम्

शस्त्राभिघातो नृपतेश्च पीडा चोराग्निभीतिश्च धनस्यहानिः ।।
कार्याभिघातश्च जनेषु दैन्यं भवेद्दशायां धरणीसुतस्य ।।८३।।

अथ भौम महादशावर्ष ८ फलम् । मंगलकी दशा हो तो शस्त्रकी चोरी लगे राजासे पीडा हो चोर अग्निसे भय हो धनकी हानि हो कार्य नष्ट हो गरीबी रहै ।।८३।।

अथ भौममहादशायामंतर्दशाः

भौममहादशामध्ये भौमांतर्दशामासादिः ७।३।२०।०। शत्रुभिः सह सम्मर्दो बंधुभिः सह विग्रहः ।। स्त्रीसंगो रक्तपित्ताद्भीर्भौमस्यांतर्गते कुजे ।।८४।। बुधांतर्दशामासादिः १५।३।२०।०। शत्रुचोरनृपादिभ्यो महाभीतिः प्रजायते ।। महाज्वरः कृमेः पीडा भौमस्यांतर्गते बुधे ।।८५।। शन्यंतर्दशामासाद्याः ८।२६।४०।०। धनक्षयो महादुःखं जायतेऽत्र निरंतरम् ।। सदा नरस्य विपदो भौमस्यांतर्गते शनौ ।।८६।। गुर्वंतर्दशा मासाद्याः ।।१६।२६।४०।०। धनलाभस्तीर्थलाभो देवब्राह्मणपूजनम् ।। नृपात्किंचिद्भवेद्भीतिर्भौमस्यांतर्गते गुरौ ।।८७।। राह्वंतर्दशामासाद्याः १०।२०।०।०। शस्त्रचौराग्निभीतिः स्यात्कृषिस्त्रीधनपीडनम् ।। यत्रतत्र भयं भंगो भौमस्यांतर्गते त्वगौ ।।८८।। शुक्रांतर्दशामसाद्याः १८।२०।०।०। व्याधयः शत्रुभीतिश्च धननाशोप्युपद्रवः ।। विदेशगमनं नृणां भौमस्यांतर्गते सिते ।।८९।। रव्यंतर्दशामासाद्याः ५।१०।०।०। आरोग्यं सर्वतो भद्रं राजपूजा जयोत्सवः ।। जायतेऽत्र धनप्राप्तिर्भौमस्यांतर्गते रवौ ।।९०।। चंद्रांतर्दशामासाद्याः १३। १०।०।०। नानावृत्तिसमुत्पन्नमणिमुक्तासमृद्धिमान् ।। जायते मनुजो नित्यं भौमस्यांतर्गते विधौ ।।९१।।

मंगलमें मंगलकी अंतर्दशा मास ७। दिन ३। घ. २०।०। है मंगलके अंतर मंगलकी ही दशा आवे तो शत्रुओंके संग युद्ध हो, बंधु जनोंसे लड़ाई हो, स्त्रीसंग हो, रक्तपित्तसे डर हो ।।८४।। बुधकी अंतर्दशामास १५।३।२०।०। मंगलके अंतर बुधकी दशा आवे तो शत्रु चोर नृप आदिकोंसे अत्यंत भय हो, महाज्वर, कृमि पीड़ा हो ।।८५।। शनिकी अंतर्दशा ।।८।२६।४०।०। मंगलके अंतर शनिकी दशा हो तो धनक्षय, निरंतर महादुःख हो, सदा विपत्ति रहै ।।८६।। गुरुकी अंतर्दशा १६।२६।४०।०। मंगलके अंतर बृहस्पतिकी दशा हो तो धनलाभ, तीर्थयात्रालाम, देव ब्राह्मणका पूजन, राजासे कुछ भय हो ।।८७।। राह्वन्तर्मासादि १०.२०।०।०। भौमके अंतर राहुकी दशा हो तो शस्त्र, चौर, अग्निसे भय हो, खेती, स्त्री, धन इनकी बाधा हो, जहां तहां भय भंग हो ।।८८।। शुक्रान्तर्मासादि १८।२०।०।० मंगलके अंतर शुक्रकी दशा हो तो व्याधि हो शत्रुसे भय, धनका नाश, उपद्रव हो, विदेशमें गमन हो ।।८९।। रव्यन्तर्दशामासादि ।।५।१०।०।०। मंगलके अंतरमें सूर्यकी दशा हो तो आरोग्य, सब बातका आनंद राजासे पूजा, जय, उत्सव, धनकी प्राप्ति होती है ।।९०।। चंद्रान्तर्दशामासादि १३।१०।०।०। मंगलके अंतर चंद्र हो तो अनेक आजीविका हो, मणि मोती आदिकोंकी समृद्धि हो ऐसा मनुष्य होवे ।।९१।।

अथ बुधमहादशावर्ष १७ फलम्

नानाविधैरर्थसुखैः समेतो दिव्यांगनाकेलियुतो विलासी ॥
सर्वार्थसिद्धिर्बहुमानितोऽत्र महादशायां मनुजो बुधस्य ॥९२॥

अथ बुध महादशावर्ष १७ फल। बुधकी महादशामें मनुष्य अनेक धन और सुख-युक्त हो, दिव्य स्त्रीसे रमण करै, सब प्रयोजन सिद्ध करै, बहुत मान पावै ॥९२॥

अथ बुधमहादशायामंतर्दशाः

बुधमहादशायां बुधांतर्दशामासाद्याः ३२ । ३ । २० । ० । बुद्धिः कर्मानुरागश्च मित्रबंधुसमागमः ॥ शत्रूद्गमो देहपीडा बुधस्यांतर्गते बुधे ॥९३॥ शन्यंतर्दशामासाद्याः ॥१८।२६।४०।०। अकस्माच्छत्रुसंसर्गो ह्यकस्मादर्थसंग्रहः ॥ संपर्कोग्निगरादीनां बुधस्यांतर्गते शनौ ॥ ९४ ॥ गुर्वंतर्दशामासाद्याः ३५।२६।४०।०। स्वर्णादिधातुलाभश्च शरीरारोग्यमेव च ॥ संपत्तिर्धर्मलाभश्च बुधस्यांतर्गते गुरौ ॥९५॥ राह्वंतर्दशामासाद्याः २२।२०।०।०। प्रचंडसाहसत्वं च नानाकार्यरणोद्यमः ॥ धनधर्मादिलाभश्च बुधस्यांतर्गते स्वगौ ॥ ९६ ॥ भृग्वंतर्दशामासाद्याः ३९ । २० । ० । ० । गुरुदेवार्चने प्रीतिर्ज्ञानधर्मरतिस्तथा ॥ वस्त्रालंकरणैर्युक्तो बुधस्यांतर्गते सिते ॥९७॥ रव्यंतर्दशामासाद्याः ११।१०।०।०। व्याधिशत्रुभयैर्मुक्तः पुत्रधर्मधनागमः ॥ जायते राजमान्योऽत्र बुधस्यांतर्गते रवौ ॥९८॥ चन्द्रस्यांतर्दशामासाद्याः २८।१०।०।०। क्षयरोगोऽत्रकुष्ठं च नानापीडा कलेवरे ॥ गलरोगयुतो लोको बुधस्यांतर्गते विधौ ॥९९॥ भौमांतर्दशामासाद्याः १५।३।२०।०।०। शिरोरोगी गंडरोगी नानाक्लेशैर्निपीडितः ॥ यमभीतिश्चौरभीतिर्बुधस्यांतर्गते कुजे ॥१००॥६००॥

बुधकी महादशामें पहले बुधकी अंतर्दशाके मास ३२।३।२०।०। बुधके अंतर बुधकी दशा आवे तो वृद्धि हो, काम करनेमें प्रीति, मित्र बंधुओंका समागम, शत्रु उठे. देहमें पीडा हो ॥९३॥ शनिकी अंतर्दशा १८।२६।४०।०। है ॥ बुधके अंतर शनिकी दशा हो तो अचानकसे शत्रुओंके संग मिलना हो, द्रव्य संग्रह हो, अग्नि, विष आदिकोंका संग्रह होना ॥९४॥ बृहस्पतिके अंतर्दशामासादि ३५।२६।४०।०। है बुधके अंतर बृहस्पतिकी दशा हो तो सुवर्णादि लाभ हो, शरीरमें आरोग्य रहै, सम्पत्ति हो, धर्मका लाभ हो ॥९५॥ राहुके अंतर्दशामासादि २२।२०।०।०। बुधके अंतर राहु हो तो प्रचंड बल बढै, अनेक कार्य और युद्धमें उद्यम हो, धन धर्मादिकोंका लाभ हो ॥९६॥ भृगु० ३९। २०।०।० बुधके अंतर शुक्रकी दशा हो तो गुरु देवार्चनमें प्रीति, ज्ञान, धर्ममें रमण हो, वस्त्र आभूषणों की प्राप्ति हो ॥९७॥ सूर्य० ११।१०।०।० बुधके अंतर सूर्य आवे तो व्याधि और शत्रुके भयसे छूटै, पुत्र, धर्म, धनकी प्राप्ति हो, राजासे मान्य हो ॥९८॥ अथ चंद्र० २८।१०।०।० बुधके अंतर चंद्रमाकी दशा हो तो क्षयरोग, कुष्ठ, शरीरमें अनेक प्रकारकी पीडा हो गलके रोगसे युक्त रहै ॥९९॥ अथ भौम० १५।३।२०।०। बुधके अंतर मंगलकी दशा हो तो शिरोरोग, गलगंड, अनेक पीडा, इनसे पीडित हो, यमसे भय अथवा चोरोंसे भय हो ॥१००–६००॥

अथ शनिमहादशा वर्ष १० फलम्

मिथ्यापवादो विमुखोऽत्र बंधुर्वधोर्थहानिश्च निराशता च ।।
कार्याणि शून्यानि सुतादिहानिः क्लेशा भवन्त्येव शनेर्दशायाम् ।। १।।

अथ शनिमहादशा वर्ष १० फल । शनिकी दशामें मिथ्या विवाद, बंधुसे विमुख, वध द्रव्यकी हानि, आशानिष्फल हो, कार्य न हो, पुत्रादिकोंकी हानि, क्लेश होते हैं ।।१।।

अथ शनिमहादशायामंतर्दशाः

शनिमहादशामध्ये शन्यन्तर्दशामासाद्याः ११।३।२०।०। शरीरे जायते पीडा पुत्रदारैश्च विग्रहः।। विदेशगमनं हानिः शनेरंतर्गते शनौ ।।२।। गुर्वंतर्दशामासाद्याः २१।३।२०।०। देवगोब्राह्मणार्चात्र पुत्रमित्रधनागमः ।। प्राप्नोति च गुरुस्थानं शनेरंतर्गते गुरौ ।।३।। राह्वन्तर्दशामासाद्याः १३।१०।०।०। ज्वरातिसारपीडा च शत्रुभीतिर्धनक्षयः ।। शस्त्रघातः शरीरे स्याच्छनेरन्तर्गते स्वगौ ।।४।। शुक्रांतर्दशामासाद्याः ।२३।१०।०।०। जायाधनसुतैर्युक्तो जायतेऽत्र जयान्वितः ।। आयुरारोग्यमैश्वर्यं शनेरंतर्गते सिते ।।५।। रव्यन्तर्दशामासाद्याः ६।२०।०।०। पुत्रमित्रकलत्राणां हानिश्चार्थस्य जायते।। संशयो जीवितस्यापि शनेरन्तर्गते रवौ ।।६।। चंद्रांतर्दशामासाद्याः १६।२०।०।० गोमहिष्यादिलाभाः स्युः स्त्रीलाभो विजयः सुखम् ।। जायते कन्यकापत्यं शनेरंतर्गते विधौ ।।७।। भौमांतर्दशामासाद्याः ८।२६।४०।०।०। देशत्यागो धनत्यागो रोगः शत्रुसमागमः ।। जायतेऽत्र महाभीतिः शनेरन्तर्गते कुजे ।।८।। बुधान्तर्दशामासाद्याः १८।२६।४०।०। धनप्राप्तिश्च बंधुभ्यः सौभाग्यं विजयः सुखम् ।। सभायां मान्यतां विद्याच्छनेरन्तर्गते बुधे ।।९।।

शनि महादशामें शनिका अंतर ११।३।२०।० शनिमें शनिका अंतर हो तो शरीरमें पीडा हो, पुत्र स्त्रियोंसे वैर हो, विदेशमें गमन हो, हानि हो ।।२।। अथ गुरु० २१।३। २०।०। शनिके अंतरमें गुरुकी दशा आवे तो देवता ब्राह्मणोंकी पूजा, पुत्र धनकी प्राप्ति, बड़े स्थानकी प्राप्ति हो ।।३।। राहुके अंतर्दशामासादि १३।१०।०।०। शनिके अंतर राहु हो तो ज्वर, अतिसारकी पीडा, शत्रुभय, धनक्षय हो, शरीरमें शस्त्रघात हो ।।४।। शुक्रदशांतर्मासादि २३।१०।०।०। शनिके अंतर शुक्रकी दशा आवे तो स्त्री, धन, पुत्रादिकोंसे युक्त हो, विजय पावे, आयु, आरोग्य, और ऐश्वर्यवान् हो ।।५।। सूर्यान्तिर्दशा ६।२०।०।०। शनिके अंतर सूर्यकी दशा हो तो पुत्र मित्र म्त्री इनकी हानि हो, जीनेका भी संदेह हो ।।६।। अथ चंद्रान्तर्दशा० १६।२०।०।० शनिके अंतरमें चंद्रमाकी दशा हो तो गौ भैंस आदि लाभ हो, स्त्रीलाभ, विजय सुख हो, कन्या संतान हो ।।७।। भौमान्तर्दशा० ८।२६। ४०।०। शनिके अंतरमें मंगलकी दशा आवे तो देशत्याग, धनत्याग रोग, शत्रुसमागम हो, महाभय हो ।।८।। बुधकी अंतर्दशा० १८।२६।४०।० शनिके अंतर बुध हो तो बंधुओंसे धनकी प्राप्ति हो, सौभाग्य, विजय, सुख हो, सभामें मान्यता हो ।।९।।

अथ गुरुमहादशावर्ष १९ फलम्

धर्मार्थकामैःपरिपूरितोऽत्र राजप्रतापैर्विनयैः समेतः ।। धनी जयी दारसुतादियुक्तो गुरोर्दशायां च नरो निरोगी ।।१०।।

अथ गुरुमहादशावर्ष १९ फलम् । बृहस्पतिकी दशामें धर्म अर्थ कामसे परिपूर्ण रहै, राजप्रताप, विनयसे युक्त हो, धनी, विजयी, स्त्री, पुत्रादि युक्त हो, निरोगी हो ।।१०।।

अथ गुरुमहादशायामंतर्दशाः

गुरुमहादशायां गुर्वंतर्दशामासाद्याः ४०।३।२०।०। पुत्रोत्पत्तिर्धनाप्तिश्च सर्वरत्नपरिग्रहः ।। जायतेधर्मलाभश्च गुरोरंतर्गते गुरौ ।।११।। राह्वंतर्दशामासाद्याः २५।१०।०।०। विस्फोटकादिमोहश्चशोको रोगो धनक्षयः ।। शत्रूणां च भयं विद्या-द्गुरोरंतर्गते त्वगौ ।।१२।। शुक्रांतर्दशामासाद्याः ४४।१०।०।०। कलहो मानसी पीडा वित्तनाशो महाभयम् ।। जायते स्त्रीवियोगश्च गुरोरंतर्गते भृगौ ।।१३।। रव्यंतर्दशामासाद्याः १२।२०।०।०। निर्भयः शत्रुनाशोऽत्र नृपपूजा महत्सुखम् ।। प्रचंडैः सह संगश्च गुरोरंतर्गते रवौ ।।१४।। चंद्रांतर्दशामासाद्याः ३१।२०।०।०। बहुस्त्रीसंगमक्षीणः शत्रुपीडाविवर्जितः ।। कन्यकापत्यलाभश्च गुरोरंतर्गते विधौ ।।१५।। भौमांतर्दशामासाद्याः १६।२६।४०।०। रिपुनाशो धनप्राप्तिः सर्वकार्य-समागमः ।। सुखं सौभाग्यमारोग्यं गुरोरंतर्गते कुजे ।।१६।। बुधांतर्दशामासाद्याः ३५।२६।४०।०। बुद्धिविज्ञानकौशल्यं धनबंधुसमागमः ।। गुरुदेवाग्निभक्तिश्च गुरोरंतर्गते बुधे ।।१७।। शन्यंतर्दशामासाद्याः २१।३।२०।०। वेश्यास्त्रीद्यूतमद्यैश्च धनधान्यादिसंक्षयः ।। जायते लुप्तधर्मोत्र गुरोरंतर्गते शनौ ।।१८।।

गुरुकी महादशामें गुरुकी अंतर्दशा ० । मास ४० दिन ३।२०।०। बृहस्पतिकी दशामें बृहस्पतिकीही अंतर्दशा आवे तो पुत्रकी उत्पत्ति, धनकी प्राप्ति, सर्वरत्नोंका संग्रह हो, धर्मका लाभ हो, ।।११।। राहुकी अंतर्दशा २५।१०।०।०। बृहस्पतिके अंतर राहुकी दशा हो तो विस्फोटकादि बीमारी, मोह, शोक, रोग, धनक्षय हो शत्रुओंका भय हो ।।१२।। शुक्रान्तर्दशा ० ।।४४।। ।१०।०।०। बृहस्पतिके अंतर शुक्रकी दशा हो तो क्लेश हो, मानसी पीडा हो, द्रव्यनाश हो, महाभय हो, स्त्रीका वियोग हो ।।१३।। सूर्यकी अंतर्दशा० १२। २०।०।०। गुरुकी दशामें सूर्य आवे तब निर्भय, शत्रुका नाश, राजासे पूजा महासुख हो, क्रोधी (क्रूर) जनोंके साथ संयोग रहे ।।१४।। चन्द्रान्तर्दशा० ३१।२०।०।०। बृहस्पतिके अंतर चंद्रमाकी दशा हो तो बहुत स्त्रियोंसे संग हो, क्षीणता हो, शत्रुकी पीडा नहीं हो, कन्याकी संतान हो ।।१५।। मंगलकी अंतर्दशा० १६।२६।४०।० । बृहस्पतिके अंतर मंगलकी दशा हो तो शत्रुनाश, धनकी प्राप्ति, सब कार्यमें समागम, सुख, सौभाग्य, आरोग्य हो ।।१६।। बुधकी अंतर्दशा० ३५।।२६।।४०।०। बुद्धिकी निपुणता, चतुराई, धन, बंधुओंका समागम, गुरु देवताकी भक्ति हो ।।१७।। शनिकी अंतर्दशा ०२१।३।२०।०। बृहस्पतिमें शनिका अंतर हो तो वेश्या, स्त्री, जूवा, मदिरा, इन करके धन धान्यादि नष्ट हों, धर्मका लोप हो ।।१८।।

अथ राहुमहादशावर्ष १२ फलम्

ज्ञानस्य हानिर्गमनं विदेशे धर्मस्य हानिर्विविधाश्च रोगाः ।। सर्वत्र शून्यं तनुसंशयश्च राहोर्दशायां नियतं नरस्य ।।१९।।

अथ राहुकी महादशावर्ष १२ फलम्। मनुष्योंको राहुकी महादशा जब आवे तब ज्ञानकी हानि हो, विदेशमें गमन हो धर्मकी हानि हो, अनेक प्रकारके रोग हों, सब जगह हानि हो, शरीरमें संदेह हो ।।१९।।

अथ राहुमहादशायामन्तर्दशाः

राहुमहादशायां राह्वंतर्दशामासाद्याः १६।०।०।०। द्विजेंद्रैः सह संसर्गः स्त्रीलाभो धनसंचयः ।। कलहो बंधुभिः सार्द्धं राहोरन्तर्गते त्वगौ ।।२०।। शुक्रांतर्दशामासाद्याः २८।०।०।०। धर्मिष्ठः सत्यवादी च धनी रोगविवर्जितः ।। जायते राजमान्यश्च राहोरन्तर्गते सिते ।।२१।। रव्यन्तर्दशामासाद्याः ८।०।०।०। पुत्रदुःखं महाभीतिर्धननाशो महाव्यथा ।। अग्निचौरभयं क्वापि राहोरंतर्गते रवौ ।।२२।। चंद्रान्तर्दशामासाद्याः २०।०।०।०। स्त्रीनाशो धननाशश्च कलहो बांधवैः सह ।। महद्भयमवाप्नोति राहोरन्तर्गते विधौ ।।२३।। भौमांतर्दशामासाद्याः ।।१०।२०।०।०। विषशस्त्राग्निचौरेभ्यो भयं प्राप्नोति दारुणम् ।। संशयो जीवनस्यापि राहोरंतर्गते कुजे ।।२४।। बुधांतर्दशामासाद्याः २२।२०।०।०। सुहृद्बंधुजनैर्योगो धनधान्यसुखागमः ।। न कश्चिज्जायते क्लेशो राहोरंतर्गते बुधे ।। २५ ।। शन्यंतर्दशामासाद्याः १३।१०।०।०। स्वदेशस्य परित्यागः कुटुम्बैः सह संगमः ।। भृत्यार्थयोस्तथा नाशो राहोरंतर्गते शनौ।।२६।। गुर्वंतर्दशामासाद्याः २५।१०।०।०। रोगहानिर्दुःखनाशो देवब्राह्मणपूजनम्।।धनधान्यसमृद्धिश्च राहोरंतर्गते गुरौ।।२७।।

राहुकी महादशामें राहुकी अंतर्दशा मा० १६ दिन ० ।०।०। राहुमें राहुका अंतर आवे तो ब्राह्मणोंके साथ समागम हो, स्त्रीका लाभ हो, धनसंचय हो, बंधुओंके साथ क्लेश हो ।।२०।। शुक्रकी अंतर्दशा ०।।२८।०।०।०। राहुमें शुक्रकी अंतर्दशा आवे तो धर्म करनेवाला, सत्यवादी, धनी, रोगरहित राजमान्य होवे ।।२१।। अथ सूर्यकी अंतर्दशा ०।८।०।०।०। राहुके अंतरमें सूर्यकी दशा आवे तो पुत्रका दुःख, महाभय हो, धननाश, महाव्यथा हो, कभी अग्नि वा चोरसे भय हो ।।२२।। अथ चंद्रान्तर्दशा २०।०।०।० राहुके अंतरमें चंद्रमाकी दशा आवे तो स्त्रीनाश, धननाश, बंधुओंके साथ क्लेश, महान् भय हो ।।२३।। अथ भौमांतर्दशा १०।२०।०।०। राहुके अंतरमें मंगलकी दशा आवे तो विष, शस्त्र, अग्नि चोरसे दारुण भय हो, जीनेका भी संदेह हो जावे ।।२४।। अथ बुधान्तर्दशा० २२।२०।०।० राहुके अंतरमें बुधकी दशा आवे तो मित्र बंधुजनोंसे मेल हो, धनधान्य सुखकी प्राप्ति हो, कोई दुःख न हो ।।२५।। अथ शन्यन्तर्दशा० १३।१०।०।० राहुमें शनिकी अंतर्दशा आवे तो अपने देशका त्याग, कुटुंबके जनोंका समागम हो, द्रव्य और मृत्योंका नाश हो ।।२६।। अथ गुरुकी अंतर्दशा २५।१०।०।०। राहुमें बृहस्पतिका अंतर आवे तो रोगकी हानि, दुःखनाश, देवता, ब्राह्मणोंका पूजन, धन धान्यकी समृद्धि हो ।।२७।।

अथ शुक्रमहादशावर्ष २१ फलम्

भूपालमान्यो धनधान्यपूर्णो हस्त्यश्वयुक्तः प्रमदानुरक्तः ॥
मंत्रप्रयोगे निपुणश्च शास्त्रे कवेर्दशायां कुशली मनुष्यः ॥२८॥

अथ शुक्रमहादशावर्ष २१ फलम्। शुक्रकी दशा आवे तो राजासे मान्य, धन धान्यसे परिपूर्ण, हस्ती घोडोंसे युक्त, स्त्रीमें स्नेह (प्रीति) युक्त, मंत्र प्रयोग, शास्त्रमें निपुण हो ॥२८॥

अथ शुक्रमहादशायामंतर्दशाः

शुक्रमहादशायां भृग्वन्तर्दशामासाद्याः ४९।०।०।०। मानवृद्धिः सुतोत्पत्तिर्धनधान्यागमः सुखम् ॥ स्वर्णांबरादिलाभोऽत्र शुक्रस्यांतर्गते कवौ ॥२९॥ रव्यन्तर्दशामासाद्याः १४।०।०।०। शत्रुनाशो जयो नित्यं नृपलाभो महासुखम् ॥ प्रचण्डैः सह संसर्गः शुक्रस्यांतर्गते रवौ ॥३०॥ चंद्रान्तर्दशामासाद्याः ३५।०।०।०। गुरुदेवाग्निभवतोऽत्र दुःखमल्पं सुखं तथा ॥ शत्रुमित्रजनैर्योगः शुक्रस्यांतर्गते विधौ ॥३१॥ भौमांतर्दशामासाद्याः १८।२०।०।०। संग्रामेऽत्र रिपूञ्जित्वा धनं कीर्तिश्च लभ्यते ॥ आरोग्यं सुखमैश्वर्यं शुक्रस्यांतर्गते कुजे ॥३२॥ बुधांतर्दशामासाद्याः ३९।२०।०।०। नखरोगः शिरोरोगो दुःखमामाशयोद्भवम् ॥ शरीरे जायतेऽत्यंतं शुक्रस्यांतर्गते बुधे ॥३३॥ शन्यंतर्दशामासाद्याः २३।१०।०।०। वृद्धस्त्रीभिश्च संसर्गः सुखं चार्थागमस्तथा ॥ शत्रुनाशः सुहृल्लाभः शुक्रस्यांतर्गते शनौ ॥३४॥ गुर्वंतर्दशामासाद्याः ४४।१०।०।०। धनधान्यसमृद्धिश्च नानाधर्मसुतान्वितः ॥ सेनाप्रभुत्वमाप्नोति भृगोरन्तर्गते गुरौ ॥३५॥ राह्वन्तर्दशामासाद्याः २८।०।०।०। वैरं विषादं दुःखं च सदोद्वेगो महाभयम् ॥ कदाचित्सुखमाप्नोति कवेरन्तर्गते त्वगौ ॥३६॥ इत्यष्टोत्तरीदशांतर्दशाफलम् ॥

शुक्रकी अंतर्दशामें पहिले शुक्रकी अंतर्दशा मास ४९ दिन ०।०।०। है ॥ शुक्रमें शुक्रकी दशा हो तो मान बढै, पुत्र उत्पन्न हो, धन धान्यका आगमन, सुख हो, सुवर्ण वस्त्रादिकोंका लाभ हो ॥२९॥ सूर्यकी अंतर्दशा १४।०।०।०। शुक्रकी अंतर सूर्य आवे तो शत्रुनाश, नित्य जय हो, राजासे लाभ, महा सुख हो, बलवान् जनोंके साथ समागम हो ॥३०॥ चंद्रान्तर्दशा ३५।०।०।०। शुक्रमें चंद्रमाकी दशा आवे तो गुरु, देवता, अग्निका भक्त हो, दुःख हो, कछुक सुखभी हो, शत्रु और मित्र जनोंके साथ संयोग हो ॥३१॥ भौमान्तर्दशा० १८।२०।०।०। शुक्रमें मंगलकी दशा आवे तो युद्धमें शत्रुओंको जीतके धन कीर्त्तिको प्राप्त हो, आरोग्य सुख, ऐश्वर्य मिले ॥३२॥ बुधान्तर्दशा० ३९।२०।०।०। शुक्रके अंतरमें बुधकी दशा आवे तो नखरोग, शिरोरोग, आमाशयका दुःख हो, शरीरमें अत्यन्त पीडा हो ॥३३॥ शन्यन्तर्दशा० २३।१०।०।०। शुक्रके अंतर शनिकी दशा आवे तो वृद्ध स्त्रियोंके साथ मिलाप, सुख, द्रव्यकी प्राप्ति हो, शत्रुनाश, मित्र जनोंका लाभ हो ॥३४॥ गुरुकी अंतर्दशा० ४४॥१०।०।०। शुक्रके अंतर बृहस्पतिकी दशा आवे तो धन धान्यकी समृद्धि, अनेक धर्म और पुत्रसे युक्त हो, सेनाका पति हो ॥३५॥ राहुकी अंत-

दशा० २८।०।०।०। शुक्रमें राहुकी अंतर्दशा आवे वैर विषाद, दुःख, सदा उद्वेग, महाभय हो, कभी सुख भी प्राप्त हो जावे ॥३६॥ इत्यष्टोतरीदशान्तर्दशाफलम् ।

अथ विंशोत्तरीदशाः

स्फुटमायुर्हतं खेटमानेन विभजेत्ततः ॥ परमायुः १२० प्रमाणेन दशास्यांतर्दशाः स्मृताः ॥३७॥ षडा ६ दित्ये दशें १० दौ च सप्तवर्षाणि ७ मंगले ॥ अष्टादशसमा १८ राहौ षोडशाब्दा १६ बृहस्पतौ ॥३८॥ एकोनविंशति-१९ मंदे बुधे सप्तदशैं १७ व तु ॥ सप्तवर्षाणि ७ केतौ च विंशति २० भार्गवे स्मृता ॥३९॥ कृत्तिकामवधिं कृत्वा भरणीं चातिगण्यते ॥ कृत्तिकादित्रिरावृत्त्या सूर्यादिर्गणयेत्क्रमात् ॥४०॥ रविः शशी कुजो राहुर्जीवो मंदो बुधः शिखी ॥ शुक्रोऽग्निभाद्युफाभादिविश्वर्क्षादिनवेश्वराः ॥४१॥

अथ विंशोत्तरी दशा । तहां जिस ग्रहकी अंतर्दशा देखनी हो उसके वर्ष और महादशाके वर्षका गुणनकर १२० का भागदेके वर्षादिक कहै । भाग न लगे तो बारहसे गुणा करके फिर १२० का भाग देय लब्ध मास जानै शेषको तीससे गुणनकर फिर भाग देके दिन कहै इसी क्रमसे अंतर्दशा निकालै ॥३७॥ सूर्यकी महादशा ६ वर्ष, चंद्रमाकी दश १० वर्ष, मंगलकी सात ७ वर्ष, राहुकी अठारह १८ वर्ष, बृहस्पतिकी सोलह १६ वर्ष, है ॥३८॥ शनिकी उन्नीस १९ वर्ष, बुधकी सतरह १७ वर्ष है, केतुकी सात ७ वर्ष, शुक्रकी बीस २० वर्ष है ॥३९॥ कृत्तिकासे भरणीतक गिने कृत्तिका आदि तीन आवृत्ति करके सूर्य आदि ग्रहोंको क्रमसे गिनै ॥४०॥ जैसे सूर्य चंद्रमा, मंगल, राहु, बृहस्पति, शनि, बुध, केतु, शुक्र ये ग्रह हैं तहां कृत्तिका, उत्तरा फाल्गुनी, उत्तराषाढा इनपर हो तो सूर्य, इसी तरह नवग्रहोंके जानने ॥४१॥

अत्र विंशोत्तर्यामप्यष्टोत्तर्युक्तमहादशांतर्दशाफलानि रव्यादीनांज्ञेयानि ॥ तत्र केतुदशाया अभावात्केतुदशांतर्दशाफलानि लिख्यंते ॥

यह विंशोत्तरी दशामें भी अष्टोत्तरी महादशा अंतर्दशाका फल जानना, तहां केतुकी दशाका अभाव है इसलिये केतुकी दशांतर्दशाके फल लिखते हैं-

अथ केतुमहादशा वर्ष ७ फलम्

लक्ष्मीविनाशो वनितार्थहानिः शरीरपीडा नृपमानभंगः ॥
प्रियैःकुटुम्बैश्च भवेद्वियोगः केतोर्दशायां सततं च तापः ॥४२॥

अथ केतुमहादशावर्ष ७ फलम् । केतुकी दशा हो तो लक्ष्मीनाश, स्त्रीहानि, शरीरपीडा, राजासे मानभंग हो, प्रिय और कुटुम्ब जनोंके साथ वियोग हो ॥४२॥

अथ केतुमहादशायामन्तर्दशाः

तत्रादौ केतुमहादशायां केत्वंतर्दशामासाद्याः ४ । २७ । ० । ० । पुत्रनाशोर्थनाशश्च दुष्टनारीजनैः कलिः ॥ राजभीः शत्रुकलहः केतोरन्तर्गते ध्वजे ॥४३॥ शुक्रांतर्दशामासाद्याः १४।०।०।०। स्त्रीवियोगो वह्निदाहः कन्याजन्म तथा ज्वरः ॥ मित्रैः सहैव कलहः केतोरंतर्गते भृगौ ॥४४॥ रव्यंतर्दशामासाद्याः

४।६।०।० अग्निदाहो ज्वरो घोरो विदेशगमनं तथा ।। जायते क्षयरोगश्चकेतोरंतर्गते रवौ ।।४५।। चंद्रांतर्दशामासाद्याः ७ । ० । ० । ० । अर्थलाभोऽर्थहानिश्च सुखं दुःखं क्वचित्क्वचित् ।। स्त्रीलाभश्चापि भवति केतोरंतर्गते विधौ ।। ४६ ।। भौमांतर्दशामासाद्याः ४।२७।०।०। गोत्रजैः सह संवादो वह्निचोरभयं तथा ।। शरीरे जायते पीडा केतोरंतर्गते कुजे ।।४७।। राह्वंतर्दशामासाद्याः १२।१८।०।०। चौरभीतिर्देहभंगः कुमित्रैः सह संगतिः ।। कलहः शत्रुभिः साकं केतोरंतर्गते त्वगौ ।।४८।। गुर्वंतर्दशामासाद्याः ११।६।०।०। राजमान्यैर्जनैर्योगो द्विजेंद्रैश्च सुखागमः ।। भूमिलाभः पुत्रलाभः केतोरंतर्गते गुरौ ।।४९।। शन्यंतर्दशामासाद्याः १३।९।०।०। वातपित्तकृता पीडा स्वजनैः सह विग्रहः ।। देहपीडा भवेन्नित्यं केतोरंतर्गते शनौ ।।५०।। बुधांतर्दशामासाद्याः १६।२७।०।०। सुहृद्बंधुसमायोगो भूनिमित्तं च विग्रहः ।। सदा शरीरपीडा स्यात्केतोरन्तर्गते बुधे ।।५१।।

अथ केतुकी अंतर्दशा । केतुमें केतुकी दशा मास ४ दिन २७।०।०। है, केतुमें केतुकी अंतर्दशा हो तो पुत्रनाश, द्रव्यनाश, दुष्ट स्त्रियोंके साथ क्लेश, राजभय, शत्रुसे कलह हो ।।४३।। शुक्रकी अंतर्दशा० १४।०।०।०। केतुमें शुक्रकी दशा आवे तो स्त्रीसे वियोग, अग्नि-दाह, कन्याका जन्म हो, ज्वर हो, मित्रोंके साथ क्लेश हो ।।४४।। सूर्यकी अंतर्दशा ४।६।०।० केतुमें सूर्यकी अंतर्दशा आवे तो अग्निदाह, घोरज्वर, विदेशमें गमन हो, क्षय रोग हो ।।४५।। चंद्रान्तर्दशा० ७।०।०।०। केतुमें चंद्रमाकी दशा आवे तो द्रव्यलाभ, कभी द्रव्य-हानि, सुख, दुःख स्त्री लाभ हो ।।४६।। भौमान्तर्दशा० मास ४।२७।०।०। केतुमें मंगलकी दशा हो तो गोत्री बंधुओंसे संवाद, अग्नि और चोरका भय शरीरमें पीडा हो ।।४७।। राहुकी अंतर्दशा० १२।१८।०।०। केतुमें राहुकी अंतर्दशा आवे तो चोरसे भय, देहभंग, कुमित्र जनोंसे समागम, शत्रुओंके संग कलह हो ।।४८।। गुरुकी अंतर्दशा० ११।६।।०।०। केतुके अंतर वृहस्पति हो तो राजासे मान्य जनोंके साथ संयोग हो, ब्राह्मणोंसे समागम हो, भूमिलाभ तथा पुत्रलाभ हो ।।४९।। शनिकी अंतर्दशा० १३।९।०।०। केतुमें शनिकी अंतर्दशा आवे तो वात पित्तकी पीडा, स्वजनोंके साथ लडाई, नित्य देहमें पीडा हो ।।५०।। बुधकी अंतर्दशा० ११।२७।०।०। केतुमें बुधकी अंतर्दशा आवे तो मित्र और बंधु जनोंसे समागम हो, पृथ्वीके वास्ते लड़ाई हो, शरीरमें सदा पीडा रहे ।।५१।।

अथ रव्यादि ग्रहमहादशासुकेत्वंतर्दशाफलानि

तत्रादौ रविमहादशायां केत्वंतर्दशामासाद्याः ४।६।०।०। देशत्यागो बंधुनाशो धननाशः सुतक्षयः ।। सर्वत्रैवाशुभं प्रोक्तं सूर्यस्यांतर्गते ध्वजे ।।५२।। चंद्रमहादशायां केत्वंतर्दशामासाद्याः ।।७।०।०।०। चलचित्तोऽर्थनाशश्च रोगो बंधुजनक्षयः ।। जायते दुःखमेवात्र चंद्रस्यांतर्गते ध्वजे ।।५३।। भौममहादशायां केत्वंतर्दशामासाद्याः ४।२७।०।०। विषशस्त्राग्निचौरेभ्यो जायतेत्र महद्भयम् ।। सदा नरः क्लेशभागी भौमस्यांतर्गते ध्वजे ।।५४।।

अथ रव्यादिग्रहमहादशासु केतुदशाफलम् ॥ सूर्यकी महादशामें केतुकी अंतर्दशा ४।६।०।०। सूर्यके अंतर केतु हो तो देशत्याग, बंधुनाश, पुत्रक्षय हो, सब जगह अशुभ फल हो ॥५२॥ चंद्र मध्ये केतु० ७।०।०।०। चंद्रमामें केतुकी अंतर्दशा हो तो चलचित्त, द्रव्यनाश, रोग हो, बंधुजनोंका क्षय, तथा दुःख हो ॥५३॥ अथ भौममध्ये केतु० ४।२७।०।० भौममें केतुकी अंतर्दशा हो तो विष, शस्त्र, अग्नि, चोरोंसे भय हो, सदा क्लेश रहे ॥५४॥

राहुमहादशायां केत्वंतर्दशामासाद्याः ॥ १२ । १८ । ० । ० । ज्वराग्निरिपुशस्त्रेभ्यो मृत्युरायाति सर्वदा ॥ जायते घोरदुःखं च राहोरंतर्गते ध्वजे ॥५५॥ गुरुमहादशायां केत्वंतर्दशामासाद्याः ॥११।६।०।०। पुत्रबंधुकृतोद्वेगो निजस्थानविवर्जितः ॥ गुरोरंतर्गते केतौ परिभ्रमणशीलवान् ॥ ५६ ॥ शनिमहादशायां केत्वंतर्दशामासाद्याः १३।९।०।०। रक्तपित्तकृता पीडा कलहः स्वजनैः सह ॥ शनेरंतर्गते केतौ घोरदुःस्वप्नदर्शनम् ॥५७॥ अथ बुधमहादशायां केत्वंतर्दशामासाद्याः ११।२७।०।०। फलम् ॥ शोकदुःखाकुलो नित्यं शरीरे क्लेशसंयुतः ॥ भवत्येव न संदेहो बुधस्यांतर्गते ध्वजे ॥५८॥ केतुमहादशाफलं पूर्वमेव लिखितम् ॥ अथ केतुमहादशायां ७ वर्षे केत्वंतर्दशामासाद्याः ४।२७।०।०। फलं पूर्वमेव लिखितम् ॥ अथ शुक्रमहादशायां केत्वंतर्दशामासाद्याः १४।०।०।०। विदेशभ्रमणं नृणां रोगो मृत्युश्च संभवेत् ॥ सस्यकोशादिलाभोंते शुक्रस्यांतर्गते ध्वजे ॥५९॥

राहुमध्ये केतु दशा० १२।१८।०।०।० राहुमें केतुकी अंतर्दशा हो तो ज्वर अग्नि शस्त्रोंसे भय सदा हो, मृत्यु हो, घोर दुःख हो ॥५५॥ गुरु मध्ये केतु दशा० ११।६।०।०। बृहस्पतिमें केतुकी दशा हो तो पुत्र बंधुजनोंसे उद्वेग हो, अपने स्थानसे रहित हो, भ्रमता फिरे ॥५६॥ शनिमध्ये केतु दशा० १३।९।०।०। शनिमें केतुकी दशा हो तो रक्तपित्तसे पीडा हो, स्वजनोंसे कलह हो, घोर बुरे सुपने आवें ॥५७॥ अथ बुधमध्ये केतु० ११।२७।०।०। फलम्—बुधमें केतुकी दशा आवे तो नित्यप्रति शोक दुःखसे पीडा हो, शरीरमें निश्चय दुःख हो ॥५८॥ केतुकी महादशाका फल पहले लिख दिया है, केतुमें केतुकी अंतर्दशाका फलभी लिख चुके हैं। अथ शुक्रदशामध्ये केतु० मास १४।०।०।०। शुक्रमें केतुकी दशामें विदेशमें भ्रमण हो, रोग तथा मृत्यु हो, अंतमें खेती, खजाना आदिका लाभ हो ॥५९॥

अथ वर्षदशाः

जन्मलग्नं समायुक्तं गतवर्षगणैश्च तत् ॥
हृतं द्वादशभिः शेषे ग्रहैर्वाच्यं शुभाशुभम् ॥६०॥

अथ वर्षदशा। जन्मलग्नमें गतवर्षोंको जोड़ बारहका भाग दे जो बाकी रहे उसही (लग्नसे) ग्रहों करके शुभाशुभ फल कहैं ॥६०॥

अथ मासदशाः

विंशतिर्वासराः २० सूर्ये पंचाश ५० च्च निशाकरे। सप्तविंशति २७ रंगारे सप्तपंचाश ५७ विदुजे ॥६१॥ त्रयस्त्रिंश ३३ च्च मन्देहस्युस्त्रिषष्टि ६३ श्च

बृहस्पतौ ।। विंशतिः २० सैंहिकेये च केतोरपि च विंशतिः २० ।।६२।। सप्तति ७० भृगुपुत्रे स्युर्ज्ञेया मासदशा बुधैः ।। नामराशिं समारभ्य संक्रमावधि गण्यते ।।६३।।

अथ मासदशा। बीस २० दिनतक सूर्यकी दशा, पचास ५० दिनतक चंद्रमाकी दशा, सताईस २७ दिनतक मंगलकी दशा ।।६१।। फिर तेतीस ३३ दिनतक शनिकी, तिरेसठ ६३ दिनतक बृहस्पतिकी बीस २० दिनतक राहुकी, बीस २० दिनतक केतुकी ।।६२।। सत्तर ७० दिनतक शुक्रकी मानदशा पंडित जनोंने जाननी (इसका ऐसा क्रम है कि) नाम राशिसे जन्मके सूर्यसे दशा प्रारंभ होती है ।।६३।।

अथ दिनदशाः

तिथिं वारं च नक्षत्रं नामाक्षरसमन्वितम् ।। नवभि ९ स्तु हरेच्छेषं दिनग्रहदशोच्यते ।।६४।। इति विंशोत्तरीग्रहक्रमेण दिनदशा ।।

अथ दिनदशा। तिथि वार नक्षत्र नामके अक्षर इनको इकट्ठे कर नवका भाग दे बाकी रही दिनदशा जाननी ।।६४।। यह विंशोत्तरी ग्रहक्रमसे दिनदशा होती है।

अन्यच्च

चैत्रादेर्द्विगुणा मासा गताभिस्तिथिभिर्युताः ।। सप्तभिश्चहरेद्भागं शेषाद्दिनदशाफलम् ।। ६५ ।। संपत्तिः कलहो लोकैरानंदः कालकंटकः ।। धर्मस्तपश्च विजयो रविवारात्क्रमात्फलम् ।।६६।।

अन्य प्रकार। चैत्र आदि महीनोंको दूनाकर गत तिथि मिलाके सातका भाग दे बाकी दिनदशा जाननी ।।६५।। संपत्ति[१], लोगोंसे [२]कलह, आनंद[३], कालकण्टक[४], धर्म[५], तप[६], विजय[७], यह फल रविवार क्रमसे जानना ।।६६।।

अथ क्रूरग्रहशुभग्रहदशाफलविचारः

क्रूरग्रहदशायां चेत्क्रूरस्यांतर्दशा यदा ।। शत्रुयोगे भवेन्मृत्युर्मित्र योगे च संशयः ।।६७।। मंगलस्य दशायां चेच्छनेरंतर्दशा यदि ।। म्रियतेऽत्र चिरंजीवी का कथा स्पल्पजीविनाम् ।।६८।। क्रूरराशौ स्थितः पापः षष्ठे वा निधनेऽपि वा ।। सितेन रविणा दृष्टः स्वपाके मृत्युदायकः ।।६९।। लग्नस्याधिपतेः शत्रुर्लग्नस्यांतर्दशा यदा ।। करोत्यकस्मान्मरणं सत्याचार्येण भाषितम् ।।७०।। इति दशारिष्टम् ।।

अथ क्रूरग्रह शुभ ग्रह दशाफल विचार। जो क्रूर ग्रहकी दशामें क्रूर ग्रहकी अंतर्दशा हो तो शत्रु ग्रहके योग होनेसे मृत्यु हो। जो मित्र ग्रह योग हो तो संदेह (दुःख हो) ।।६७।। जो मंगलकी दशामें शनिकी अंतर्दशा हो तो चिरंजीवी नर भी मरै, स्वल्प आयुवालोंकी तो क्या कथा है, ।।६८।। क्रूरग्रहकी राशिपर स्थित हुआ पापग्रह छठे वा आठवें घरमें स्थित हो, शुक्र अयवा सूर्यसे देखा जाता हो तो अपनी दशामें मृत्यु करै ।।६९।। लग्नके पति ग्रहका शत्रु लग्नमें स्थित हो और उसकी अंतर्दशा हो तो शीघ्रही मृत्यु करै यह सत्याचार्यने कहा है ।।७०।। इति दशारिष्टफलम् ।।

दशायां बलवान्खेटः शुभैर्वा सन्निरीक्षितः ।। सौम्याधिमित्रवर्गस्थोरिष्ट-भंगकरस्तदा ।।७१।। मूलपाकाधिनाथस्य वाचस्पतिदशा यदि ।। बली शुभोथ

विज्ञेयोरिष्टभङ्गस्तदा बुधैः ।।७२।। शुभग्रहो ग्रहैर्युक्तो विजयी यदि जायते ।। दशायां न भवेत्कष्टं स्वोच्चादिषु च संस्थितः ।। ७३।। इति लग्नचन्द्रिकायां तृतीयः परिच्छेदः ।।३।।

दशामें बलवान् ग्रह हो अथवा शुभ ग्रहों करके शुभग्रह देखा जाता हो, शुभग्रह वा मित्रके वर्गमें स्थित हो तो उस ग्रहकी दशामें अरिष्टभंग हो ।।७१।। मूलदशानाथकी दशामें जो बृहस्पतिकी दशा आ जावे तो शुभ ग्रह हो बली जानना, उससे रिष्टभंग होता है ।।७२।। शुभग्रह शुभग्रहोंसे युक्त हो तो विजय करै वह ग्रह उच्च आदि शुभ हो तो अरिष्ट न होवे ।।७३।।

इति श्रीवेरीपुरनिवासिगौडपण्डितद्विजशालग्रामात्मजपंडितवसतिरामविरचिते लग्नचंद्रिकाहिन्दीटीकायां तृतीयः परिच्छेदः ।।३।।

अथ चतुर्थपरिच्छेदः

अथ रविद्विग्रहयोगाः

सू० चं० स्त्रीजितः कूटधर्मा च दुर्विनीतो दयादृढः ।। विक्रमी लघुचेताश्च सूर्यचंद्रसमागमे।।७४।। सू०मं०।। मिथ्यावादी च मूर्खश्च वधनिष्ठो बली नरः।। तेजस्वी पापचित्तश्च सूर्यभौमसमागमे ।।७५।। सू० बु० विद्वानर्थी राजमान्यः सेवाशीलः प्रियंवदः।। यशस्वी चास्थिरद्रव्यः सूर्यसौम्यसमागमे।।७६।। सू० गु० नृपमान्यो धर्मनिष्ठो मित्रवानर्थवानपि।। उपाध्यायोऽतिविख्यातो सूर्यजीवसमागमे ।।७७।। सू० शु०।। शस्त्रप्रहारी बंधश्च रंगज्ञो नेत्रदुर्बलः ।। स्त्रीसंगलब्धद्रव्यश्च शक्तोर्कभृगुसंगमे ।।७८।। सू० श०।। विद्वानात्मक्रियानिष्ठो गुणज्ञो वृद्धचेष्टितः।। प्रनष्टसुतदारश्च सूर्यमन्दसमागमे ।।७९।।

अथ रविद्विग्रहयोगाः। जन्म कुण्डलीमें सूर्य चंद्रमाका योग हो तो स्त्रीजित, झूठा, नीतिरहित, दयामें दृढ, पराक्रमी, हलके चित्तवाला हो ।।७४।। सूर्य मंगलका योग हो तो मिथ्यावादी, मूर्ख, हिंसा करनेवाला, बली, पापचित्तवाला हो ।।७५।। सूर्य बुधका योग हो तो विद्वान् मतलबी, राजमान्य, सेवा करनेवाला, प्रिय बोलनेवाला, यशस्वी, अस्थिर द्रव्यवाला ।।७६।।

सूर्य बृहस्पतिका योग हो तो राजासे मान्य, धर्मनिष्ठ, मित्रवान् धनवान् हो, उपाध्याय (पढानेवाला) और अतिविख्यात हो ।।७७।। सूर्य शुक्रका समागम हो तो शस्त्रप्रहार करनेवाला, बांधनेवाला, रंग जाननेवाला, दुर्वल नेत्रवाला, स्त्रीसे द्रव्य प्राप्ति करनेवाला,

समर्थ हो ।।७८।। सूर्य शनिका समागम हो तो विद्वान् आत्मक्रियामें निष्ठावाला, गुणज्ञ, वृद्धजनोंकी चेष्टा करनेवाला, पुत्र स्त्री रहित हो ।।७९।।

अथ चंद्रद्विग्रहयोगाः

चं० मं० ।। मृच्चर्मधातुशिल्पी च धनी शूरो रणे भवेत् ।। रक्तपीडातुरो नित्यं चन्द्रभौमसमागमे ।।८०।। चं० बु० ।। स्त्रीसंमतः सुरूपश्च काव्येतिनिपुणो भवेत् ।। धनी गुणी हास्यवक्त्रश्चंद्रसौम्यसमागमे ।।८१।। चं० गु० । देवद्विजार्चासिक्तश्च बंधुमानकरो धनी ।। दृढप्रीतिः सुशीलश्च चन्द्रजीवसमागमे ।।८२।। चं० शु० ।। कुशली विक्रयादौ च वृद्धिज्ञः कलहप्रियः ।। माल्यवस्त्रादिसंयुक्तः शशिभार्गवसंगमे ।।८३।। चं० श० गजाश्वपालो दुःशीलो वृद्धस्त्रीरमणो नरः ।। वेश्याधनोऽनपत्यश्च चन्द्रमन्दसमागमे ।।८४।।

अथ चंद्रद्विग्रहयोगाः। चंद्रमङ्गलका योग हो तो मृत्तिका, चर्म, धातु, इनकी कारीगरी करनेवाला, धनी, रणमें शूरवीर हो, नित्यप्रति रक्तकी पीडासे व्याकुल रहै ।।८०।। चंद्रमा बुधका समागम हो तो स्त्रीसे माना हुआ सुंदर रूपवाला, कवितामें अत्यंत निपुण हो, धनी, गुणी, हास्य मुखवाला हो ।।८१।। चंद्र गुरुका समागम हो तो देवता ब्राह्मणोंकी पूजामें तत्पर, बंधुओंका मान करनेवाला, धनी, दृढ प्रीतिवाला हो, सुंदर स्वभाववाला हो ।।८२।। चंद्रशुक्रका योग हो तो बेचने आदि व्यवहारमें चतुर, वृद्धिको जाननेवाला कलह करनेवाला होता है, माला और वस्त्रादिकोंसे युक्त हो ।।८३।। चंद्रशनिका योग हो तो हस्ती, अश्व, आदि पालनेवाला, दुष्ट स्वभाववाला, वृद्ध स्त्रीसे रमण करनेवाला हो, वेश्याकोही धन समझनेवाला, संतानरहित होता है ।।८४।।

अथ भौमद्विग्रहयोगाः

मं० बु०।। स्त्रीदुर्भगः क्रयप्रीतिः स्वर्णलोहप्रकारकः।। निर्धनो विधवाभर्ता भूपुत्रबुधसंयुतौ।।८५।। मं०गु०।। मेधावी शिल्पशास्त्रज्ञः श्रुतिज्ञो वाग्विशारदः।। अश्वप्रियः प्रधानश्च भौमजीव समागमे ।।८६।। मं० शु० ।। गुणप्रधानो निपुणो द्यूतेऽनृतरतः शठः ।। परदाररतो मान्यो भौमशुक्रसमागमे ।।८७।। मं० श० ।। वाग्मींद्रजालदक्षश्च विधर्मा कलहप्रियः ।। विषमद्यप्रपंचाढ्यो भौममंदसमागमे ।।८८।।

अथ भौमद्विग्रहयोगाः। मंगल बुधका योग हो तो दुर्भगा स्त्रीवाला, खरीदनेका व्यवहार करनेवाला, सुवर्ण लोहकी कार करनेवाला, निर्धन विधवा पति (संभोग करनेवाला) हो ।।८५।। मङ्गल गुरुका संयोग हो तो बुद्धिमान्, शिल्प शास्त्रको जाननेवाला, वेदको जाननेवाला, वाणी बोलनेमें चतुर, घोड़ोंको प्रिय (रखनेवाला) प्रधान (मुख्य) हो ।।८६।। मंगल शुक्रका संयोग हो तो गुण प्रधान, निपुण, जूवा झूठमें रत, मूर्ख, परस्त्रीमें रत, मान्य हो ।।८७।। मंगल शनिका योग हो तो वाणीकी चतुराईवाला, इन्द्रजाल विद्यामें निपुण, धर्मरहित, कलहप्रिय, विषमदिराके प्रपंच रचनेवाला हो ।।८८।।

अथ बुधद्विग्रहयोगाः

बु० गु० ।। धैर्ययुक्तः पंडितश्च सुखी भवति मानवः ।। नृत्ये वाद्ये च कुशलो बुधजीवसमागमे ।।८९।। बु०शु० ।। धनी सुवाक्यो वेदज्ञो गीते हास्ये च लालसः ।। नयज्ञो बहुशिल्पज्ञो बुधशुक्रसमागमे ।।९०।। बु० श० ऋणी गमनशीलश्च निरुपायोतिनिष्ठुरः ।। शुभवाक्यः काव्यदक्षो बुधमंदसमागमे ।।९१।।

अथ बुधद्विग्रहयोगाः । बुध बृहस्पतिका योग हो तो धैर्ययुक्त, पंडित, सुखी, नृत्य, बाजामें चतुर मनुष्य हो ।।८९।। बुध शुक्रका योग हो तो धनी, सुंदर बोलनेवाला, वेदवेत्ता, गीत हास्यमें रुचिवाला, नीति जाननेवाला, बहुत शिल्प शास्त्रको जाननेवाला हो ।।९०।। बुध शनिका योग हो तो कर्जावाला, गमन करनेवाला, उपाय रहित, अत्यन्त कठोर, शुभ बोलनेवाला, काव्यमें निपुण हो ।।९१।।

अथ गुरुद्विग्रहयोगाः

गु० शु० ।। धर्मस्थितः प्रमाणज्ञो विद्याजीवी च जायते ।। दिव्यदारो बहुधनो गुरुभार्गवसंगमे ।।९२।। गु० श० ।। वृत्तिसिद्धिश्च शूरश्च यशस्वी नगराधिपः ।। श्रेणीसेनाग्राममुख्यो गुरुमंदान्वये नरः ।।९३।।

अथ गुरुद्विग्रहयोगाः । गुरु शुक्रका योग हो तो धर्ममें स्थितिवाला, प्रमाणको जाननेवाला, विद्यासे आजीविका करनेवाला, दिव्य स्त्रीवाला बहुत धनवाला हो ।।९२।। गुरु और शनि इनके योगमें जन्मा हुआ पुरुष उपजीविकामें सिद्ध रहता है, शूर और कीर्तिमान् होता है, नगरका स्वामी, समूह, सेना, तथा ग्राम इन्होंमें मुख्य होता है ।।९३।।

अथ भृगुद्विग्रहयोगाः

शु० श० दारुदारणदक्षश्च क्षाराम्लादिकशिल्पवित् ।। मल्लः पशुपतिर्मंदचक्षुः शनिसितान्वये ।।९४।।

शुक्र और शनि इनके योगमें काष्ठोंके चीरफाड करनेमें कुशल, क्षार तथा खट्टा पदार्थ निर्माणकी कला जाननेवाला, मल्ल, गाय, भैंसा इन्होंका मालिक होता है ।।९४।।

अथ त्रिग्रहयोगाः तत्रादौ रवित्रिग्रहयोगाः

सू० मं० बु० ।। भानुभौमबुधैर्योगे ख्यातः साहसिको नरः ।। निष्ठुरो गतलज्जश्च धनस्त्रीपुत्रपीडितः ।।९५।। सू० । मं० गु० ।। सूर्यभौमेज्यसंयोगे प्रचंडः सत्यभाषणः ।। राजमंत्री च मुख्यश्च वाक्ये च निपुणो भवेत् ।।९६।। सू० मं० शु० ।। सूर्यारशुक्रसंयोगे सुभगो भजने रतः ।। कुलीनो वत्सलो लोके विषयासक्तमानसः ।।९७।। सू० मं० श० ।। सूर्यारशनिसंयोगे मूर्खो गोधनवर्जितः ।। रोगार्तः स्वजनैर्हीनो विकलः कलहाकुलः ।।९८।। सू० बु० गु० ।। सूर्यसौम्येज्यसंयोगे नेत्ररोगी महाधनः ।।

शस्त्रशिल्पकलाभिज्ञो लिपिकर्त्ता भवेन्नरः ।।९९।। सू० बु० शु० ।। सूर्यज्ञशुक्रसंयोगे गुरुवर्गे समावृतः ।। अभिशस्तो दिशो याति स्त्रीहेतोस्तप्तमानसः १००।७००।। सू० बु० श० ।। सूर्यज्ञशनिभिर्योगे दुराचारः पराजितः ।। बंधुभिश्च परित्यक्तो विद्वेषी जायते नरः ।।१।। सू० गु० शु० ।। सूर्येज्यशुक्रसंयोगे राजमंत्री च निर्धनः ।। दुष्टचक्षुर्भवेत् क्रूरः प्राज्ञश्च परकर्मकृत् ।।२।। सू० गु०श० ।। सूर्येज्यशनिभिर्योगे पुत्रमित्र कलत्रवान् ।। निर्भयो नृपनिष्ठश्चद्वेष्यो बन्धुजनस्य च ।।३।। सू० शु०श०।। सूर्यशुक्रार्किसंयोगे कलामानविवर्जितः । कुष्ठी शत्रुजयोद्विग्नो दुराचारी भवेन्नरः ।।४।। चं० मं० बु० ।। चंद्रारबुधसंयोगे त्वनाचारी च पापकृत् ।। आजीविकाहतो लोके बंधुहीनश्च जायते ।।५।। चं० मं० गु० ।। चंद्रभौमेज्यसंयोगे स्त्रीलोलो व्रणसंयुतः ।। कांतश्च संमतः स्त्रीणां चन्द्रतुल्यमुखो भवेत् ।।६।। चं० मं० शु० ।। चन्द्रारभृगुसंयोगे दुःशीलायाः पतिः सुतः ।। सदा भ्रमणशीलश्च शीतभीतोऽपि जायते ।।७।। चं० मं० श० ।। चंद्रारशनिभिर्योगे बाल्ये च मृतमातृकः ।। क्षुद्रश्च लोकविद्विष्टो विषमो जायते नरः ।।८।। चं० बु० गु० ।। चंद्रज्ञजीवैः संयोगे यशस्वी धनवानपि ।। पुत्रमित्रादिसंयुक्तो वाग्मी ख्यातश्च कीर्तिमान् ।।९।। चं० बु० शु० ।। चंद्रज्ञभार्गवैर्योगे विद्यया संयुतो नरः ।। सेर्ष्यो धनातिलोभी च नीचाचारश्च जायते ।।१०।। चं० बु० श० ।। चंद्रज्ञशनिभिर्योगे प्राज्ञो भूपतिपूजितः ।। अत्युच्चो विपुलांगश्च वाग्मी भवति मानवः ।।११।। चं० गु० शु०।। चंद्रेज्य-शुक्रसंयोगे साध्वीपुत्रश्च पंडितः ।। साधुः सर्वकलाभिज्ञः सुभगो जायते नरः ।।१२।। चं० गु० श० ।। चंद्रेज्यशनिभिर्योगे नीरोगः स्त्रीरतो नरः । शास्त्रार्थविज्ञो नीतिज्ञो ग्रामपत्तनपालकः ।।१३।। चं० शु० श० ।। चन्द्रशुक्रार्किभिर्योगे लिपिकर्त्ता च वेदवित् ।। पुरोहितकुलोत्पत्तिर्भवेत्सुपुस्तकवाचकः ।। १४ ।। मं० बु० गु० ।। भौमज्ञ जीवैः संयोगे सुकविर्युवतीपतिः ।। परोपकारकृत्तीक्ष्णो गांधर्वकुशलो नरः ।।१५।। मं० बु० शु० ।। भौमज्ञभृगुभिर्योगे विकलांगश्च चञ्चलः ।। अकुलीनः सदोत्साही दृप्तश्च मुखरो नरः ।।१६।। मं० बु० श० ।। कुजज्ञशनिभिर्योगे प्रवासी नेत्ररोगवान् ।। प्रेष्यो वदनरोगी च हास्यलुब्धो भवेन्नरः ।।१७।। मं० गु० शु० ।। कुजेज्यभृगुभिर्योगे दिव्यनारीयुतः सुखी ।। सर्वानन्दकरो लोके जायते नृपतिप्रियः ।।१८।। मं० गु० श० ।। भौमजीवार्किभिर्योगे क्षतांगो राजसंमतः ।। नीचाचारो निर्घृणश्च भवेन्मित्रैर्विगर्हितः ।।१९।। मं० शु० श० ।। कुजशुक्रार्किसंयोगे दुःशीलायाः पतिः सुतः ।। प्रवासशीलो दुःखी च जायते जातकः सदा ।।२०।। बु० गु० शु० ।। बुधेज्यभृगुसंयोगे सुतनुर्नृपपूजितः ।। क्षतारिर्दीर्घकीर्त्तिश्च सत्यवादी भवेन्नरः ।।२१।। बु० गु० श० ।। बुधजीवार्किसंयोगे सुदारो बहुभोगवान् ।। धनैश्वर्ययुतः प्रायः सुखधैर्ययुतो भवेत् ।।२२।। बु० शु० श० ।। बुधशुक्रार्किभिर्योगे

मुखरः परदारगः ।। असंगत्यकलाभिज्ञः स्वदेशनिरतो जनः ।।२३।। गु० शु० श० ।। गुरुशुक्रार्किभिर्योगे राजा भवति कीर्त्तिमान् ।। नीचवंशेपि संभूतः शीलयुक्तो नृपोत्तमः ।।२४।। प्रायः पापैर्युते चंद्रे मातुर्नाशो रवौपितुः ।। शुभग्रहैः शुभं वाच्यं मिश्रैर्मिश्रं फलं वदेत् ।।२५।। शुभास्त्रयो ग्रहायुक्ताः कुर्वंति सुखिनं नरम् ।। पापास्त्रयो दुःखितं च दुर्विनीतं विगर्हितम् ।।२६।।

सूर्य मंगल और बुध इनके योगमें जो पुरुष जन्मता है वह विख्यात और साहस कर्म करनेवाला होता है, और निर्दय, निर्लज्ज होता है तथा धन स्त्री और पुत्रसे पीडित रहता है ।।९५।। सूर्य मंगल बृहस्पति इनका योग हो तो प्रचंड, सत्य बोलनेवाला, राजाका मंत्री, मुख्य जन, अपने वचनमें निपुण हो ।।९६।। सूर्य मंगल शुक्रका योग हो तो सुंदर ऐश्वर्यवान्, भजन करनेमें नियुक्त, कुलीन, दयावान् हो, विषयमें आसक्त मनवाला हो ।।९७।। सूर्य, मंगल, शनिका योग हो तो मूर्ख, धनहीन, रोगसे पीडित, स्वजनोंसे हीन, विकल, कलह करनेवाला हो ।।९८।। सूर्य बुध बृहस्पतिका योग हो तो नेत्ररोगी, महाधनी, शस्त्रविद्या कारीगरीको जाननेवाला, लिखनेका काम करनेवाला हो ।।९९।। सूर्य बुध शुक्रका योग हो तो गुरुजनोंके (काममें) लगा हुआ हो, उत्तम, श्रेष्ठ मार्गमें चलनेवाला, स्त्रीके वास्ते संतप्त मनवाला हो ।।१००।।७००।। सूर्य, बुध, शनिका योग हो तो दुराचारी, हारनेवाला, बंधुओंसे त्यागा हुआ, विद्वेष करनेवाला हो ।।१।। सूर्य गुरु शुक्रका योग हो तो राजाका मंत्री, निर्धन हो, बुरे नेत्रोंवाला, क्रूर, पंडित, पराया काम करनेवाला होता है ।।२।। सूर्य गुरु शनिका योग हो तो पुत्र मित्र स्त्रीवाला हो, निर्भय रहे, राजामें निष्ठा करै, बंधुजनसे वैर करै ।।३।। सूर्य शुक्र शनिका योग हो तो कला, और मानसे रहित हो, कुष्ठी हो, शत्रुको जीतनेवाला, उद्विग्न, दुराचारी मनुष्य होवे ।।४।। चंद्र, मंगल, बुधका योग हो तो आचाररहित, पाप करनेवाला, संसारमें आजीविकाहीन, बंधुहीन होता है ।।५।। चंद्र मंगल बृहस्पतिका योग हो तो स्त्रीविषे चञ्चल रहनेवाला, व्रणसे संयुक्त, मनोहर, स्त्रियोंका माना हुआ, चंद्रमाके समान मुखवाला होवे ।।६।। चंद्रमा, मंगल, शुक्रका योग हो तो दुष्ट स्वभाववाली स्त्रीका पति और (ऐसेही स्त्रीका) पुत्र हो, सदा भ्रमता रहै, शीतसे डरता रहे ।।७।। चंद्रमा, मंगल, शनिका योग हो तो बालक अवस्थामें माता मरै, तुच्छ जन हो, लोगोंसे वैर करै, विषम कुटिल नर हो ।।८।। चन्द्र, बुध, गुरुका योग हो तो यशस्वी, धनवान् हो, पुत्रमित्रादिकोंसे युक्त, अच्छी तरह बोलनेवाला, विख्यात कीर्तिमान् ।।९।। चंद्र बुध शुक्रका योग हो तो विद्यावान् ईर्षावाला, धनका अत्यंत लोभी, नीच आचरण करनेवाला हो ।।१०।। चंद्र, बुध, शनिका योग हो तो पंडित, राजासे पूजित हो, अत्यंत ऊंचा, भारी शरीरवाला, चतुराईसे बोलनेवाला नर हो ।।११।। चन्द्र बृहस्पति शुक्रका योग हो तो उत्तम स्त्रीका पुत्र हो, पंडित हो, साधुजन, सब कलाओंको जाननेवाला सुंदर ऐश्वर्यवान् हो ।।१२।। चन्द्र, बृहस्पति शनिका योग हो तो रोग रहित हो, स्त्री विषे रत, शास्त्रार्थको जाननेवाला, ग्राम, शहरका पालक (नम्बरदार) हो ।।१३।। चंद्र शुक्र शनिका योग हो तो लिखनेका काम करनेवाला, वेदको जाननेवाला, पुरोहित कुलमें जन्मा हुआ, पुस्तक वांचने-

वाला हो ।।१४।। मंगल बुध बृहस्पतिका योग हो तो सुंदर कवि, सुंदरी स्त्रीका पति, पराया उपकार करनेवाला, तीक्ष्ण गंधर्व विद्यामें निपुण (गायक) हो ।।१५।। मङ्गल बुधका शुक्रका योग हो तो विकल अंगवाला, चञ्चल स्वभाववाला, तुच्छ कुलमें जन्मा सदा उत्साहवाला अभिमानी, वाचाल मनुष्य हो ।।१६।। मङ्गल बुध शनिका योग हो तो प्रवासी (परदेशमें रहनेवाला) नेत्ररोगी, प्रेरणाका काम करनेवाला, मुखका रोगी, हास्यका लोभी हो ।।१७।। मङ्गल बृहस्पति शुक्रका योग हो तो दिव्य स्त्रीसे युक्त हो, सुखी, लोकमें सब आनंदको भोगनेवाला राजाका प्रिय हो ।।१८।। मङ्गल बृहस्पति शनिका योग हो तो क्षत (चोट युक्त) अंगवाला, राजाका प्रिय हो, नीच आचारवाला, दया रहित, मित्रजनोंसे निंदित हो ।।१९।। मङ्गल, शुक्र, शनिका योग हो तो दुष्ट स्वभाववाली स्त्रीका पति और (ऐसेहीका) पुत्र भी हो, परदेशमें रहनेवाला, सदा दु:खी हो ।।२०।। बुध, बृहस्पति, शुक्रका योग हो तो सुंदर शरीरवाला राजासे पूजित, शत्रुओंको नष्ट करनेवाला, वडी कीर्तिवाला, सत्यवादी नर हो ।।२१।। बुध गुरु शनिका योग हो तो सुंदर स्त्रीवाला, बहुत भोगी, धन और ऐश्वर्यसे युक्त विशेष करके सुख धैर्यसे युक्त हो ।।२२।। बुध, शुक्र शनिका योग हो तो वाचाल, पराई स्त्रीसे रमण करनेवाला, सत्संगतिरहित, कलाओंको नहीं जाननेवाला, सदा अपने देशमें रहे ।।२३।। बृहस्पति शुक्र शनिका योग हो तो कीर्तिमान् राजा हो, नीच वंशमें जन्मा हुआ भी शीलयुक्त उत्तम राजा हो ।।२४।। विशेष पापग्रहोंसे युक्त हुआ चंद्रमा माताको नष्ट करै, सूर्य पिताको नष्ट करै, शुभग्रह हो तो शुभफल कहै, मिश्रग्रह हो तो मिश्र (मध्यम) फल कहै ।।२५।। तीन शुभग्रह इकट्ठे हों तो मनुष्यको सुखी करै, तीन पापग्रह मनुष्यको दु:खी दुर्विनीत निंदित करै ।।२६।। इति त्रिग्रहयोगाः ।

अथ चतुर्ग्रहयोगाः

सू० चं० मं० बु० ।। अर्केन्दुकुजसौम्यानां योगे लिपिकरो भवेत् ।। तस्करो मुखरो वाग्मी मायायां कुशलो भिषक् ।।२७।। सू० चं० मं० ग० सूर्येन्दुकुजजीवानां संयोगे निपुणो धनी।। तेजस्वी गतशोकश्च नीतिज्ञश्च भवेन्नरः ।।२८।। सू० मं० चं० शु० ।। रवींदुभौमशुक्राणां योगे विद्यार्थसंग्रही ।। सुखी पुत्री कलत्री च वाग्वृत्तिर्मनुजो भवेत् ।।२९।। सू० चं० मं० श० ।। अर्केंदुकुजमंदानां योगे मूर्खश्च निर्धनः ।। ह्रस्वो विषमदेहश्च भिक्षावृत्तिर्भवेन्नरः ।।३०।। सू० चं० बु० गु० ।। अर्केंदुबुधजीवानां योगे शिल्पकरो धनी ।। सौवर्णिकः प्लुताक्षश्च रोगहीनश्च जायते ।।३१।। सू० चं० बु० शु० ।। रविचंद्रज्ञशुक्राणां संयोगे सुभगो नरः।। ह्रस्वश्च राजमान्यश्च वाग्मी च विकलो नरः।।३२।। सू० चं० बु० श० ।। रवि चंद्रज्ञमंदानां योगे भिक्षाशनो नरः ।। वियुक्तः पितृमातृभ्यां विकलाक्षश्च निर्धनः ।।३३।। सू०चं० गु० शु० ।। सूर्यचंद्रेज्यशुक्राणा संबंधे रजपूजितः ।। जलारण्यमृगस्वामी नरः स्यान्निपुणः सुखी ।।३४।। सू० चं० गु० श० ।। सूर्यचंद्रेज्य मंदानां

मान्यश्च वनिताप्रियः ।। बहुवित्तसुतस्तीक्ष्णः समाक्षश्च प्रजायते ।।३५।। सू० चं० शु० श० ।। रवींदुभृगुमंदानां योगेऽत्यंतदुर्बलः ।। वनितासदृशाचारो भीरुरग्रेसरो नरः ।।३६।। सू० मं० बु० गु० ।। अर्कभौमबुधेज्यानां योगे सूत्रकरो नरः ।। परदाररतः शूरो दुःखी चक्रधरो भवेत् ।। ३७।। सू० चं० मं० शु० ।। रवींदुकुजशुक्राणां संयोगे पारदारिकः ।। निर्लज्जो दुर्जनश्चौरो विषमांगो जनो भवेत् ।।३८।। सू० मं० बु० श० ।। रवि भौमबुधार्कीणां योगे योद्धा कविर्जनः ।। मंत्री च भूपतिस्तीक्ष्णो नीचाचारश्च जायते ।।३९।। सू० मं० गु० श० । रविभौमेज्यशुक्राणां योगे पूज्यो धनी जनः । शुभगो नृपमान्यश्च ख्यातो भवति नीतिभाक् ।।४०।। सू० मं० गु० श० ।। रविभौमेज्यमंदानां संयोगेगणनायकः ।। सोन्मादो नृपमान्यश्च सिद्धार्थो जायते नरः ।।४१।। सू० मं० शु० श० ।। रविभौमसितार्कीणां संयोगे जायते नरः ।। लोकद्वेष्टा समाक्षश्च नीचाचारो जडाकृतिः ।।४२।। सू० बु० गु० शु० ।। रविज्ञजीवशुक्राणां योगे बहुमतिर्नरः।। धनी सुखी च सिद्धार्थः प्रगल्भश्च प्रजायते ।।४३।। सू० बु० गु० श०।। सूर्यज्ञगुरुमंदानां संयोगे जायते नरः ।। भ्रातृमान्कलही मानी क्लीबाचारी निरुद्यमः ।। ।।४४।। सू० बु० शु० श०।। रविज्ञभृगुमंदानां योगे मित्रयुतः शुचिः ।। मुखरः सुभगः प्राज्ञो जायते च सुखी नरः ।।४५।। सू० गु० शु ० श० ।। रवीज्यभृगुमंदानां संयोगे लोभमानवान् ।। कविः कारुकनाथश्च राजप्रीतो भवेन्नरः ।।४६।। चं० मं० बु० गु० ।। चंद्रारबुधजीवानां योगे शास्त्रविचक्षणः ।। नरेन्द्रस्य कृपापात्रं महाबुद्धिर्नरो भवेत् ।।४७।। चं० मं० बु० शु० चंद्रभौमज्ञशुक्राणामन्वये बंधकीपतिः ।। निद्रालुः कलही नीचो बंधुद्वेषी नरो भवेत् ।। ४८।। चं० मं० बु० श० ।। चंद्रभौमज्ञमंदानां योगे शूरकुलोद्भवः ।। पुत्रमित्रकलत्री च द्विमातृपितृको जनः ।।४९।। चं० मं० गु० शु० ।। चंद्रारगुरुशुक्राणां योगे साहसिको नरः ।। विकलांगो धनी पुत्री मानी प्राज्ञोऽपि जायते ।।५०।। चं० मं० गु० श० ।। चंद्रारजीवमंदानां संयोगे बधिरोऽधनः ।। सोन्मादः स्थिरवाक्यश्च शूरो विज्ञो भवेन्नरः।।५१।। च० मं० शु० श० ।। चंद्रारभृगुमंदानां मिलने कुलटापतिः ।। सोद्वेगः सर्पतुल्याक्षः प्रगल्भो जायते नरः ।।५२।। चं० बु० गु० शु० ।। चंद्रज्ञजीवशुक्राणां मिलने सुभगो धनी ।। द्विमातृपितृकः प्राज्ञो गतारिर्जायते नरः ।।५३।। चं० बु० गु० श० ।। चंद्रज्ञगुरुमंदानां योगे बंधुप्रियः कविः ।। तेजस्वी राजमंत्री च यशो धर्मयुतो नरः ।।५४।। चं० बु० शु० श०।। इंदुज्ञभृगुमंदानां योगे मात्रा विवर्जितः ।। त्वग्दोषी सुभगी दुःखी बहुभार्यो भवेन्नरः ।।५५।। चं० गु० शु० श० ।। चंद्रेज्यसितसौरीणामन्वये पारदारिकः ।। प्राज्ञो निर्द्रव्यबंधुश्च स्थूलभार्यो भवेन्नरः ।।५६।। मं० गु०बु० शु० ।। भौमज्ञगुरुशुक्राणां योगे स्त्रीकलहप्रियः ।। धनी सुशीलो नीरोगी लोकपूज्यो भवेन्नरः ।।५७।। मं० बु० गु० श० ।।

भौमङ्गगुरुसौरीणां योगे शूरश्च निर्धनः । सत्यशौचयुतो विद्वान्वादी वाग्मी नरो भवेत् ।।५८।। मं० बु० शु० श० ।। भौमज्ञभृगुमंदानां सारमेयरुचिर्भवेत् ।। मल्लोन्यपुष्टो योद्धा च दृढांगो जायते नरः ।।५९।। मं० गु० शु० श० ।। भौमेज्यभृगुमंदानां मिलने साहसप्रियः ।। धनी सतेजाः स्त्रीलोलः कितवो जायते नरः ।।६०।। बु० गु० शु० श० ।। बुधेज्यभृगुमंदानां योगे कामातुरो जनः ।। विधेयभृत्यो मेधावी तीव्रशास्त्ररतो भवेत् ।।६१।।

